The Asiatic Society Of Bombay
THIS MANUSCRIPT HAS BEEN ADOPTED FOR
MICROFILMING BY:-
SHREE P.H. KARANI
Date 17-10-2008

Sankhya Bhashyam

Vignana Acharya, Sankhya Bashyam

ZZ. a. 27

44540
Ac

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

अथसाख्यभाष्य प्रारंभः॥१६७५

श्रीगणेशायनमः॥ ॥श्रीकपिलायनमः॥ एकोद्वितीयइतिवेदवचांसिपुंसिसर्वाभिमानविनिवर्तनतोस्य
मुक्तेर्वैधर्म्यलक्षणभिदाविरहंवदंतिनाखंडतांस्वइवधर्मवताविरोधात् तस्यश्रुतस्यमननार्थमथोपदेष्टुंस
द्युक्तिजालमथसांख्यकृदाविरास नारायणः कपिलमूर्तिरशेषदुःखहानायजीवनिवहस्यनमोस्तुतस्मै २ नानो
पाधिषुयश्चानारूपंभासनमर्कवत् तत्समंसर्वभूतेषुचित्सामान्यमुपास्महे ३ ईश्वरानीश्वरत्वादिचिदेकरसवस्तुनि
विवदायद्यपश्यंतितदस्मिपरमंमहः ४ कालार्कभक्षितंसांख्यशास्त्रज्ञानसुधाकरं कलावशिष्टंभूयोपिपूरयिष्येव
चोमृतैः ५ चिरचिंतनभेदेनमोचयिष्येचितोखिल सांख्यभाष्यमिषेणास्मात्प्रीयतांमोक्षदोहरिः ६ तत्त्वमेवतदेवत्वमेवं
श्रुतिशतोदितं सर्वात्मनांवैधर्म्यंशास्त्रस्यास्यैवगोचरः ७ आत्मावाअरेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासि
तव्यइत्यादिश्रुतिषुपरमपुरुषार्थसाधनस्यात्मसाक्षात्कारस्यहेतुतयाश्रवणादित्रयंविहितं तत्रश्रवणाद्युपायाकांक्षा
यांस्मर्यतेश्रोतव्यःश्रुतिवाक्येभ्योमंतव्यश्चोपपत्तिभिः मत्वाचसततंध्येयएतेदर्शनहेतवइति ध्येयोयोगशास्त्रप्रकारेणे
तिशेषः तत्रश्रुतिभ्यःश्रुतेषुपुरुषार्थतद्धेतुज्ञानतद्विषयात्मस्वरूपादिषुश्रुत्यविरोधिनीरुपपत्तीः षडध्यायीरूपेणविवेक
शास्त्रेणकपिलमूर्तिर्भगवानुपदिदेश ननुन्यायवैशेषिकाभ्यामप्येतेष्वर्थेषुन्यायःप्रदर्शितः इतिताभ्यामस्यग
तार्थत्वंसगुणनिर्गुणत्वादिविरुद्धरूपैरात्मसाधकतयातद्युक्तिभिरस्यैवयुक्तीनांविरोधेनोभयोरेवदुर्घटंचप्रामाण्य
मितिमैवंव्यावहारिकपारमार्थिकरूपविषयभेदेनगतार्थत्वविरोधयोरभावात् न्यायवैशेषिकाभ्यांहिसुखदुःखा
द्यनुवादतोदेहादिमात्रविवेकेनात्माप्रथमभूमिकायामनुमापितः एकपदापरमसूक्ष्मेप्रवेशासंभवात् तदीयंचज्ञा
नंदेहाद्यात्मतानिरसनेव्यवहारिकंतत्त्वज्ञानंभवत्येवयथापुरुषेस्थाणुभ्रमनिराकरणतयाकरचरणादिमत्त्वज्ञानंव्य
वहारेतत्त्वज्ञानंतद्वत् अतएवप्रकृतेर्गुणसंमूढाःसज्जंतेगुणकर्मसु तानकृत्स्नविदोमंदान्कृत्स्नविन्नविचालयेदि

तिगीतायांकर्तृत्वाभिमानिनस्तार्किकस्याकृत्स्नवित्त्वमेवकृत्स्नवित्सांख्यापेक्षयोक्तंनतुसर्वथैवाज्ञत्वमिति त
थातदीयमपिज्ञानमपरवैराग्यद्वारापरंपरयामोक्षसाधनंभवत्येवैतज्ज्ञानापेक्षयाचसांख्यज्ञानमेवपारमार्थिकंपर
वैराग्यद्वारासाक्षान्मोक्षसाधनंचभवतीउक्तगीतावाक्येनात्माकर्तृत्वज्ञस्यैवकृत्स्नवित्त्वसिद्धेः तीर्णोहितदासर्वान्
हृदयस्यशोकान्भवतिकामादिकंमनएवसमानःसन्नुभौलोकावनुसंचरतिध्यायतीव सयत्तत्रकिंचित्पश्यत्यनन्वा
गतस्तेनभवतीत्यादिनास्तिकश्रुतिशतैःप्रकृतेःक्रियमाणानिगुणैःकर्माणिसर्वशः अहंकारविमूढात्माकर्ताहमि
तिमन्यते निर्वाणमयएवायमात्माज्ञानमयोमलः दुःखज्ञानमयाधर्माःप्रकृतेस्तेतुनात्मनइति इत्यादिकाभिःस्मृतिश
तैश्चन्यायवैशेषिकोक्तज्ञानस्यपरमार्थभूमौबाधितत्वाच्छ्रवणचैतावतान्यायाप्रामाण्यंविवक्षितार्थेदेशश्रुतिरेकोशेनि
पाधाभावात् यत्परःशब्दःसशब्दार्थइतिन्यायात् आत्मनिसुखादिमत्त्वस्यलोकसिद्धतयातत्रप्रमाणांतरान
पेक्षणेनतदंशस्यानुवादत्वात्शास्त्रतात्पर्यविषयत्वमितिस्यादेतत् न्यायवैशेषिकाभ्यामात्राविरोधोभवतु ब्र
ह्ममीमांसायोगाभ्यांतुविरोधोस्त्येवताभ्यांनित्येश्वरसाधनात् अत्रचेश्वरस्यप्रतिषिध्यमानत्वात् नचात्रापिव्यव
हारपरमार्थभेदेनसेश्वरनिरीश्वरवादयोरविरोधोस्तुसेश्वरवादस्योपासनापरत्वसंभवादितिवाच्यंविनिगमका
भावात् ईश्वरोहिदुर्ज्ञेयइतिनिरीश्वरत्वमपिलोकव्यवहारसिद्धमैश्वर्यवैराग्यायानुवदितुंशक्यतेआत्मनःसगुणत्व
वन्नतुक्वापिश्रुत्यादावीश्वरःस्फुटंप्रतिषिध्यते येनसेश्वरवादस्यैवव्यावहारिकत्वमवधार्येतेति अत्रोच्यते अत्रापिव्य
वहारपरमार्थभावेनापिव्यवस्थासंभवति असत्यमप्रतिष्ठंतेजगदाहुरनीश्वरमित्यादिशास्त्रैर्निरीश्वरवादस्यनिं
दितत्वात् अस्मिन्नेवशास्त्रेव्यावहारिकस्येश्वरप्रतिषेधस्यवैराग्याद्यर्थमनुवादौचित्यात् यदिहिलोकायतिकमता
नुसारेणनित्यैश्वर्यंनप्रतिषिध्येततदापरिपूर्णनित्यनिर्दोषैश्वर्यदर्शनेनतत्रचित्तावेशतोविवेकाभ्यासप्रतिबंधःस्यादिति

सां·भा· सांख्याचार्याणामाशयः सेश्वरवादस्य न क्वापि निराकरणमस्ति येनोपासनादिपरतया नच्छास्त्रसंकोचः स्यात् यत्तु नास्ति
२ सांख्यसमं ज्ञानं नास्ति योगसमं बलं अत्र ते संशयो मा भूत् ज्ञानं सांख्यं परं मतमित्यादिवाक्यं तद्विवेकांश एव सांख्यज्ञा
नस्य दर्शनान्तरेभ्य उत्कर्षं प्रतिपादयति न त्वीश्वरप्रतिषेधांशेऽपि तथा पराशराद्यखिलशिष्टसंवादादपि सेश्वरवादे विशेश्व
रवादस्यैव पारमार्थिकत्वमवधार्यते। अपि च अक्षपादप्रणीते च काणादे सांख्ययोगयोः त्याज्यः श्रुतिविरुद्धोंशः श्रुत्येकशर
णैर्नृभिः। जैमिनीये च वैयासे विरुद्धांशो न कश्चन श्रुत्या वेदार्थविज्ञाने श्रुतिपारं गतौ हि तौ। इति पराशरोपपुराणादिभ्यो
ब्रह्ममीमांसाया ईश्वरांशे बलवत्त्वं तथा न्याय्यं त्वाण्पके नास्ति नेकानि तैस्तैरुक्तानि इत्यादिभिः हेत्वागमसदाचारैर्यद्यु
क्तं तदुपास्यतामिति मोक्षधर्मवाक्यादि पराशरोपपुराणाद्यखिलशिष्टव्यवहारेण ब्रह्ममीमांसान्यायवैशेषिकादियुक्तेश्वरसाध
कन्यायस्यैव ग्राह्यो बलवत्त्वात्। तथाप्यत्र पश्यंति योगीशाः सांख्या अपि महेश्वरं अनादिनिधनं ब्रह्म तमेव शरणं व्रजे
त् इत्यादि कौर्मादिवाक्ये सांख्यानामीश्वरज्ञानस्यैव नारायणादिना प्रोक्तत्वात्। किंच ब्रह्ममीमांसाया ईश्वर एव
मुख्यो विषयः उपक्रमादिभिरवधृतः। तत्रांशे तस्य बाधे शास्त्रस्यैवाप्रामाण्यं स्यात्। यत्परः शब्दः स शब्दार्थ इति न्या
यात्। सांख्यशास्त्रस्य तु पुरुषार्थतत्साधनप्रकृतिपुरुषविवेकावेव मुख्यो विषय इतीश्वरप्रतिषेधांशबाधेऽपि ना
प्रामाण्यं यत्परः शब्दः स शब्दार्थ इति न्यायात्। अतः सावकाशतया सांख्यमेवेश्वरप्रतिषेधांशे दुर्बलमिति। न च ब्रह्म
मीमांसायामपीश्वर एव मुख्यो विषयो न तु नित्यैश्वर्यमिति वक्तुं शक्यते स्मरसनकाशादयप्रसंगरूपस्य पूर्वपक्ष
स्यानुपपत्तेर्नित्यैश्वर्यविशिष्टस्यैव ब्रह्ममीमांसाविषयत्वावधारणात्। विषयवाक्यस्य परब्रह्मण्येव मुख्यत्वात्। अ २
थातः परब्रह्मजिज्ञासेति न सूत्रितमिति एतेन सांख्यविरोधात्। ब्रह्मयोगदर्शनयोः कार्येश्वरपरत्वमपि न शंकनीयं प्र
कृतिस्वातंत्र्यापत्त्यारंभणानुपपत्तेश्चानुमानमित्यादिब्रह्मसूत्रपरानुपपत्तेश्च तथा स पूर्वेषामपि गुरुः कालेनानवच्छे

७/1990

दिति योगसूत्रतदीयव्यासभाष्याभ्यां स्फुटमीश्वरनित्यतावगमाच्चेति। तस्मादभ्युपगमवादप्रौढिवादादिनैव सांख्यस्य व्याव
हारिकेश्वरप्रतिषेधपरतया ब्रह्ममीमांसायोगाभ्यां सह न विरोधः। अभ्युपगमवादश्च शास्त्रे दृष्टो यथा विष्णुपुराणे एते
भिन्नदृशां दैत्य विकल्पाः कथिता मया। कृत्वाभ्युपगमं तत्र संक्षेपः श्रूयतां मम इति। अस्तु वा पापिनां ज्ञानप्रतिबंधार्थमास्तिक
दर्शनेष्वप्यंशतः श्रुतिविरुद्धार्थव्यवस्थापनं तेषु तेष्वंशेष्वप्रामाण्यं च श्रुतिस्मृत्यविरुद्धेषु तु मुख्यविषयेषु प्रामाण्यमस्त्येव अ
त एव पद्मपुराणे ब्रह्मयोगदर्शनातिरिक्तानां निंदाप्युपपद्यते यथा तत्र पार्वतीं प्रतीश्वरवाक्यं श्रुणु देवि प्रवक्ष्यामि तामसा
नि यथाक्रमं। येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि प्रथमं हि मयैवोक्तं शैवं पाशुपतादिकं मच्छक्त्यावेशितैर्विप्रैः संप्रोक्तानि
ततः परं। कणादेन तु संप्रोक्तं शास्त्रं वैशेषिकं महत्। गौतमेन तथा न्यायं सांख्यं तु कपिलेन वै। द्विजन्मना जैमिनिना पूर्वं वेदमया
र्थतः। निरीश्वरेण वादेन कृतं शास्त्रं महत्तरं। धिषणेन तथा प्रोक्तं चार्वाकमतिगर्हितं। दैत्यानां नाशनार्थाय विष्णुना बुद्धरूपिणा
मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमेव च। मयैव कथितं देवि कलौ ब्राह्मणरूपिणा। अपार्थश्रुतिवाक्यानां प्रदर्शयल्लोकगर्हितं क
र्मस्वरूपत्याज्यत्वमत्र च प्रतिपाद्यते सर्वकर्मपरिभ्रंशान्नैष्कर्म्यं तत्र चोच्यते। परात्मजीवयोरैक्यं मयात्र प्रतिपाद्यते। ब्रह्मणोस्य
परं रूपं निर्गुणं दर्शितं मया। सर्वस्य जगतोऽप्यत्र नाशनार्थं कलौ युगे। वेदार्थवन्महाशास्त्रं मायावादमवैदिकं। मयैव कथितं देवि
जगतां नाशकारणादिति। अधिकं तु ब्रह्ममीमांसाभाष्ये प्रपंचितमस्माभिरिति। नास्तिकशास्त्रस्य न कस्याप्यप्रामाण्यं विरो
धावास्तवविषयेषु सर्वेषामबाधादविरोधाच्चेति। नन्वेवं पुरुषबहुत्वांशे सांख्यशास्त्रस्याभ्युपगमवादत्वं स्यात् न स्यात् अवि
रोधात्। ब्रह्ममीमांसायामप्यंशतो नाव्यपदेशादिसूत्रादिसूत्रे जीवात्मबहुत्वस्यैव निर्णयात्। सांख्यसिद्धपुरुषाणामा
त्मत्वं तु ब्रह्ममीमांसया बाध्यत एव आत्मेति तूपयंति इति सूत्रेण परमात्मन एव परमार्थभूमावात्मत्वावधारणात्। तथा
पि च सांख्यस्य नाप्रामाण्यं व्यावहारिकात्मनो जीवस्येतरविवेकज्ञानस्य मोक्षसाधनत्वे विवक्षितार्थबाधाभावात्। एतेन श्रुति

44540

स्मृतिप्रसिद्धयोर्नानात्मैकात्मत्वयोर्व्यावहारिकपारमार्थिकभेदेनाविरोधश्च ब्रह्ममीमांसायां प्रपंचितोऽस्माभिरिति दि
क्॥ नन्वेवमपि तत्त्वसमाससांख्यसूत्रैः सहास्याः षडध्याय्याः पौनरुक्त्यमिति चेन्न मैवं संक्षेपविस्ताररूपेणोभयोरपौनरुक्त्या
त्। अत एवास्याः षडध्याय्याः योगदर्शनस्येव सांख्यप्रवचनसंज्ञा युक्ता तत्त्वसमासाख्यं हि यत्संक्षिप्तसांख्यदर्शनं तस्यैव प्र
कर्षेणास्यां निर्वचनमिति विशेषस्त्वयं यस्याः षडध्याय्याः तत्त्वसमासोक्तार्थविस्तारमात्रं। योगदर्शनस्य त्वभ्युपगमवादप्र
तिषिद्धेश्वरनिरूपणेन न्यूनतापरिहारोऽपीति अस्य च सांख्यसंज्ञा सान्वया संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते तत्त्वानि च च
तुर्विंशत् तेन सांख्याः प्रकीर्तिताः इत्यादिभ्यो भारतादिवाक्येभ्यः संख्या सम्यग्विवेकेनात्मकथनमित्यर्थः अतः सांख्यश
ब्दस्य योगरूढत्वात् तत्कारणं सांख्ययोगाधिगम्यमित्यादिश्रुतिषु। एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृण्वित्यादिस्मृ
तिषु च सांख्यशब्देन सांख्यशास्त्रमेव ग्राह्यं न पुनरर्थान्तरं कल्पनीयमिति तदिदं मोक्षशास्त्रं चिकित्साशास्त्रवत् चतुर्व्यू
हं यथा हि रोग आरोग्य रोगनिदानं भैषज्यमिति चत्वारो व्यूहाः चिकित्साशास्त्रस्य प्रतिपाद्याः तथैव हेयं हेयहेतुः हानोपाय
श्चेति चत्वारो व्यूहा मोक्षशास्त्रस्य प्रतिपाद्या भवंति मुमुक्षुभिर्जिज्ञासितत्वात् तत्र त्रिविधं दुःखं हेयं तदत्यंतनिवृत्तिर्हानं प्रकृ
तिपुरुषसंयोगद्वारा चाविवेको हेयहेतुः विवेकख्यातिस्तु हानोपाय इति हानशब्देन चैषामुपकरणं संग्रहः तत्र चतुरो फलत्वेना
भ्यर्हितं हानं तत्प्रतियोगित्वेन हेयं प्रतिपादयन् शास्त्रकारः शिष्यावधानाय शास्त्रारंभं प्रतिजानीते अथ त्रिविधदुः
खात्यंतनिवृत्तिरत्यंतपुरुषार्थः अथशब्दो वा आरंभमात्रेण मंगलरूप इत्ययमेव षष्ठाध्याये वक्ष्यति। अर्थस्त्वत्राथशब्द
स्याधिकार एव शिष्यप्रश्नानंतर्यादीनां पुरुषार्थेन सहान्वयासंभवात् ज्ञानार्थानंतर्यस्य सूत्रे वक्ष्यमाणत्वात्प्रतिपा ३
दनवैयर्थ्यात् अधिकारश्चिन्नार्थं तच्छास्त्रारंभं प्रतिज्ञायतेऽथप्रसंगात् तस्मात्पुरुषार्थस्योपक्रमोपसंहारदर्शनादधिका
रार्थमवोचितं। तदुक्तिः पुरुषार्थस्योपसंहारो भविष्यतिरिति अधिकारश्चाधिकेन प्राधान्येनारंभणेआरंभश्च प्रयोपि सा

शास्त्रस्यैव तथापि तद्द्वारा शास्त्रार्थत्वं द्वारद्वारिणोरभेदादिति तथा च साधनाद्युपकरणसहितो यथोक्तपुरुषार्थोऽधिकृतः प्राधान्येन
निरूपयितुमस्माभिरारभ्यत इति सूत्रवाक्यार्थः त्रिविधमाध्यात्मिकमाधिभौतिकमाधिदैविकं च दुःखं तत्रात्मानं स्वसंघातम
धिकृत्य प्रवृत्तमित्याध्यात्मिकं शारीरं मानसं च तत्र शारीरं व्याध्याद्युत्थं मानसं कामाद्युत्थं तथा भूतानि प्राणिनोऽधिकृत्य प्रवृ
त्तमित्याधिभौतिकं व्याघ्रचोराद्युत्थं देवताग्निवाय्वादीनधिकृत्य प्रवृत्तमित्याधिदैविकं दाहशीताद्युत्थमिति विभागः यद्य
पि सर्वमेव दुःखं मानसं तथापि मनोमात्रजन्यत्वाजन्यत्वाभ्यां मानसत्वामानसत्वविशेषः एषां त्रिविधदुःखानां यात्यंतनिवृ
त्तिः स्थूलसूक्ष्मसाधारण्येन निःशेषतो निवृत्तिः सोऽत्यंतः परमः पुरुषार्थः पुरुषाय बुद्धेरिष्ट इत्यक्षरार्थः तत्स्थ
लं दुःखं वर्तमानावस्थं च द्वितीयक्षणात्स्वयमेव नश्यतीति अतीतं तन्न साधनापेक्षा अतीतं तु प्रागेव नष्टमिति न तत्र साधना
पेक्षेति परिशेषादनागतावस्थं सूक्ष्मं द्वितीयक्षणभाविदुःखनिवृत्तिरेव पुरुषार्थत्वेन पर्यवस्यति तथा च योगसूत्रं हे
यं दुःखमनागतमिति निवृत्तिश्च न नाशोऽपि तु तदतीतावस्थाध्वंसप्रागभावयोरतीतानागतावस्थारूपत्वात् सत्कार्यवादिभि
रभावानंगीकारात् किं तु दाहादिरूप्यवर्तमानपि नागतं दुःखमप्रामाणिकं अतः स्वपुण्यवत् निवृत्तेर्न पुरुषार्थत्वं युक्तमिति मैवं
सर्वत्र हि स्वस्वतत्त्वं शक्तिर्यावद्द्रव्यस्थायिनीति पातंजलेऽसिद्धं दाहशक्तेर्भस्मस्याग्नेः कार्यदर्शनात् सा च शक्तिः अनागता
वस्था न तत्कार्यरूपा द्रव्यमेव चोपादानकारणं स्वरूपयोग्यत्वेन सपिण्डीयते अतो यावच्चित्तसत्ता तावदेवानागतदुःखसत्तानुमी
यते तन्निवृत्तिश्च पुरुषार्थ इति जीवन्मुक्तिदशायां च प्रारब्धकर्मफलातिरिक्तानां दुःखानामनागतावस्थानां बीजाख्यानां दाहो
विदेहकैवल्ये तु चित्तेन सह विनाश इति अवांतरविशेषः नतदाहश्च आविद्यासहकार्योच्छेदमात्रं ज्ञानस्याविद्यामात्रोच्छेदकत्व
स्य लोकत्वस्य लोकसिद्धत्वात् अत एव चित्तेन सहैव दुःखस्य नाशः ज्ञानस्य साक्षाद्दुःखनाशकत्वे प्रमाणाभावादिति ननु तथापि
दुःखनिवृत्तिर्न पुरुषार्थः संभवति दुःखस्य चित्तधर्मत्वेन पुरुषे तन्निवृत्त्यसंभवात् दुःखनिवृत्तिशब्दस्य दुःखानुसारार्थकत्वेपि

सां०भा०
४

पुरुषेनस्य नित्यसिद्धत्वात् यत्तु कंठचामीकरवत्सिद्धेप्यसिद्धत्वभ्रमात् पुरुषार्थतास्यादिति तन्न एवमपि पुमान्निर्दुःख इति
श्रवणमननोत्तरदुःखहानार्थं निदिध्यासनादौ प्रवृत्त्यनुपपत्तेः बह्वायाससाध्येषूपायेषु फलनिश्चयादेव प्रवृत्तिर्भवति प्रकृते
तु श्रवणमननाभ्यां सिद्धत्वज्ञानाच्च प्रामाण्यज्ञानानास्कंदितफलस्यासिद्धत्वनिश्चयोस्ति किंच भवतु कश्चित् भ्रमादिना पुरुषे
ऽज्ञाविषयत्वं दुःखाभावस्य श्रुतिस्तु मोहनाशिनी कथं सिद्धस्य फलत्वं प्रतिपादयेत इति शोकमात्मवित तत्वविद्वान् हर्षशोकौ जहाती
त्यादिरिति अत्रोच्यते नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते इति हि यत्ता धारकसूत्रेणैवायं पूर्वपक्षः समाधास्यत
तथाहि प्रतिबिंबरूपेण पुरुषेपि सुखदुःखे स्तः अन्यथा तयोर्भोग्यत्वानुपपत्तेः सुखादिग्रहणं हि भोगः ग्रहणं च तदाकारता
सा च कूटस्थचितेर्बुद्धेरर्थाकारवत्परिणामेन संभवतीत्यगत्या प्रतिबिंबस्वरूपतामेव पर्यवस्यति अयमेव बुद्धिवृत्ति
प्रतिबिंबो वृत्तिसारूप्यमितरत्रेति योगसूत्रेणोक्तः सत्वेतु तप्यमाने तदाकारानुरोधी पुरुषोप्यनुतप्यते इति दृश्यते इति योग
भाष्ये च तदाकारानुरोधशब्देन विशिष्यैव तापाख्यदुःखस्य प्रतिबिंब उक्तः अत एव पुरुषस्य बुद्धिरूपरागे स्फटिकदृष्टां
तं सूत्रकारो वक्ष्यति कुसुमवच्च मणिरिति वेदांतिभिरपि चेतनेध्यस्ततयैव दुःखमानमुच्यते स चाध्यासः प्रतिबिंबं विना न घ
टते न ज्ञानमात्रमध्यासत्वे आत्माश्रयो ध्यासात् ज्ञानं ज्ञानमेव च अध्यास इति न देतत्स्मर्यतेपि तस्मिंश्चिद्दर्पणे स्फारे
समस्ता वस्तुदृष्टयः इमास्ताः प्रतिबिंबंति सरसीव तटद्रुमाः इति अत्र हि दृष्टिशब्दो बुद्धिवृत्तिसामान्यपरो युक्तिसाम्यात् प्र
तिबिंबोक्तः प्रतिबिंबश्च तदुपाधिषु बिंबाकारश्चित्तपरिणाम इति तस्मात्प्रतिबिंबरूपेण पुरुषे दुःखसंबंधो भोगाख्यो
ऽस्ति अतस्तेनैव रूपेण तन्निवृत्तेः पुरुषार्थत्वमुक्तं अत एव दुःखं माभुंजीयेति प्रार्थना प्यापामरं दृश्यते तस्माद्दुःखभोगनिवृत्तेः ४
पुरुषार्थत्वमन्यथानुपपत्त्या न संभवतीति सिद्धं स्वतः पुरुषार्थः दुःखनिवृत्तिस्तु कंटकादिनिवृत्तिवत्तादर्थ्येन न स्वतः पुरुषा-
र्थः किंतु तद्भोगः एवं सुखमपि न स्वतः पुरुषार्थः किंतु तद्भोग एव तदिदं दुःखभोगनिवृत्तेः पुरुषार्थत्वं योगभाष्ये व्यास

देवैरुक्तं तस्मिन्निवृत्ते पुरुषः पुनरिदं तापत्रयं न भुंक्ते अतश्च स्वतावपि दुःखनिवृत्तेः पुरुषार्थत्वं विषयतासंबंधेनैव
बोध्यं तदेतत् योगवार्तिके प्रपंचितमस्माभिरिति दिक् तदेवमनेन सूत्रेण शास्त्रहृदयं संक्षेपेणोद्दिष्टं विस्तरस्तु नयोः पश्चा
द्भविनेती अतःपरं वक्ष्यमाणस्य हानोपायस्य हस्याकांक्षार्थं न दितरेषां हानोपायत्वं प्रत्याचष्टे सूत्रकारः तेन न दृष्टात्तत्सि
द्धिर्निवृत्तेप्यनुवृत्तिदर्शनात् २ लौकिकादुपायाद्धनादेः तस्य दुःखनिवृत्तिसिद्धिर्नास्ति कुतः धनादिना दुःखनिवृत्तेः
पश्चाद्धनादिक्षये पुनरपि दुःखानुवृत्तिदर्शनादित्यर्थः तथा च श्रुतिः अमृतत्वस्य तु नाशास्ति वित्तेनेत्यादिः नन्वेवं धनार्ज
नस्य कुंजरशौचवत् दुःखनिवर्तकत्वं कथं तत्राह प्रात्यहिकक्षुत्प्रतीकारवत्तत्प्रतिकारचेष्टनात् पुरुषार्थत्वं हि दृष्टसाध
नजन्यायां दुःखनिवृत्तावस्त्येव पुरुषार्थत्वमेव नास्ति यथाकथंचित्पुरुषार्थत्वं नास्त्येव कुतः प्रात्यहिकक्षुधः दुःखस्य निरा
करणवदेव तेन धनादिना दुःखनिराकरणस्य चेष्टनादन्वेषणादित्यर्थः अतो धनार्जनेऽवृत्तिरूपपद्यत इति भावः कुंजरशौ
चादिकमपि अपानतो दुःखनिवर्तकं न यामंदपुरुषार्थो भवत्येवेति स च दृष्टसाधनजन्यो मंदपुरुषार्थो विज्ञैर्हेय इत्याह सर्वा
संभवात् संभवेपि सत्तासंभवाद्धेयः प्रमाणकुशलैः ४ स चेष्टसाधनजो दुःखप्रतिकारो दुःखादुःखविवेककुशलाभिज्ञै
र्हेयो दुःखपक्षे निक्षेपणीयः कुतः सर्वासंभवात् सर्वदुःखेषु दृष्टसाधनैः प्रतीकारासंभवात् यत्रापि संभवस्तत्रापि
प्रतियहृपापायस्य दुःखव्यापकत्वं आह संभवेपीति दृष्टोपायनान्तरीयकादिदुःखसंपर्कावश्यंभावादित्यर्थः तथा च
योगसूत्रं परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च सर्वमेव दुःखं विवेकिन इति ननु दृष्टसाधनजन्ये सर्वस्मिन्ने
व दुःखप्रतिकारे दुःखसंभेदनियमो प्रयोजकः तथा च स्मर्यते यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरं अभिलाषोपनीतं
च तत्सुखं स्वःपदास्पदमिति तत्राह उत्कर्षादपि मोक्षस्य सर्वोत्कर्षश्रुतेः ५ इष्टसाधनसाध्यस्य मोक्षस्य दृष्टसाधनस्य
साध्यराज्यादिभ्य उत्कर्षात् तेषु दुःखसत्तावधार्यते अपिशब्दात् त्रिगुणात्मकत्वादेरपि मोक्षस्योत्कर्षे प्रमाणं सर्वोत्कर्षश्रु

नेतिनि, नवैस शरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इत्यादिना विदेहकैवल्यस्यो
त्कर्षश्रुतेरित्यर्थः। ननु मा भवतु दृष्टसाधनादत्यन्तं दुःखनिवृत्तिः अदृष्टसाधनात्तु वैदिककर्मभ्यः स्यात्। अपाम सोमम
मृता अभूमेत्यादिश्रुतेरित्यत आह। अविशेषश्चोभयोः ६ उभयोरपि दृष्टादृष्टयोरत्यन्तदुःखनिवृत्त्यसाधकत्वे यथो
क्तहेतुमत्त्वेनाविशेष इति मन्तव्य इत्यर्थः। एतदेव कारिकयाप्युक्तं। दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्त इति। गु
रोरनुश्रूयत इत्यनुश्रवो वेदः तद्विहितयागादिरानुश्रविकः स दृष्टोपायवदेवाविशुद्ध्या हिंसादिपापेन विनाशित्वातिश
यफलकत्वेन च युक्त इत्यर्थः। ननु वैधहिंसायाः पापजनकत्वे बलवदनिष्टाननुबन्धित्वेष्टसाधनत्वरूपस्य विध्यर्थस्या
नुपपत्तिरिति चेन्न। वैधहिंसाजन्यानिष्टस्येष्टोत्पत्तिनान्तरीयकत्वेन इष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखजनकत्वरू
पस्य बलवदनिष्टाननुबन्धित्वस्य विध्यर्थस्याक्षतेः। यत्तु वैधहिंसातिरिक्तहिंसाया एव पापजनकत्वमिति तदसं
का च प्रमाणभावात्। युधिष्ठिरादीनां स्वधर्मेऽपि युद्धादौ ज्ञातिवधादिप्रत्यवायपरिहाराय प्रायश्चित्तश्रवणाच्च तस्मा
नुपास्याम्यहं तात दृष्ट्वेमं दुःखसंनिधिं त्रयीधर्ममधर्मार्थं किंपाकफलसन्निभमिति मार्कण्डेयवचनाच्च। अहिंसन्सर्वा
णि भूतान्यन्यत्र तीर्थेभ्य इति श्रुतिस्तु हिंसानिवर्त्तनेष्टसाधनत्वमेव वक्ति न तु वैधहिंसाया अनिष्टसाधनत्वाभावमपि। सावि
कं योगवार्त्तिके द्रष्टव्यमिति दिक्। न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। तमेव विदित्वाति मृत्युमेति
नान्यः पन्था विद्यतेऽयनायेत्यादिश्रुतिविरोधान्न तु सोमपानादिभिरमृतत्वं गौणमेव मन्तव्यं। आभूतसंप्लवं स्थानममृत
त्वं हि भाष्यत इति विष्णुपुराणात्। तदेवं दृष्टादृष्टयोः साक्षात्परमपुरुषार्थासाधनत्वे संसिद्धे तत्साधनं दुःखापायाकां
क्षायां विवेक एवानुपायो वक्तव्यः तत्र विवेकज्ञानमविवेकाख्यदुःखहेतूच्छेदद्वारेण हानोपाय इत्याशयेनादाववविवेक
मेवान्यप्रतिषेधेन हेयहेतुतया परिशेषयति प्रघट्टकेन। न स्वभावतो बद्धस्य मोक्षसाधनोपदेशविधिः दुःखात्यन्तनिवृत्तेर्मो

11/1190

क्षस्योक्तत्वादयं बन्धो दुःखयोग एव तस्य बन्धस्य पुरुषेण स्वाभाविकत्वं वक्ष्यमाणलक्षणमिष्टं यतो न स्वभावतो ब
द्धस्य मोक्षाय साधनोपदेशस्य श्रौतस्य विधिरनुष्ठानं नियोज्यानां घटते न ह्यग्नेः स्वाभाविकादौष्ण्यान्मोक्षः संभवति स्वाभावि
कस्य यावद्द्रव्यभावित्वादित्यर्थः। तदुक्तमीश्वरगीतायां। यद्यात्मा मलिनोऽस्वच्छो विकारी स्यात्स्वभावतः। नहि तस्य भवेन्मुक्ति
र्जन्मान्तरशतैरपीति। यस्मिन्सति कारणविलंबात् विलंबो यस्योत्पत्तौ न भवति तस्य तत्स्वाभाविकत्वमिति स्वाभाविकत्वल
क्षणं। ननु सर्वदोपलंभापत्तेः दुःखस्य स्वाभाविकत्वशंकैव नास्तीति चेन्न त्रिगुणात्मकत्वेन चित्तस्य तत्स्वाभाविकत्वेऽपि सत्त्वा
धिक्येनाभिभवस्य सदा दुःखानुपलब्धिवत्। आत्मनोऽपि तदनुपलब्धिसंभवात् दुःखस्वाभाविकतयाविभिन्नो देश्चितस्य
वात्मनाभ्युपगमाच्च। अथैवमात्मनाशादेव मोक्षोऽस्त्विति चेन्न। अहं बद्धो विमुक्तः स्यामिति बन्धसामानाधिकरण्येनैव मो
क्षस्य पुरुषार्थत्वादिति भावः। ननु तदनुष्ठानेन किमित्यत आह। स्वभावस्यानपायित्वादननुष्ठानलक्षणमप्रामाण्यं ८ स्वभावस्य
यावद्द्रव्यभावित्वात् मोक्षासंभवेन तत्साधनोपदिष्टश्रुतेरनुष्ठानलक्षणमप्रामाण्यं स्यादित्यर्थः। ननु श्रुतिबलादेवा
नुष्ठानं स्यात्तत्राह। नाशक्योपदेशविधिरुपदिष्टेऽप्यनुपदेशः। नाशक्यार्थफलोपदेशस्यानुष्ठानं संभवति यत
नु उपदिष्टेऽपि विहितेऽपि शक्यस्योपाये स उपदेशो भवति किं तु उपदेशाभास एव बाधितमर्थं वेदो न बोधयतीति न्या
यादित्यर्थः। अत्र शंकते शुक्लपटवत् १० ननु स्वाभाविकस्याप्यपायो दृष्टो यथा शुक्लपटस्य स्वाभाविकं शौक्ल्यं रंगेणा
पनीयते यथा बीजस्य स्वाभाविक्यप्यंकुरशक्तिरग्निनापनीयते अतः शुक्लपटवत् बीजवच्च स्वाभाविकस्यापि बन्धस्यापा
यः पुरुषे संभवतीति तद्देवतत्साधनोपदेशः स्यादिति चेदित्यर्थः। समाधत्ते शक्त्युद्भवानुद्भवाभ्यां नाशक्योपदेशः ११
उक्तदृष्टान्तयोरपि नाशक्यस्वाभाविकापायोपदेशो लोकानां भवति कुतः शक्त्युद्भवानुद्भवाभ्यां दृष्टान्तद्वये हि शौ
क्ल्यादेराविर्भावतिरोभावावेव भवतः। ननु शौक्ल्यांकुरशक्त्योरपायो भवति रंजकादिव्यापारैः योगिसंकल्पादिभिश्च र

कपटभ्रष्टयोजयोः पुनः शोकांकुरशक्त्यादिर्भावादित्यर्थः । नन्वेवं पुरुषेपि दुःखशक्तितिरोभाव एव मोक्षोस्त्विति चेन्न
दुःखात्यंतनिवृत्तेरेव लोके पुरुषार्थत्वानुभवात् श्रुतिस्मृत्योः पुरुषार्थत्वसिद्धेश्च न तु दृष्टांतयोस्तिरोभावमस्त्विति चेन्न
दुःखात्यंतमात्रस्य किं तु दुःखशक्तितिरोभावमात्रस्य मोक्षत्वे कदाचिद्योगीश्वरसंकल्पादिना शक्त्युद्भवस्य भ्रष्टबीजेष्वि
व युक्त्यापि संभवेनानिर्मोक्षापत्तिरित्यभिप्रायस्तावत्तोयं निराकृतः निमित्तेभ्योपि बंधमपाकरोति सूत्रजातेन पुरुषे दुःखस्य नै
मित्तिकत्वनिराकरणाय घटत्वं न घटत्वेन अनागतावस्थस्य दुःखस्य यातृ इत्यभावित्वादित्याशयेन नैमित्तिकत्वं निरा
क्रियते । न कालयोगतो व्यापिनो नित्यस्य सर्वसंबंधात् १२ नापि कालसंबंधनिमित्तकः पुरुषस्य बंधः कुतो व्यापिनो
नित्यस्य कालस्य सर्वावच्छेदेन सर्वदा मुक्तामुक्तसकलपुरुषसंबंधात् सर्वावच्छेदेन सदा सकलपुरुषाणां बंधापत्तेरित्यर्थः
अत्र च प्रकरणे कालदेशकर्मादीनां निमित्तत्वसामान्यं नापलाप्यते श्रुतिस्मृतियुक्तिभिः सिद्धत्वात् किं तु यन्नैमित्तिकत्वं पा
कजरूपादिवन्निमित्तत्वेन देवबंधे प्रतिषिध्यते पुरुषे बंधस्यौपाधिकत्वाभ्युपगमात् ननु कालादेर्निमित्तत्वेपि सहकार्यं
तरसंभवासंभवाभ्यां व्यवस्था स्यादिति चेन्न एवं सति च संयोगस्य सत्वे बंधस्तत्रैव सहकारिणि लाघवात् बंधो युक्तः पुरु
षे बंधव्यवहारस्यौपाधिकत्वेनाप्युपपत्तेरिति गतं नैमित्तिकत्वेनेति । न देशयोगतोप्यस्मात् १३ देशयोगतोपि न बंधः अस्मा
त्पूर्वसूत्रोक्तात् मुक्तामुक्तपुरुषसंबंधात् मुक्तस्यापि बंधापत्तेरित्यर्थः नावस्थातो देहधर्मत्वात्तस्याः १४ संघातविशेषरूपता
ख्यदेहरूपाया अवस्थानिमित्ततोपि पुरुषस्य बंधः कुतस्तस्याः अवस्थाया देहधर्मत्वादित्यर्थः अन्यधर्मस्य साक्षादन्यबंध ६
कत्वेतिप्रसंगात् मुक्तस्यापि बंधापत्तेरित्यर्थः ननु पुरुषस्याप्यवस्थायां किं बाधकं तत्राह असंगोयं पुरुष इति १५ इतिशब्दो हेत्व
र्थः पुरुषस्यासंगत्वात् अवस्थाया देहमात्रधर्मत्वमिति पूर्वसूत्रेणान्वयः पुरुषस्यावस्थारूपविकारस्वीकारे हि सुसंयोगाख्यः
संगः प्रसज्यतेति भावः असंगत्वे च श्रुतिः स यदत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष इति संगश्च संयोगमा

13/1990

त्रं भवति कालदेशबंधस्य पूर्वमुक्तत्वात् श्रुतिस्मृतिषु पद्मपत्रजलेनैव पद्मपत्रस्यासंगतायाः पुरुषासंगतायां दृष्टां
तनाश्रवणाच्च न कर्मणा अन्यधर्मत्वादतिप्रसक्तेश्च १५ न विहितनिषिद्धकर्मणापि पुरुषस्य बंधः कर्मणामना
धर्मत्वात् अन्यधर्मेण साक्षादन्यस्य बंधे च मुक्तस्यापि बंधापत्तेः ननु स्वस्वोपाधिकर्मणा बंधांगीकारेनायं दोष इ
त्याशयेन हेत्वंतरमाह अतिप्रसक्तेश्चेति प्रलयादावपि दुःखयोगरूपबंधापत्तेश्चेत्यर्थः सहकार्यंतरविलंबाद्विलं
बकल्पनं च प्रागेव निराकृतं न कालयोगत इत्यादिसूत्रैरिति नन्वेवं दुःखयोगरूपोपि बंधः कर्मसामानाधिकरण्यानु
रोधेन चित्तस्यैवास्तु दुःखस्य चित्तधर्मतायाः सिद्धत्वात् किमर्थं पुरुषस्यापि कल्प्यते बंध इत्याशंकायामाह विचित्रभो
गानुपपत्तिरन्यधर्मत्वे १७ दुःखयोगरूपबंधस्य चित्तमात्रधर्मत्वे विचित्रभोगानुपपत्तिः पुरुषस्य हि दुःखयोगं वि
नापि दुःखसाक्षात्कारस्य भोगस्वीकारे सर्वदुःखादिना सर्वपुरुषभोग्यता स्यात् नियामकाभावात् ततश्चायं दुःखभो
क्ता अयं च सुखभोक्तेत्यादिरूपं भोगवैचित्र्यं नोपपद्यतेत्यर्थः अतो भोगवैचित्र्योपपत्तये भोगनियामकतया दुःखादियो
गरूपो बंधः पुरुषेपि स्वीकार्यः स च पुरुषे दुःखयोगः प्रतिबिंबरूप एवेति प्रागेवोक्तं प्रतिबिंबस्य सोपाधिकत्वेन च भवती
ति न सर्वपुंसां सर्वदुःखभोग इति भावः चित्तवृत्तिबोधे पुरुषस्यानादिः स्वस्वामिभावः संबंधो हेतुरिति योगभाष्यदर्शि
तोत्र सिद्धः चित्ते च पुरुषस्य स्वत्वं स्वभुक्तवृत्तिवासनावत्त्वमिति यत्तु चित्तस्यैव बंधमोक्षौ न पुरुषस्येति श्रुतिस्मृतिषु
गीयते तावद्बिंबरूपदुःखस्य योगरूपं पारमार्थिकं बंधमादायबोध्यं साक्षात्प्रकृतिनिमित्तकत्वमपि बंधस्यापाकरो
ति प्रकृतिनिबंधनाच्चेत्तस्या अपि पारतंत्र्यं ननु प्रकृतिनिमित्तात् बंधो भवत्विति चेन्न यतस्तस्या अपि बंधकत्वे संभोग
पारतंत्र्यं पुनरस्त्वत्र वक्ष्यमाणमस्ति संयोगविशेषं विनापि बंधकत्वे प्रलयादावपि दुःखबंधप्रसंगादित्यर्थः प्रकृतिनिबंध
नाच्चेति पाठे तु प्रकृतिनिबंधनाच्चेद्बंधस्तेत्यर्थः अतोयस्तत्रापि प्रकृतिः बंधकारणं भवतस्मात्संयोगविशेषोपाधिको

सां॰भा॰ कोबंधोग्निसंयोगात्तप्तलोहस्येवेति नित्यसिद्धांतमनेनैव प्रसंगेनांतरालएवावधारयति न नित्यशुद्धबुद्धमुक्तस्वभाव
७ स्य तद्योगस्तद्योगादृते १९ तस्मात्तद्योगात् ऋते प्रकृतिसंयोगं विना न पुरुषस्य तद्योगो बंधसंपर्कोस्ति अपितु
नएव बंधः बंधस्योपाधिकत्वंतु भायतत्र इत्येन वक्तोक्तिः यदि हि बंधः प्रकृतिसंयोगजन्यः स्यात् पाकजरूपवत्स्थायित्वं
वतयोगेप्यनुवर्तेत न च द्वितीयक्षणादेर्दुःखनाशकत्वं कल्प्यं कार्यनाशकतायाः क्लृप्तत्वेन तेनैवोपपत्तावस्माभिस्तु दृष्टत्वेन
न इति हि दुःखादेरूपादाने अतो दीपशिखावत्क्षणभंगुरतया ऽशुविनाशित्वेनैव तद्धर्माणां दुःखादीनामाशुविना
शः संभवतीति अतः प्रकृतिवियोगे बंधाभावादौपाधिक एव बंधो न तु स्वाभाविको नैमित्तिको वेति तथा संयोगनिवृत्तेरे
वसाक्षाध्यानोपायत्वं सपिवक्रोक्तिफलं तथाच स्मृतिः यथाज्वलतृणगृहमिति गृहं विशिष्यरस्तेन तथा सदोषप्रकृतिविधि
न्वोयं न शोचति येषोपि केशुषाना च पारमार्थिको दुःखयोग इति भ्रमो माभूदिति सत्तदर्थः नित्येत्यादि यथास्वभावशु
द्धस्य स्फटिकस्य रागयोगो न जपायोगं विना घटते तथैव नित्यशुद्धादिस्वभावस्य पुरुषस्योपाधियोगं विना दुःखसंयो
गो न घटते स्वतो दुःखाद्यसंभवादित्यर्थः तदुक्तं सौरे यथा हि केवलो रक्तः स्फटिको लक्ष्यते जनैः रंजकाद्युपधानेन तद्व
त्परमपुरुष इति नित्यत्वं कालानवच्छिन्नत्वं शुद्धादिस्वभावत्वं च नित्यशुद्धत्वादिकं तत्र नित्यशुद्धत्वं सदा पापपुण्यशून्यत्वं
नित्यबुद्धत्वं लुप्तचिद्रूपत्वं नित्यमुक्तत्वं सदा पारमार्थिकदुःखायुक्तत्वं प्रतिबिंबरूपदुःखयोगस्तु पारमार्थिको बंध इति
भावः आत्मनो नित्यशुद्धत्वादौ च श्रुतिः अयमात्मा सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरंजनो विभुरित्यादि न च
स्य मननशास्त्रत्वात् तार्थं युक्तिरपि वक्तव्येति चेन्न सत्संनतयोगस्तद्योगात् ऋतइत्यनेन नित्यशुद्धत्वादौ युक्तिरप्युक्तैव तथा
हि आत्मनो नित्यत्वविभुत्वादिकं तावत् न्यायादिदर्शनेष्वेव सोधितं नित्यस्य विभोरात्मनो यद्योगं विना दुःखाद्युत्पत्ति
विकारयोगानवच्छिन्नस्यैवांतःकरणस्य सर्वसंमतकारणस्य तदुपादानकारणत्वमेव युक्तं लाघवात् सर्वविकारे

ष्वंतःकरणस्यान्वयव्यतिरेकाभ्यां न च पुनरंतरविकारेषु मनसो निमित्तत्वमात्मनश्चोपादानत्वं युक्तं कारणद्वय
कल्पने गौरवात् नन्वहं सुखी करोमीत्याद्यनुभवादात्मनो विकारोपादानत्वसिद्धिरिति चेन्न अहं गौरो वेगीत्यादिभ्रम
ज्ञानतुल्यतया तत्त्वेन प्रामाण्यशंकास्कंदितत्वात् प्रत्यक्षाणामुक्तन्यायानुगृहीतानुमानापेक्षया दुर्बलत्वात् आत्मन
श्चिन्मात्रत्वे तु युक्तिरग्रे वक्ष्यत इति दिक् अस्य सूत्रस्यैवार्थः कारिकयाप्युक्तः तस्मात्संयोगादचेतनं चेतनावदिह लिंगं
गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीन इति कर्तृत्वमत्र दुःखित्वादिसकलविकारोपलक्षणं तथा योगस्तत्रेत्यस्य सूत्रस्यैवा
र्थ उक्तः द्रष्टृदृश्ययोः संयोगो हेयहेतुरिति गीतायां च पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान् इति प्रकृतिस्थः प्रकृतिसं
युक्तः तथा श्रुतावपि आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति ननु कालादिवदेव प्रकृतिसंयोगोपि मुक्तामुक्त
पुरुषसाधारणस्तया कथं बंधहेतुरिति वाच्यं अत्रापरत्र अस्मत्साम्यिबुद्धिभावापन्नप्रकृतिसंयोगविशेषस्यैवात्र सं
योगशब्दार्थत्वात् योगभाष्ये व्यासैस्तथा व्याख्यातत्वात् बुद्धिरूपपरिणतेनैव पुरुषे दुःखयोगाच्च वैशेषिकादिवदे
व भोगजनकतावच्छेदकत्वेनांतःकरणसंयोगवैजात्यस्यास्माभिरपीष्टं अतो न मुक्तस्यादौ बंधप्रसंगः स्वत्वं च स्वभुक्ति
वासनावत्त्वादिकं यत्किंचित्प्रवृत्तिसंस्कारप्रवाहोप्यनादिरतः स्वस्वामिभावस्यैवेति कश्चित्तु प्रकृतिपुरु
षयोः संयोगांगीकारे पुरुषस्य परिणामसंगाप्रसक्त्यापत्तौ अतोत्राविवेक एव योगशब्दार्थो न तु संयोग इति तत्र
संयोगोप्यविवेकादिति सूत्रेण अविवेकस्य योगहेतुताया एव सूत्रकारेण वक्ष्यमाणत्वात् स्वस्वामिशक्त्योः स्वरूपोपल
ब्धिहेतुः संयोगः तस्य हेतुरविद्येति सूत्राभ्यां पातंजलेपि संयोगहेतुत्वस्यैवाविद्यायामुक्तत्वाच्च किंचाविवेकाभावरूप
स्याविवेकस्य संयोगत्वे प्रलयादावपि प्रकृतिपुरुषसंयोगसत्त्वेन भोगापत्तिः मिथ्याज्ञानरूपस्याविवेकस्य च संयोग
त्वे अस्माकमपि दुःखप्रकृतिसंयोगस्य ज्ञानादिहेतुत्वादिति तस्मादविवेकनिमित्तको योगो विवेकस्य सच संयोग एव अन्यस्या

15/1990

प्रामाणिकत्वात् संयोगश्च न परिणामः सामान्यगुणातिरिक्तधर्मोत्पत्तेरेव परिणामित्वव्यवहारात् अन्यथा कूट
स्थस्य सर्वगतत्वरूपविभुत्वानुपपत्तेः नापि संयोगमात्रं संगः परिणामहेतुसंयोगस्यैव संगशब्दार्थताया उक्तत्वा
दिति ननु तथापि कथं विभ्वोः प्रकृतिपुरुषयोर्महदादिहेतुरनित्यः संयोगो घटते इति चेन्न प्रकृतेः परिछिन्नापरिछि
न्नपरिछिन्नत्रिविधगुणसमुदायरूपतया परिछिन्नगुणावछेदेन पुरुषसंयोगोत्पत्तेः संभवात् श्रुतिस्मृतिसिद्धत्वा
त् प्रकृतिसंयोगस्योभयोरिति एतच्च योगवार्त्तिके प्रपंचितमस्माभिः अपरस्तु भोग्यभोक्तृयोग्यतैवानयोः संयोग
इत्याह तदपि न योग्यताया नित्यत्वे ज्ञाननिवर्त्यत्वानुपपत्तेः अनित्यत्वे किमपराद्धं संयोगेन परिणामित्वापत्तेः समान
त्वात् भोग्यभोक्तृयोग्यतायाः संयोगरूपत्वस्य सूत्रादिष्वनुक्तत्वेनाप्रामाणिकत्वाच्चेति तस्मात् संयोगविशेष एवात्र बं
धाख्यहेयहेतुर्यथास्त्रकाराभिप्रेता इति स्वयं बंधहेतुरवधारितः इदानीं नास्तिकाभिप्रेता अपि बंधहेतवो निराक
र्त्तव्याः तत्र षडभिज्ञो दशबलोऽद्वयवादी विनायकः इत्यनुशासनाद्द्विसिद्धाः क्षणिकविज्ञानाद्वैतवादिनो बौद्ध
भेदा एवमाहुः नास्ति प्रकृत्यादिकं वा संवस्तु येन तत्संयोगादेरौपाधिकस्तात्त्विको वा बंधः स्यात् किंतु क्षणिकवि
ज्ञानसंतानमात्रमद्वितीयं तत्त्वं अन्यत्सर्वं सांवृतिकं संवृतिश्चाविद्या मिथ्याज्ञानात्स्यात्तत एव बंध इति तथाच
तैरुक्तं अभिन्नोपि हि बुध्यात्मा विपर्यासितदर्शनैः ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते इति तन्मतमादौ निराक्रिय
ते नाविद्यातोपि अवस्तुना बंधायोगात् अपिशब्दः प्रत्येककारणापेक्षया अविद्यातोपि न साक्षात् बंधयोगः अद्वैतवा
दिनां तेषामविद्याया अप्यवस्तुत्वेन तया बंधानौचित्यात् न हि स्वाप्नरज्ज्वा बंधनं दृष्टमित्यर्थः बंधोप्यवास्तव इति चेन्नस्य
सूत्रकारेण निराकरिष्यमाणत्वात् विज्ञानाद्वैतश्रवणात्तरं बंधनिरूपणे योगाभ्यासाभ्युपगमविरोधाच्च बंधमिथ्यात्वे श्र
वणेन बंधनिवृत्त्याख्यफलसिद्धेरतन्निश्चयात् तदर्थं बह्वायाससाध्ययोगानुष्ठानासंभवादिति वस्तुत्वे तन्निवृत्तौ हानिः २११

८

17
1990

भावे विनस्यति यश्च विनाशी स मिथ्या स्वप्नवत् अतः सर्वस्य नामार्थत्वयोरभावमात्रत्वात् मध्ये क्षणिकसत्त्वं सांवृतिकं
न पारमार्थिकं बंधादि ततः किं केन बध्यस्यात्राशयः भावानां विनाशित्वे हेतुर्यत्क धर्मत्वादि नाशस्येति विनाशस्य वस्तु
स्वभावत्वात् स्वभावं तु विहाय न पदार्थस्तिष्ठतीत्यर्थः परिहरति अपवादमात्रमबुद्धानां ३७ भावत्वादिनाशि
त्वमिति मूढानामपवादमात्रं मिथ्यावाद एव नाशकारणाभावो नस्ययं च निरवयवद्रव्याणां नाशासंभवात् कार्याणामपि
विनाशासिद्धेः घटो जीर्ण इति प्रत्ययवदेव घटोतीत इत्यादिप्रतीतिसाधारणादेरतीतानागतावस्थाया एव सिद्धेः अभ्यु
पगतायाश्च कार्यतत्त्वानभ्युपगमे प्रत्यभिज्ञानप्रवेश एव किंच विनाशस्य प्रपंचतत्त्वताभ्युपगमेपि विनाशा एव बंधस्य पुरुषार्थः
संभवतो वेति कश्चिन्त्वाचष्टे त्वत्यन्तत्वमिति मूढानां कुत्सितवादमात्रं न पुनरत्र युक्तिरस्ति प्रमाणसत्त्वासत्त्वविकल्पास
हत्वात् तत्र प्रमाणांगीकारे तेनैव तत्त्वतास्सिद्धिः अनंगीकारे प्रमाणाभावाच्च तत्त्वसिद्धिः तत्तत्सिद्धौ च चिद्रूपतायाप
त्तिरित्यर्थः इति न निरोधो न चोत्पत्तिर्न बंधो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता सर्वं शून्यं निरालंबं स्वरूपं यत्र चिं
त्यते अभावयोग संप्रोक्तो येनात्मानं च प्रपश्यति इति श्रुतिस्मृतिभ्यामपि शून्यतत्त्वतया प्रतिपाद्यत इति वाच्यं पुरुषाणां
निरोधाद्यभावस्यैव तादृशश्रुतिषु तत्त्वत्वेनोक्तत्वात् प्रत्येकतरवाक्याभ्यां पुरुषस्यैव प्रकरणात् विलीनविश्वचिदाकाश
स्यैव तादृशस्मृतिषु तत्त्वत्वप्रतिपादनाच्च अत्रैकोवं गगनाकारं नभस्तुल्यं च पुः स्वकं विपत्तिगामि मनोध्यायन् योगी त्वे
वगीयत इत्यादिवाक्यांतरैकवाक्यत्वात् आकाशशून्ययोः पर्यायत्वादिति मनोमहत्त्वाद्युत्क्रान्तकरणं च वियन्नगामि
चिदाकाशे लीनं दृष्टान्तरमाह उभयपक्षसमानक्षेमत्वादयमपि ३८ क्षणिकबाह्यविज्ञानोभयपक्षयोः समानक्षेमत्वा
तुल्यनिरसनहेतुकत्वादयमपि पक्षो विनश्यतीत्यनुषंगः क्षणिकपक्षनिरासहेतुर्हि प्रत्यभिज्ञानुपपत्त्यादिः शून्यवादेपि स
मानः तथा विज्ञानपक्षनिरासहेतुर्हि प्रतीत्यादिरप्यत्र समान इत्यर्थः यदपि दुःखनिवृत्तिरूपतया तत्साधनतया च श

सां॰ भा॰ न्यनैवास्तु पुरुषार्थ इति नैर्मन्यनेन तदपि दुर्घटमित्यादि अपुरुषार्थत्वमुभयथा ३९ उभयथा स्वतःपरतश्च उत्पत्ता
११ याः पुरुषार्थत्वं न संभवति नित्यनिष्टत्वेनैव सुखादीनां पुरुषत्वार्थत्वात् स्थिरस्य च पुरुषस्यानभ्युपगमादित्यर्थः नतदेवं
बंधकारणविषये नास्तिकमतानि निरूपितानि इदानीं पूर्वनिरस्तावशिष्टान्यास्तिकसंभाव्यान्यप्यन्यानि बंधकारणा
नि निरस्यंते न गतिविशेषात् ४० अकरणात् नु बंधो लभ्यते न गतिविशेषात् शरीरप्रवेशादिरूपादपि पुरुषस्य बंध इत्य
र्थः अत्र हेतुमाह निष्क्रियस्य तदसंभवात् ४१ निष्क्रीयस्य विभोः पुरुषस्य गत्यसंभवादित्यर्थः ननु श्रुतिस्मृत्योरिहलो
कगमनागमनश्रवणात्पुरुषस्य परिच्छिन्नत्वमेवास्तु तथा च श्रुतिरपि अंगुष्ठमात्रः पुरुषोंतरात्मेत्याशंक्याशंकरोति
नेत्याश्र घटादिवत्समानधर्मापत्तावपसिद्धांतः ४२ यथा च घटादिवत्समानत्वेतः परिच्छिन्नः स्यात्क्रियते तदा सावयवत्व
विनाशित्वादिना घटादिसमानधर्मापत्तावपसिद्धांतः स्यादित्यर्थः गतिश्रुतिमुपपादयति गतिश्रुतिरप्युपाधियोगादाका
शवत् ४३ या च गतिश्रुतिरपि पुरुषेस्ति सा विभुत्वश्रुतिस्मृतियुक्त्यनुरोधेनाकाशस्येवोपाधियोगाद्वमंतव्येत्यर्थः
नद्यवयमानं घटसंघ्रनमाकाशं नीयमाने घटे यथा घटो नियते नाकाशं तद्वज्जीवो नभोपमः बुद्धेर्गुणेनात्मगुणेन चैव आ
राग्रमात्रो ह्यवरोपि दृष्ट इत्यादिश्रुतिः नित्यः सर्वगतः स्थाणुरित्यादिवत्स्मृतिः मध्यमपरिमाणत्वे सावयवत्वाद्विनाशित्वं
अणुत्वे च देहव्याप्तिज्ञानाद्यनुपपत्तिरित्यादिश्च युक्तिरिति अतएव प्रकृतिः कुरुते कर्म शुभाशुभफलात्मकं प्रकृति
श्चतरश्नाति त्रिषु लोकेषु कामगा इत्यादिस्मृतिभिः प्रकृतेरेव विशिष्य क्रियारूपा गतिः स्मर्यत इति न कर्मणाप्यतद्धर्म
त्वात् ४३ कर्मणा अदृष्टेनापि साक्षात्न पुरुषस्य बंधः कुतः पुरुषधर्मत्वाभावादित्यर्थः पूर्वविहितनिषिद्धव्यापाररूपे
ण कर्मणा बंधो निराकृतः अधुना तत्जन्यादृष्टेनेति आर्थिकविभागादपौनरुक्त्यं नन्वन्यधर्मेणाप्यदृष्टेनान्यस्य बंधः स्या ११
त्तत्राह अतिप्रसक्तिरन्यधर्मत्वे ४४ बंधनकारणयोर्भिन्नधर्मत्वे अतिप्रसक्तिः मुक्तस्यापि बंधापत्तिरित्यर्थः किंच कृता

19/1990

स्वभावादिकर्मांतेरेरन्यतवाक्येनापि पुरुषस्य बंधो यतिर्न घटते श्रुतिविरोधादिति साधारणं बाधकमाह निर्गुणादिश्रु
तिविरोधश्चेति पुरुषबंधस्यानौपाधिकत्वे साक्षीचेता केवलो निर्गुणश्चेत्यादिश्रुतिविरोधश्चेत्यर्थः इतिशब्दो बंध
हेतुपरीक्षासमाप्तौ नतदेवं न स्वभावतो बद्धस्येत्यादिना प्रघट्टकेनेतरप्रतिषेधतः प्रकृतिपुरुषसंयोग एव साक्षाद्बंधहेतुर इंथ
वधारितस्तत्रेयमाशंका ननु प्रकृतिसंयोगोपि पुरुषे स्वाभाविकत्वादि विकल्पग्रस्तः कथं न भवति संयोगस्य स्वाभावि
कत्वकालादिनिमित्तकत्वे हि मुक्तस्यापि बंधापत्तिरित्यादिदोषाय यथायोग्यं समानाएवेति तामिमां शंकां परिहरति तद्यो
गोप्यविवेकान्न समानत्वं प्रयोक्तः तद्योगोपि पुरुषस्याविवेकात् वक्ष्यमाणादविवेकादेव हि निमित्तात् संयोगो भवति अ
तो नोक्तदोषाणां समानत्वमुदितइत्यर्थः सत्याविवेको मुक्तेषु नास्तीति न तेषां पुनः संयोगो भवतीति ननु अविवेको नाम प्र
कृतिपुरुषान्तेरसाक्षात्कारः संयोगात् प्रागसत्वात्किं तु विवेकप्रागभावो अविविक्तस्य ज्ञानवासनावात् उभयमपि न पुरु
षधर्मः किं तु बुद्धिधर्म एवेत्यन्यधर्मेणान्यत्र संयोगे अतिप्रसंगदोषसाम्यमस्त्येवेति क्रियन्तदर्शिनवतोस्य इति दर्शनार्थी चेत्
मेवं विपयतासंबंधेनाविवेकस्य पुरुषधर्मत्वात् तथा च प्रकृतिर्बुद्धिरूपा सतीयस्य स्वामिपुरुषायतनेन विविच्य न दर्शितव
तीत्यस्य निदर्शनार्थं तदीयबुद्धिरूपेण तत्रैव पुरुषे संयुज्यत इति अन्यत्रख्यातिप्रसंगाभावात् न तु तं कारिकायां पुरुषस्य दर्श
नार्थं कैवल्यार्थं प्रधानस्य पंग्वंधवदुभयोरपि संयोगस्तत्कृतः सर्ग इति स्वामिना पुरुषप्रधानेदर्शयितुं तयोः कैवल्यार्थं चेत्यर्थः
अविवेकस्य यन्निरूपत्वं तु वाध्याने न तु न त्वं चित्तस्थितेरित्यागामिसूत्रेष्वव स्थांवस्यामः अविवेकश्च संयोगद्वारेण बंधकार
णं प्रलये चाधारा नात अविवेकनाशोपि जीवन्मुक्तस्य दुःखभोगदर्शनाच्च अतः साक्षादेवाविवेको बंधकारणं प्राग्नोक्त
ननु नागपभोग्यभंगनियमकत्वेन कृतस्यानादिस्वस्वामिभावस्य कर्मादीनां वा संयोगहेतुत्वमस्तु किमित्यविवेकोपि संयोगहे
तुरिष्यत इति चेत् पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान् गुणान् कारणं गुणसंयोगोस्य सदसद्योनिजन्मसु इति गीतायां

सां॰ भा॰ संगाख्याभिमानस्य संयोगहेतुत्वस्मरणात् वक्ष्यमाणादियुक्तिभ्यश्च अन्यथाज्ञानतो मोक्षस्य श्रुतिस्मृ-
१२ तिसिद्धस्यानुपपत्तेश्च अथ वसंतिस्त्वौपाधिकमादिकमपि संयोगकारणं भवति तद्विहाय कथमविवेक एव केव-
लं तत्र कारणं मुख्यत इति उच्यते अविवेकापेक्षया कर्मादीनामपि परंपरयैव पुरुषसंबंधः तथाऽविवेक एव पुरु-
षेण साक्षाच्छेत्तुं शक्यते कर्मादिकं तु विवेकाख्यहेतूच्छेदद्वारैव साध्यं नाविवेक एव मुख्यतः संयोगहेतुतयोक्त इति
अयं चाविवेको ऽगृहीतासंसर्गकमुभयज्ञानं अविद्यारूढाभिषिक्त एव विवक्षितः विपर्ययानुबंधः विपर्ययभे-
दाः पंच इत्यागामिसूत्रे हेतुत्वात् तस्य हेतुरविद्येति योगसूत्रेऽप्यविद्याया एव पंचपर्वाया बुद्धिपुरुषसंयोगहेतुतावच-
नाच्च अन्यथाख्यात्यभ्युपगममात्र एव योगतो न विपर्ययो विस्तारः पुनरविवेको ऽभावमात्रं विवेकप्रागभावो वा तु
क्तस्यापि बंधापत्तेः जीवन्मुक्तस्यापि भाविविवेकव्यक्तिप्रागभावेन धर्माधर्मोत्पत्तिद्वारा पुनर्बंधप्रसंगाच्च तथागामि-
न्यत्र ध्वांतदृष्टांतानुपपत्तेश्च अभावस्य ध्वांतवदावरकत्वासंभवात् तथा दृष्टिरूसावपि अविवेकस्य श्रूयमाणौ
नोपपद्येयातामिति अस्मन्मते च यथा सा नानारूपस्यैवाविवेकस्य संयोगाख्यजन्महेतुतया न मोचहावत् कृत्वा दृष्टिन्हा-
सादिकं भजते सोपपद्यते न तस्य हेतुरविद्येति पातंजलसूत्रे च भाष्यकारैरविद्याशब्देनाविद्यावासनैव व्याख्याताभि-
नस्य संयोगोत्तरकालीनत्वेन संयोगाजनकत्वादिति अपि च पुरुषः प्रकृतिस्थो हि भुंक्ते इत्यादिवाक्येषु अभिमाना-
त्मसंगस्यैव प्रकृतिस्थतारव्यसंयोगहेतुतावगम्यते आत एव चाविद्यमानाभावोऽपि न विद्याविरोधि ज्ञानांतरमिति
योगभाष्ये व्यासदेवैः प्रयत्नेन व्यवस्थापितं तस्मादविवेकाविषयो सत्यसंयोगश्चेमतया अविवेकस्यापि ज्ञानविशेषत्वमि- १२
ति सिद्धं अयं चाविवेकस्त्रिधा संयोगाख्यजन्महेतुः साक्षाद्धर्माधर्मोत्पत्तिद्वारा रागादिद्वेषद्वारा च भवति सति मूले
तद्विपाक इति योगसूत्रात्कर्तास्मीति निबध्यत इति स्मृतेः वीतरागजन्मादर्शनादिति न्यायसूत्राच्चेत्युक्तं मोक्षध

२१ यदि चाविद्याया वस्तुत्वं स्वीक्रियते तदा स्वाभ्युपगतस्याविद्यातुच्छत्वस्य हानिरित्यर्थः विजातीयद्वैतापत्तिश्च २२
किं चाविद्याया वस्तुत्वे क्षणिकविज्ञानसंतानाद्विजातीयद्वैतं प्रसज्येत तच्च भवतामनिष्टमित्यर्थः संतानांतःपातिव्यक्ती-
नां आनंत्यात्सजातीयद्वैतमिष्यत एवेत्याशयेन विजातीयेति विशेषणं ननु अविद्याया अपि ज्ञानविशेषत्वात् अवि-
द्ययापि कथं विजातीयद्वैतमिति चेन्न ज्ञानरूपाविद्याया बंधोत्तरकालीनतया वासनारूपाविद्याया एव तेषां बंधहेतुत्वा-
भ्युपगमात् वासनायाश्च ज्ञानविजातीयत्वात् एभिश्च सूत्रैर्ब्रह्ममीमांसासिद्धांतो निराक्रियत इति भ्रमो न कर्तव्यः ब्रह्ममीमां-
सायां केनापि सूत्रेणाविद्यामात्रतो बंधस्यानुक्तत्वात् अविभागो वचनादित्यादिसूत्रैर्ब्रह्ममीमांसायाः अभिप्रेतस्याविभा-
गलक्षणाद्वैतस्य अविद्यादिवादत्वेऽप्यविरोधाच्च यत्तु वेदांतिब्रुवाणामाधुनिकस्य मायावादस्यात्र लिंगं दृश्यते तत्तेषा-
मपि विज्ञानवादैकदेशितयापयुक्तमेव मायावादमसच्छास्त्रं प्रच्छन्नबौद्धमेव च मयैव कथितं देवि कलौ ब्राह्मणरूपिणेत्या-
दिपद्मपुराणस्य शिववाक्यपरंपराभ्यः ननु तद्वेदांतमते वेदार्थत्वमहाशास्त्रं मायावादमवैदिकमिति तु व्यशेषादिति
मायावादिनो तत्र साक्षादविद्यादित्वं विजातीयेति विशेषणवैयर्थ्यात् । मायावादे सजातीयद्वैतस्याप्यनभ्युपगमादि-
ति तस्मादत्र प्रकरणे विज्ञानवादिनां बंधहेतुत्ववचनं साक्षान्निराक्रियते अनयैव च रीत्या नास्तिकानामपि प्रच्छन्नबौद्ध-
नां मायावादिनामविद्यामात्रस्य तु परत्वं निराकृतं वेदितव्यं अस्मन्मते त्वविद्यायाः कूटस्थनित्यतारूपपारमार्थिकस-
त्त्वाभावेऽपि घटादिवत्सत्त्वेन वक्ष्यमाणसंयोगद्वारा बंधहेतुत्वे यथोक्तबाधकानवकाशः एवं योगमतेऽब्रह्ममीमांसा-
मतेऽपीतिशंकते विरुद्धोभयरूपा चेत् २३ ननु विरुद्धं यदुभयं सदसच्च सद्विलक्षणमसद्विलक्षणं वा तद्रूपैवाविद्या-
स्त्या अतो न तया पारमार्थिकाद्वैतभंग इति चेदित्यर्थः अयं तु सदसत्त्वं प्रपंचस्य यद्वक्ष्यति तत्र सत्त्वासत्त्वे व्यक्ता-
व्यक्तत्वरूपतया विरुद्धे एव न भवत इति स्वयितुं विरुद्धपदोपादानं प्रतिहरति न तादृक्पदार्थाप्रतीतेः २४ सुगमं

21/1990

६ सदसदात्मकस्यपदार्थस्य संग्रहो भवद्भिर्न मान्याच्छिषा। नांतसम्भवति। अन्यथा बाध्यादुःकस्यात्प्ययौगिकस्य ×

सां॰भा॰ २ पिच आविद्यावाः साक्षादेवदुःखयोगाख्यबंधहेतुत्वे ज्ञाने नाविद्याक्षयानंतरं प्रारब्धभोगानुपपत्तिः बंधपर्यायस्य
दुःखभोगस्य कारणनाशादिति अस्मदादिमते तु नायं दोषः संयोगद्वारैवाविद्याकर्मादीनां बंधहेतुत्वात् जन्मारब्धस्य
संयोगः प्रारब्धसमाप्तिं विना न नश्यतीति पुनः कैशांते न वयं षट्पदार्थवादिनो वैशेषिकादिवत् नत्वेवैशेषिकाद्या १२४॥
वास्ति कथं न यं षट् षोडशादिनियतपदार्थवादिनः अतोऽप्रतीतोऽपि सदसदात्मकः सदसद्विलक्षणो वा पदार्थोऽवि
चारेणाभ्युपेयमिति भावः परिहरति अनियतत्वेपि नायौक्तिकस्य संग्रहोऽन्यथा बालोन्मत्तादिसमत्वं २५ पदार्थनियमो मा
स्तु तथापि भावाभावविरोधेन युक्तिविरुद्धस्यास्य संग्रहः स्यादित्यर्थः शुक्त्यादिकं चास्मिन्नर्थे स्फुटं नास्ति युक्तिविरोधेन च संदि
ग्धत्वेनेत्यर्थान्तरसिद्धिरिति भावः नासद्रूपा न सद्रूपा माया नैवोभयात्मिका सदसद्भ्यामनिर्वाच्या मिथ्याभूता सनातनी
त्यादि सौरादिवाक्यानां त्वयमर्थः विकारजननीं मायामष्टरूपामजां ध्रुवामित्यादिश्रुतिसिद्धा मायाख्या प्रकृतिः परमा
र्थसती न भवति पूर्वपूर्वविकाररूपैः प्रतिक्षणमपायात् नापि परमार्थासती भवतीत्यर्थक्रियाकारित्वेन शशशृं
गविलक्षणत्वात् नापि तदुभयात्मिका विरोधात् अतः सदसद्भ्यामनिर्वाच्यासत्यैवेति चेति अनिर्धार्यापरैस्तु मत
व्या किं तु मिथ्याभूता लयाख्यव्यावहारिकासत्त्ववती परिणामनित्यतारूपव्यावहारिकसत्त्ववती चेति एतच्चाग्रे
प्रपंचयिष्याम इति दिक् एतत्प्रकरणोपन्यस्तानि च सर्वाणि दूषणानि आयुधानि केपि मायावादे योजनीयानि अपरे
नास्तिका आहुः क्षणिका बाह्यविषयाः संति तेषां वासनया जीवस्य बंध इति तदपि दूषयति नानादिविषयोपरागनि
मित्तकोप्यस्य २७ अस्यात्मनः प्रवाहरूपेणानादीर्यो विषयवासना तन्निमित्तकोपि बंधो न संभवतीत्यर्थः निमित्तको १
प्यस्येति पाटस्तु समीचीनः अत्र हेतुमाह नबाह्याभ्यंतरयोरुपरंज्योपरंजकभावोपि देशव्यवधानात् स्रुघ्नस्थपाटलि
पुत्रस्थयोरिव २८ नन्वंते परिच्छिन्नो देहांतस्थ एवात्मा तस्याभ्यंतरस्य न बाह्यविषयेण सहोपरंज्योपरंजकभावोपि संभ

23/1990

वति कुतः स्रुघ्नस्थपाटलिपुत्रस्थयोरिव देशव्यवधानादित्यर्थः संयोग एव वासनाख्य उपरागो दृष्टः यथा मंजि
ष्ठावस्त्रयोः यथा वा पुष्पस्फटिकयोरिति अपिशब्देन समत्वेपि संगाभावादिः समुच्चीयते स्रुघ्नपाटलिपुत्रौ तु देश
विशेषौ ननु भवता सिद्धिवाणामिवास्माकमात्मनो विषयदेशगमनाद्विषयसंयोगेन विषयोपरागो वक्तव्यस्तत्राह द्व
योरेकदेशलब्धोपरागान्न व्यवस्था २९ द्वयोर्बद्धमुक्तात्मनोरेकस्मिन्विषयदेशे लब्धाद्विषयोपरागात् न
बंधमोक्षव्यवस्था स्यात् मुक्तस्यापि बंधापत्तिरित्यर्थः अत्र शंक॰ नेऽदृष्टवशाच्चेत् ३० नन्वेकदेशसंबंधेन वि
षयसंभोगसाम्येप्यदृष्टवशादेवोपरागलाभ इति चेदित्यर्थः परिहरति न द्वयोरेककालायोगादुपकार्योपकार
कभावः ३१ क्षणिकत्वाभ्युपगमात् द्वयोः कर्तृभोक्त्रोरेककालत्वे नोपकार्योपकारकभावः न कर्तृनिष्ठादृष्टाद्भोक्तृ
निष्ठो विषयोपरागः संभवतीत्यर्थः शंकते पुत्रकर्मवदिति चेत् ३२ नयोर्विरुद्धकालतया अन्वयव्यतिरेकव्यभिचा
राभ्यां न कार्यकारणभावसिद्धिरिति ननु निमित्तकारणस्यैवोपादानकरणस्यापि पूर्वभावमात्रेणैव कारणतास्तु तत्राह
पूर्वभावमात्रेण कारणतास्तु तत्राह पूर्वभावमात्रे न नियमः ३३ पूर्वभावमात्राभ्युपगमे चेदमेवोपादानमिति नियमो न
स्यात् निमित्तकारणानामपि पूर्वभावाविशेषात् उपादाननिमित्तयोर्विभागः सर्वतः प्रसिद्ध इत्यर्थः अपरे तु नास्तिका आ
हुः विज्ञानातिरिक्तस्याभावेन न बंधोपि स्वप्नपदार्थवत् अतोऽस्य न मिथ्यात्वेन तत्र कारणमस्तीति तन्मतमपाकरोति
न विज्ञानमात्रं बाह्यप्रतीतेः ३४ न विज्ञानमात्रं तत्त्वं बाह्यार्थानामपि विज्ञानवत् प्रतीतिसिद्धत्वादित्यर्थः ननु स्ताध
तर्केण स्वप्नादिदृष्टांतेन दृश्यत्वहेतुकमिथ्यात्वानुमानेन बाह्यवस्तुत्वं तु भावो बाधनीयः अत्र च भवतां श्रुतिस्मृती अपि स्तः
विद्धं सर्वं तस्माद्विज्ञानमेवास्ति न प्रपंचो न संसृतिरित्यादि इत्यतो दूषणांतरमाह तदभावे तदभावाच्छून्यं तर्हि ३५ त
र्हि बाह्याभावे शून्यमेव प्रसक्तं न तु विज्ञानमपि कुतः तदभावे तदभावात् बाह्याभावे विज्ञानस्याप्यभावप्रसंगात् विज्ञान

प्रतीतेरपि बाह्यप्रतीतिवद्वस्तुविषयत्वानुमानसंभवात् ज्ञानप्रामाण्यस्य क्वाप्यसिद्धत्वाच्च तथा विज्ञाने प्रमाणा
नामपि बाह्यत्वापत्त्यापाश्चेत्यर्थः नन्व नु भवेकस्यापि विवादाभावेन नास्ति न च प्रमाणापेक्षेति चेन्न द्वयवादिनामेव
तत्र विवादात् विज्ञानप्रतीति अवस्तुविषयिणी अथासत्तामपि प्रमाणेन वस्तु सिध्यति विषयाबाधस्यैव प्रामाण्यप्रयो
जकत्वात् ननु प्रमाणं पारमार्थिकत्वस्येति चेन्न एवं सति असत्प्रमाणस्य सर्वत्र सुलभत्वेन काप्यर्थे प्रमाणान्वेषणस्या
योगात् अथास्त्वन्यथेपि व्यावहारिकसत्तारोपो विशेषः प्रमाणादिष्वेष्टव्य इति चेत् आपातमार्गेण किं पुनरिदं व्यावहा
रिकत्वं यदि परिणामित्वं तदास्माभिरपि इष्टमेव सत्त्वं बाह्यग्राहकप्रमाणेन इदं शुक्तिरजतादितुल्यत्वस्यैव प्रपंचेऽस्माभिः
प्रतिषेधात् यदि पुनः प्रतीयमानतामात्रं तदापि नाद्वैरवप्रमाणैर्बाह्यार्थस्यापि सिद्धिप्रसंगात् लाघवतर्कोनुगृही
तेन यथाकथंचिदनुमानेन बाधस्तु विज्ञानेपि समान इति एतेनाधुनिकानां वेदान्तिब्रुवाणामपि मतं विज्ञानवादतुल्ययो
गक्षेमतया निरस्तं विज्ञानमात्रसत्ताप्रतिपादकश्रुतिस्मृतयस्तु कूटस्थत्वरूपां पारमार्थिकसत्तामेव बाह्यानां
प्रतिषेधंति न तु परिणामित्वरूपां व्यावहारिकसत्तां प्रकृत्यंतरेणापि नान्यसंज्ञामुपैति वै परिणामादिसंभूतां
तद्वस्तु नृप तच्च किं वसुराजेति यल्लोके यच्च राजभटादिकं तथान्यच्च नृपेत्थं तु न सत् संकल्पनामयमिति विष्णुपु
राणादिभ्यः परिणामित्वस्यैवासत्तात्वावगमादिति संकल्पनामयं ईश्वरादिसंकल्परचितं एतेन विज्ञानमयमेवेतद
शेषमवगच्छेत्यादिना विष्णुपुराणे मायामोहरूपेण विष्णुनाऽसुरेभ्योपि तत्त्वमेवोपदिष्टं तत्तु अनधिकारादिदोषे
विपरीतार्थग्रहणेन विज्ञानवादिनो नास्तिकाः बभूवुरित्यवगंतव्यं तेभ्यो नरैस्तु सर्वं अस्मन्मीमांसाभाष्ये मायावादनिर १०
सनप्रसंगतो विस्तारितमस्माभिः नन्वेवं भवतु शून्यमेव तत्त्वं तदा सुतरामेव बंधकारणान्वेषणं न युक्तं तुच्छत्वादिति ना
स्तिकशिरोमणिः प्रत्यवतिष्ठते शून्यं तत्त्वं भावो विनश्यति वस्तुधर्मत्वाद्विनाशस्य ३६ शून्यमेव तत्त्वं यतः सर्वोपि

मेपि ज्ञानेंद्रियाणि इंद्रियार्थाश्चापसर्पस्यंतर्बलं हीनश्च कारणैर्हीनदेहं पुनरर्हति तस्मात्पर्यात्मकात् नागादि
आज्ञायंति जंतव इति रागस्तु अविवेककार्य इति योगसूत्राभ्यामप्येतदस्येत्यक्षेयं समानतंत्रन्यायात् तत्र स
त्रद्वयं क्लेशमूलः कर्माशयः सति मूले तद्विपाको जात्यायुर्भोगा इति क्लेशाश्चाविद्यादिपंचकमिति अविवेक
स्य बंधजनने द्वारं ज्ञानं चापि इंद्रिकस्येश्वरगीतायामुक्तं अनात्मन्यात्मविज्ञानं तस्माद्दुःखं तथेतरत् रागद्वेषा
दयो दोषाः सर्वे भ्रांतिनिबंधनाः कर्मास्य भवेद्दोषः पुण्यापुण्यमिति श्रुतिः तद्वशादेव सर्वेषां सर्वदेहसमु
द्भव इति देवन्यायेऽसूत्रितं दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनंतराभावादपवर्ग इ
ति तरं चं संयोगाख्यजन्मद्वारा बंधाख्यहेयस्य मूलकारणं अविवेक इति हेयहेतुव्यूहः प्रतिपादितः इदानीं
क्रमप्राप्तं हानोपायव्यूहमति विस्तरेणाशास्त्रसमाप्तिपर्यंतं प्रतिपादयति अंतराचेत् व्यूहानपि विस्तार यि
ष्यति नियतकारणात् तदुच्छित्तिर्ध्वांतवत् ५७ शुक्तिरजतादिरूपस्य लोकसिद्धं यन्नियतकारणं विवेक
साक्षात्कारः तस्मात्तस्याविवेकस्योच्छित्तिर्भवति ध्वांतवत् यथा ध्वांतमालोकादेर्नियतकारणाच्च उपत्तिर्नोपा
यांतरेण तथैवाविवेकोऽपि विवेकादेव उच्छत्ति न तु कर्मादिभ्यः साक्षादित्यर्थः तदेतदुक्तं योगसूत्रेण विवे
कख्यातिरविप्लवा हानोपाय इति कर्मादीनि तु ज्ञानस्यैव साधनानि योगांगानुष्ठानादशुद्धिक्षये ज्ञान
दीप्तिराविवेकख्यातेरिति योगसूत्रेण सत्त्वशुद्धिद्वारा ज्ञान एव योगांगांतर्गतसर्वकर्मणां ज्ञानसाधनत्वावा
धारणादिति प्राचीनास्तु वेदांतिनो मोक्षेपि कर्मणो ज्ञानांगत्वमाहुः विद्यां चाविद्यां च यस्तद्वेदोभयं सह अ
विद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इति श्रुतौ सहकारित्वेन चेतिवदेत सूत्रे चांगांगिभावेन ज्ञानकर्मणोः
सहकारित्वावधारणात् ज्ञानिना ज्ञानिना वापि यावद्देहस्य धारणं तावद्वर्णाश्रमप्रोक्तं कर्तव्यं कर्म मुक्तये इत्या

दित्यस्मिन्नेवार्थ उपमर्दे चेति वैशेषिकसूत्रेण तु कर्मत्यागो योगारूढस्य न्याय्यप्राप्तो नत्वत एव ज्ञानस्य मुक्त्यन्तो मोक्षहे
तुत्वं व्यवस्थापयितुं यदि हि विक्षेपकत्वात्कर्मज्ञानाभ्यासविरोधि भवेत्तदा गुणलोपेन गुणिन इति न्यायेन प्रथा
नरक्षार्थमंगभूतं कर्मैव त्याज्यं जडभरतादिवदित्याशयादिति तथा मतेपि विवेकद्वारतां विना अविवेकनाश
कत्वं कर्मणा नैव सिध्यतीति न तद्विरोधः अत्र सूत्रे ध्वान्तस्यालोकनाश्यत्ववचनात्तमोपि द्रव्यमेव नत्वालोका
भावः असति बाधके नीलं तम इत्यादिप्रत्ययानां भ्रमत्वानौचित्याच्च न च कॢप्तेनैवोपपत्तावतिरिक्तकल्पना
गौरवमेव बाधकमिति वाच्यं एवं सति विज्ञानमात्रेणैव सर्वप्रपञ्चसर्वव्यवहारोपपत्तावतिरिक्तकल्पनागौर
वेण बाह्यार्थप्रतीतेरपि बाधापत्तेः तस्मादप्रामाणिकत्वात् गौरवं न दोषायेति ननु विवेकज्ञानं विनापि
अविवेकाख्यज्ञानस्य क्षणिकत्वात् स्वस्य तृतीयक्षणे स्वरूपं विनाशात् ज्ञानस्य तन्नाशकत्वं किमर्थमिष्यत इति चेन्न
अविवेकशब्देन तद्वासनाया एव पूर्वसूत्रे व्याख्यातत्वात् अनागतावस्थस्याप्यविवेकस्यास्मन्मते नाशसंभवा
च्चेति ननु प्रकृतिपुरुषाविवेक एव चेत्संयोगद्वारा बंधहेतुः तयोर्विवेक एव च मोक्षहेतुस्तर्हि देहाद्यभिमानसत्वे
पि मोक्षः स्यात् तच्च श्रुतिस्मृतिन्यायविरुद्धमित्यत आह प्रधानाविवेकादन्याविवेकस्य तद्धाने हानं ४८ पुरुषे प्र
धानाविवेकात्कारणाद्यो विवेको बुद्ध्याद्यविवेको जायते कार्याविवेकस्य कार्यतया अनादिकारणविवेकमूलक
त्वात् तस्य प्रधानाविवेकहाने सत्यवश्यं हानमित्यर्थः यथा शरीरकार्येषु रूपादिष्वविवेको न संभवति तथा कूट
स्थत्वादिधर्मैः प्रधानात्पुरुषे विविक्ते तत्कार्येषु परिणामादिधर्मकेषु बुद्ध्यादिष्वभिमानो नोत्थातुमुत्सहते न
तुल्ययाथाकारणनाशश्चेति भावः तदेतत्स्मर्यते चित्ताधारपदत्यागे सक्तं तस्य हि चित्तकं प्रकृतेर्विरमेत्तथ
ध्यापि तो कस्मादर्थः इति विरमो विरामः त्यागः आदिशब्देन दृश्यं रूपा अपि विकारा ग्राह्या इति यच्च बुद्धिपुरुषे
देवमात्र इत्यपि क्वचिदुक्तं तेन च स्थूलसूक्ष्मबुद्धिग्रहणात् प्रकृतेरपि ग्रहणं अन्यथा बुद्धिविवेकेपि प्रकृत्यभि ९३

27/1990

मानसंभवादिति ननु बुद्ध्याद्यभिमानातिरिक्ते प्रधानाभिमाने किं प्रमाणं अहमज्ञ इत्याद्यखिलाभिमानानां बु
द्ध्यादिविषयत्वेनैवोपपत्तेरिति चेन्न मृत्वा मृत्वा पुनः स्रष्टास्मि स्रष्टास्मीत्याद्यभिमानानां प्रधानवि
षयत्वं विनानुपपत्तेः अतीतानां बुद्ध्याद्यखिलकार्याणां पुनः स्रष्टृत्वाभावात् अथ तस्य विदमेव प्रलयोत्तरं जन्म
बुद्ध्यादिरूपैकपरिणामत्यागेनापरबुद्ध्यादिरूपतया परिणमनमिति तत्त्वात् निजन्मादिज्ञानमभिमान एव
न भवति पुरुषस्यापि लिंगशरीरसंयोगवियोगरूपयोर्जन्ममरणयोः पारमार्थिकत्वादिति वाच्यं न जायते म्रि
यते वा कदाचिन्नायं भूत्वा भविता वा न भूयः इत्यादिवाक्यैर्जन्मादिप्रतिषेधेनोत्पत्तिविनाशाभिमानरूपस्यात्मा
त्मनि जन्मादिज्ञानस्य सिद्धेः अप्रसक्तस्य प्रतिषेधायोगात् किंच बुद्ध्यादिषु पुरुषाणामभिमानो नादिर्वक्तुं न शक्य
ते बुद्ध्यादीनां कार्यत्वात् अतः कार्येष्वभिमानव्यवस्थार्थं नियामकाकांक्षायां करणाभिमान एव नियामकता
या सिध्यति लोके दृष्टत्वात् कल्पनायाश्च दृष्टानुसारित्वात् यथा लोके दृष्टः क्षेत्राभिमानात् क्षेत्रजन्यधान्या
द्यभिमानः सुवर्णाभिमानाच्च तज्जन्यकटकादिष्वभिमानः तयोर्निवृत्त्या च तयोर्निवृत्तिरिति प्रधानाभिमानत
द्वासनयोश्च बीजांकुरवदनादित्वात् अतस्तदभिमाने नियामकान्तरापेक्षेति एवं प्रतिपादिते चतुर्थे हि पुनरियमाशंका
ननु पुरुषस्य चेद्बंधमोक्षौ विवेकाविवेकौ च स्वाभाविकौ तर्हि नित्यशुद्धबुद्धमुक्तस्येति श्रुतिविरोधः तथा न निरो
धो न चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थतेत्यादिश्रुतिविरोधश्चेति तौ परिहरति वाङ्
मात्रं न तु तत्त्वं चित्तस्थितेः ४८ बंधादीनां सर्वेषां चित्त एवावस्थानात् तत्सर्वं पुरुषे वाङ्मात्रं शब्दमात्रं स्फटिक
लौहित्यवत् प्रतिबिंबमात्रत्वात् न तु तत्त्वं तस्येति भावः अनारोपितं तत्त्वं यालौहित्यवदित्यर्थः अतो नात्र विरोध इ
ति भावः समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीवेत्यादिश्रुतयस्तत्र प्रमाणं स पुरुषः समानो लोकयोरक

सां०भा०
२४

रूपद्वयाभ्यां नानारूपत्वस्यौपाधिकत्वमुक्तं तथा चोक्तबंधमोक्षौ सुखदुःखमोहापत्तिश्च मायया स्वप्नेयथात्म
नः स्याद्विसंसृतिर्न तु वास्तवीति मायया मायाख्यप्रकृत्यौपाधिकी त्यर्थः ननु एवं तुच्छस्य बंधस्य हानं कथं पुरुषा
र्थः कथं वान्यधर्माभ्यामविवेकविवेकाभ्यां अन्यस्य बंधमोक्षौ स्यातां कारे कर्मादिभिरिव नाव्यवस्थेति चेन्न अत्रोक्तप्राय
मपि पुनः प्रपंच्यते यद्यपि दुःखयोगाख्यरूपबंधो वृत्तिरूपौ च विवेकाविवेकौ चित्तस्यैव तथापि पुरुषे दुःखप्रति
बिंबरूपभोगाख्यवस्तुत्वेपि तद्धानं पुरुषार्थः दुःखं मा भुंजीयेति प्रार्थनादेवं यस्मै पुरुषाय प्रकृतिरविवेकेनात्म
नं दर्शितवती तद्धासनावशात् तमेव संयोगद्वारा बध्नाति नान्यं तथा यस्मै विवेकेनात्मानं दर्शितवती तमेव स्ववि
योगद्वारा मोचयति वासनोच्छेदादिति व्यवस्थापि घटत इति कर्मादिभिर्बंधाद्युपगमे त्वेवं व्यवस्था न घटते कर्मादी
नामसाक्षिभास्यत्वाभावेन साक्षात्पुरुषेष्वप्रतिबिंबनादिति ननु बंधादिकं चेत्पुरुषे वास्याभं तर्हि श्रवणेन युक्त्या वा
तस्य बाधोऽस्तु किमर्थं श्रुतिस्मृत्योः साक्षात्कारपर्यंतविवेकज्ञानमुपक्षिप्यते मोक्षहेतुतयेत्तित आह युक्तितो
पि न बाध्यते दिङ्मूढवदपरोक्षादृते ५० युक्तिर्मननं अपिशब्दः श्रवणसमुच्चयार्थः बंधाख्यमपि पुरुषस्य बंधा
दिकं श्रवणमननमात्रेण न बाध्यते साक्षात्कारं विना यथा दिङ्मूढस्य जनस्य भ्रान्तमपि दिग्वैपरीत्यं श्रवणयु
क्तिभ्यां न बाध्यते साक्षात्कारं विनेत्यर्थः प्रकृते चेदमेव बाध्यत्वं यत्पुरुषे बंधादिबुद्धिनिवृत्तिः न त्वभावः साक्षा
त्कारश्रवणादिना तदुत्पत्तिसंभावनार्थमप्यभावादिति अथ वेत्थं व्याख्येयं ननु नियतकारणात्तदुच्छित्तिरित्यत्रे
नाविवेकोनन्तानां किं श्रवणादिसाधारणमुत नास्ति कश्चिद्विशेष इत्याकांक्षायामाह युक्तितोपीत्यादिसूत्रं अ
विवेको युक्तितः श्रवणाच्च न बाध्यते नोच्छिद्यते विवेकापरोक्षं विना दिङ्मोहवदित्यर्थः साक्षात्कारिविशेषदर्श
नस्यैव विरोधित्वादिति तदेवं विवेकसाक्षात्कारान्मोक्षं प्रतिपाद्येतः परं विवेकः प्रतिपादनीयः तत्रादौ प्रकृतिपु
रुषादीनां विवेकतः सिद्धौ प्रमाणमुपन्यस्यते अचाक्षुषाणामनुमानेन बोधो धूमादिभिरिव वह्नेः अचाक्षुषा

२४

24/1790

णामनुमानेन बोधो धूमादिभिरिव वह्नेः अचाक्षुषाणामप्रत्यक्षाणां केषांचिद्वस्तुपदार्थानां स्थूलभूततत्कार्य
देहादयः प्रत्यक्षसिद्धास्तेषां प्रत्यक्षेणासिद्धानां प्रकृतिपुरुषादीनां आनुमानेन बोधः पुरुषनिष्ठफलसिद्धिर्भ
वति यथा धूमादिभिर्ज्वलितेनानुमानेन वह्नेः सिद्धिरित्यर्थः अनुमानासिद्धमप्यागमात् सिध्यतीत्यपि बोध्यं
अस्य शास्त्रस्यानुमानप्राधान्यात् केवलानुमानस्य मुख्यत्वेनत्वेनोपन्यासः तत्रागमस्यानपेक्षितत्वाच्च का
रिकासामान्यतस्तु दृष्टाददृष्टींद्रियाणां प्रतीतिरनुमानात् तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धमिति अ
नेन च सत्त्रेण इदं मननशास्त्रमिति सिद्धं गम्यते उक्तप्रमाणैः साध्यस्याविवेकस्य प्रतियोग्यनुयोगिपदार्थानां संग्र
हसूत्रं वक्ष्यमाणानुमानोपयोगि कार्यकारणभावमपि प्रदर्शयति सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः
प्रकृतेर्महान् महतोऽहंकारः अहंकारात् पंचतन्मात्राणि उभयमिंद्रियं तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पंचविं
शतिर्गणः सत्त्वादीनि द्रव्याणि न वैशेषिका गुणाः संयोगविभागवत्त्वात् लघुत्वचलत्वगुरुत्वादिधर्मकत्वाच्च ते
ष्वत्र शास्त्रे श्रुत्यादौ च गुणशब्दः पुरुषोपकरणत्वात् पुरुषपशुबंधकत्रिगुणात्मकमहदादिरज्जुनिर्मातृत्वाच्च प्रयु
ज्यते तेषां सत्त्वादिद्रव्याणां या साम्यावस्था अन्यूनानधिकभावेनासंहतावस्थेति यावत् अकार्यावस्थेति निष्कर्षः
अकार्यावस्थोपलक्षितं गुणसामान्यं प्रकृतिरित्यर्थः यथाश्रुते वैषम्यावस्थायां प्रकृतिनाशप्रसंगात् सत्त्वं
रजस्तम इति एषैव प्रकृतिर्महदादयोपि संसृतिर्गोत्रस्याः पारंपर्यं इत्यादिस्मृतिभिः गुणमात्रस्यैव प्रकृतित्ववच
नात् सत्त्वादीनामनुगमाय सामान्यमिति पुरुषव्यावर्तनाय गुणेति महदादिव्यावर्तनाय चोपलक्षितांतं महदादयो
पि हि कार्यसत्त्वादिरूपाः पुरुषोपकरणं तथा गुणाश्च भवंतीति तदत्र प्रकृतेः स्वरूपमेवोक्तं अस्या विशेषस्तु पश्चाद्वक्ष्य
ते प्रकृतेः कार्यं महान् महत्त्वं महदादीनां स्वरूपं विशेषश्च वक्ष्यते महतश्च कार्यो अहंकारः अहंकारस्य कार्यद्वयं त

सा·भा·
१५

न्मात्राणि उभयेन्द्रियं च मनः उभयमिन्द्रियं बाह्याभ्यंतरभेदेनैकादशविधं तन्मात्राणां कार्याणि पंच स्थूलभूतानि स्थूलश
ब्दात् तन्मात्राणां सूक्ष्मभूतत्वमभ्युपगतं पुरुषस्तु कार्यकारणविलक्षण इति इत्येवं पंचविंशतिर्गणः पदार्थव्यूहः एत
द्व्यतिरिक्तः पदार्थो नास्तीत्यर्थः अथ वा सत्त्वादीनां प्रत्येकं व्यक्तानां गुणशब्दो वेति अयं च पंचविंशतिको गणो द्रव्य
रूप एव धर्मधर्म्यभेदात्तु गुणकर्मसामान्यादीनां अत्रैवांतर्भावः एतन्त्रति दिक्पदार्थसत्त्वे हि तेपि पुरुषस्य विवेक
ख्यातयानतरसंग्रहानुपयोगेन एतेन सांख्यानां नियतपदार्थाभ्युपगम इति मूढप्रलापउपेक्षणीयः दिक्कालाव
काशमेव दिक्कालावाकाशादिभ्यः इत्यागामिसूत्रात् अत एव पदार्थाः परस्परप्रवेशाप्रवेशाभ्यां क्वचित्तंत्रे एकमेव क्व
चित् षट् क्वचित् षोडश क्वचिदसंख्यातं तत्र परिगणिते विशेषस्तु साधर्म्यवैधर्म्यमात्र इति मंतव्यं तथा चोक्तं भागवते ए
कस्मिन्नपि दृश्यंते प्रविष्टानीतराणि च पूर्वस्मिन्वा परस्मिन्वा तत्त्वे तत्त्वानि सर्वशः इति नानाप्रसंख्यानं तत्त्वानामृषि
भिः कृतं सर्वं न्याय्यं युक्तिमत्त्वाद्विदुषां किमशोभनं इति एते च पदार्थाः श्रुतिष्वपि गणिताः तथा गर्भोपनिषदि अष्टौ प्र
कृतयः २ षोडश विकारा इति प्रश्नोपनिषदि च पृथिवी च पृथिवीमात्रा चेत्यादिना एवमन्येषूपनिषदादिष्वपि अष्टौ च प्र
कृतयः कारिकायां व्याख्याताः मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न वि
कृतिः पुरुषः एकमेवाद्वितीयं तत्त्वमिति श्रुतिस्मृतिप्रवादास्तु सर्वतत्त्वानां पुरुषे विलापनेन शक्तिशक्तिमदभेदेन स्वविरो
धः लयस्तु सूक्ष्मभावेनावस्थानं न तु नाश इति तदुक्तं आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितमिति अविकल्पितमविभ
क्तं एतच्च ब्रह्ममीमांसाभाष्ये तत्प्रसंगतो विस्तरेणोपपादितं विशेषस्त्वयं यदीश्वरवाद आत्मतत्त्वानां तत्त्वविभागादी १५
श्वरचैतन्यमेवैकतत्त्वं निरीश्वरवादे तु निर्विशेषचिन्मात्रस्यान्याविभक्तत्वेऽपि कूटस्थ आत्मा इत्येव प्रकृत्यादिसूक्ष्मावस्थायाम
हदादेरविभागाद्द्वैतं चैकतत्त्वमिति तथा च वक्ष्यति नाद्वैतश्रुतिविरोधो जातिपरत्वादिति एतेषु पदार्थेषु बाह्यसूक्ष्माणाम

31/1990

नुमानेन बोधं प्रतिपादयति सूत्रजातेन स्थूलात्पंचतन्मात्रस्य ६२ बोध इत्यनुवर्तते स्थूलेन तेन चाणुपमेव तन्मा
त्रं कार्यं तथोक्तं ततः स्थूलभूतानां कार्यानुकारणतया तन्मात्रस्यानुमानेन स्थूलविवेकतो बोध इत्यर्थः आकाश
साधारण्याय स्थूलत्वमत्र बाह्येंद्रियग्राह्यगुणकत्वं शांतादिविशेषवत्त्वं वा तन्मात्राणि च यज्ज्ञानयोगिषु शांतादिविशेष
शून्यं ततो निवृत्तिः ज्ञानीयानां शब्दस्पर्शरूपरसगंधानामाधारभूतानि सूक्ष्मद्रव्याणि स्थूलानामविशेषाः तस्मिंस्तु
तन्मात्रातेन तन्मात्रता स्मृताः न शांता नापि घोरास्ते न मूढाश्चाविशेषिणः इति इति विष्णुपुराणादिभ्यः अस्यायमर्थः तेषु
तेषु भूतेषु तन्मात्राणि एवेति तेषां धर्मधर्म्यभेदात् द्रव्याणामपि तन्मात्रता स्मृता तेन च पदार्थाः शांतघोरमूढाख्यैः स्थूल
गतशब्दादिविशेषैः शून्याः एकरूपत्वात् तथा च शांतादिविशेषशून्यशब्दादिमत्त्वमेव भूतानां शब्दादितन्मात्रत्वमित्या
शयः अतो विशेषिणः अविशेषसंज्ञिता इति शांतं सुखात्मकं घोरं दुःखात्मकं मूढं मोहात्मकं तन्मात्राणां च देवा
दिमात्रभोग्यत्वेन केवलसुखात्मकान्येव सुखाधिक्यादिति अत्रेदमनुमानं अपकर्षकाष्ठायमानि स्थूलभूतानि
स्वविशेषगुणवत् द्रव्योपादानकानि स्थूलत्वात् घटपटादिवत् इति अत्रानवस्थापत्त्या सूक्ष्ममादायैव साध्यपर्यव
सानं अनुकूलतर्कश्चात्र कारणगुणकार्यगुणोत्पत्तेः बाधकव्यतिरेकेण परिहार्यत्वं श्रुतिस्मृतयश्चेति प्रकृते श
ब्दस्पर्शादिमत्त्वेनुबाधकमस्ति शब्दस्पर्शविहीनं तद्रूपादिभिरसंयुतं त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययं इति
विष्णुपुराणादिवाक्यजातं तु अहंकारयोश्च शब्दस्पर्शादिमत्त्वे भूतकारणत्वश्रुतिस्मृतय एव बाधिकाः संति बाह्ये
न्द्रियग्राह्यजातीयविशेषगुणवत्त्वस्यैव भूतलक्षणत्वेन तयोरपि भूततापत्त्या स्वस्य स्वकारणत्वानुपपत्तेरिति तत्त्वे
वं कारणद्रव्येषु रूपाभावेन तत्र रूपादेः किं कारणमिति चेत् साधारणद्रव्याणां न्यूनाधिकभावेनान्योन्यसंयोग
विशेष एव हरिद्रादीनां संयोगस्य तदुभयारब्धद्रव्ये रक्तादिरूपादिहेतुत्वदर्शनाद् दृष्टानुसारेण स्वाश्रयहेतुसंयोगा

सा·भा·
१६.

नामेव रूपादिहेतुत्वं संभवेनातिरिक्तानां परमाणुषु रूपकल्पने हेयं सजातीयकारणगुणस्यैव कार्यकारणारंभ
कत्वेपि तु तेषामपि नियमः त्रसरेणुमहत्त्वादावनवयवबहुत्वादेरेव त्वयापि हेतुत्वाभ्युपगमादिति दिक् इंद्रियाणुमा
नेनाकाशानुमानं दर्शनवचनादिभिः प्रत्यक्षादिभिर्वक्ष्यतिभिरेवेति तदन्तोक्तं तत्रान्तरेण तन्त्रान्तरानुमाना नामेव
प्रकृत्यादिरिति नन्वेवं न तत्तन्मात्राणां तांसनो योगभाष्योक्ता प्रक्रियैव ग्राह्या यथाहंकाराच्छब्दतन्मात्रं ततश्चाहंकार
सहकृतशब्दतन्मात्रात् स्पर्शगुणकं स्पर्शतन्मात्रं एवं क्रमेणैकैकगुणवृद्ध्या तन्मात्राण्युत्पद्यंत इति यातु आका
शास्तु विकुर्वाणः स्पर्शमात्रं ससर्ज ह बलवानभवद्वायुस्तस्य स्पर्शो गुणो मत इत्यादिना विष्णुपुराणे स्पर्शादित
न्मात्रसृष्टिराकाशादिस्थूलभूतचतुष्टयादुक्ता सा मस्तेरूपेण परिणामरूपेवमेतत्या आकाशादीनि जलांतानि हि स्थू
लभूतानि स्वोत्तरभूतरूपेण स्वानुगततन्मात्राः स्वोपष्टंभतः परिणामयंतीति बाह्याभ्यंतराभ्यां तैश्चाहंकारस्य
॥ ६४ ॥ बाह्याभ्यंतराभ्यामिंद्रियाभ्यां तैः पंचतन्मात्रैश्च कार्यैस्तत्कारणतयाहंकारस्यानुमानेन बोध इत्यर्थः
अहंकारश्चाभिमानवृत्तिकमंतःकरणद्रव्यं तत्त्वाभिमानं मात्रं द्रव्यस्यैव लोके द्रव्योपादानत्वदर्शनात् सुषुप्त्यादौ
अहंकारवृत्तिनाशेन भूतनाशप्रसंगात् वासनाश्रयत्वेनैवाहंकारस्य द्रव्यसिद्धेश्चेति अत्रेत्थमनुमानं तन्मा
त्रेंद्रियाणि अभिमानवद्द्रव्योपादानकानि अभिमानकार्यद्रव्यत्वात् यन्नैवं तन्नैवं यथा पुरुषादिरिति नन्वभिमा
नवद्द्रव्यमेवासिद्धमिति चेत् अहं गौर इत्यादिवृत्त्युपादानतया चक्षुरादिवत् तत्सिद्धेः अनेन चानुमानेन
तन्मात्रव्यतिरेकमात्रस्य तत्कारणतया प्रसाध्यत्वात् अत्राचायमनुकूलतर्कः बहु स्यां प्रजायेयेत्यादिश्रुति १६
स्मृतिभ्यः तावद्भूतादिसृष्टेरभिमानपूर्वकत्वान्बुद्धिपूर्वकसृष्टौ कारणतयाभिमानः सिद्धः तत्रैव कार्य
समवायप्रत्यासत्त्यैवाभिमानस्य सृष्टिहेतुत्वं लाघवात्कल्प्यत इति नन्वेवं कुलालाहंकारस्यापि घटोपादानत्वापत्ति

कुलालस्य युक्तो नष्टांतःकरणनाशेन निर्मितघटनाशः स्यात् तेन युक्तं पुरुषान्तरेण स एवायं घट इति प्रत्यभिज्ञायमा
नत्वादिति मैवं मुक्तपुरुषभोगहेतुपरिणामस्यैवांतःकरणे मोक्षोत्तरमनुत्पादात् ननु परिणामसामान्यस्यांतःक
रणस्वरूपस्य वाच्छेदः कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वादिति योगसूत्रे मुक्तपुरुषोपकरणस्याप्यन्य
पुरुषार्थसाधकत्वसिद्धेरिति अथवा घटादिष्वपि हिरण्यगर्भाहंकार एव कारणमस्तु न कुलालाद्यहंकारस्तथा
पि सामान्यव्याप्तेरव्यभिचारः समष्टिबुद्ध्याद्युपादानिकैव व्यष्टिसृष्टिः पुराणादिषु सांख्ययोगयोश्च प्रतिपाद्यते
न ननु ईशव्यष्टिबुद्ध्याद्युपादानकार्यं महापृथिव्यादि च स्थावरजंगमाद्युपादानत्वे ननु पृथिव्यंशत्वेनोपादेयमिति तेनां
तःकरणस्य ॥ ६५ ॥ तेनाहंकारेण कार्येणान्तःकारणतया मुख्यस्यांतःकरणस्य महदाख्यस्य बुद्धेरनुमानेन बोध
इत्यर्थः आनाप्ययं प्रयोगः अहंकारद्रव्यं निश्चयवृत्तिमद्द्रव्योपादानकं निश्चयकार्यद्रव्यत्वात् यन्नैवं तन्नैवं
यथा पुरुषवदिति अत्राप्ययं तर्कः सर्वोपि लोकः घटपदार्थस्वरूपतो निश्चित्य पश्चादभिमन्यते अयमहं ममेदं क
र्तव्यमित्यादिरूपेणेति तावत्सिद्धमेव तत्र चाहंकारद्रव्यकारणाकांक्षायां वृत्त्योः कार्यकारणभावेन तदाश्रययोरेव का
र्यकारणभावो लाघवात् कल्प्यते कारणस्य वृत्तिलाभेन कार्यवृत्तिलाभस्यौत्सर्गिकत्वादिति श्रुतावपि सरस्यां च
के न दृश्यते स्यादौ सर्गाद्युत्पन्नबुद्धितत्त्व एव न तेन तत्सृष्टिरिति गम्यत इति यद्यप्येकमेवान्तःकरणं वृत्तिभेदे
न त्रिविधं तथापि गुणत्रयाभेदापन्नेन महान्प्रादुर्बभूव ह मनो महांश्च विज्ञेयमेकं तद्वृत्तिभेदतः इति लिंगाद्यं च
वृत्तिमतो बीज्यपरिणयनत्वेनोत्स्वत्रयमाणं दृष्टान्तविधया मनसोपि वृत्तिमात्रभेदेन च बुद्धित्वसिद्धेश्च अथान्यथा
निश्चयादिवृत्तिभिरिव भ्रमसंशयनिद्राक्रोधादिवृत्तिभिरपि तत्समसंख्यान्तःकरणापत्तेः बुद्ध्यादिष्वव
स्थामन आदिप्रयोगस्यप्रातेः कृत्वादि सर्वशास्त्रेषु अनुपपन्नेश्च तथापि वंशपर्वादिन्यायेनांतरभेदमाश्रित्यांतःकर

33/1910

णान्वयेक्रमः कार्यकारणभावश्चोक्तः योगोपयोगिश्रुतिस्मृतिपरिभाषानुसारादिति मंतव्यं तदुक्तं वाशिष्ठे अ
हमर्थोदयो योयं चित्तात्मा वेदनात्मकः एवंचित्तद्रुमस्यास्य बीजं विद्धि महामते एतस्मात्प्रथमोद्भिन्नाद्विदुमे
भिनवाकृतिः निश्चयात्मा निराकारो बुद्धिरित्यभिधीयते अस्य त्वभिधानस्य यांकुरस्य प्रपीनता संकल्प
रूपिणी तस्याश्चित्तं चेतो मनोभिधेति अहमर्थांतःकरणसामान्ये अन्यवाक्ये बीजांकुरन्यायेनैकस्यैवांतःकरण
स्य वृत्तिमात्ररूपेण चित्ताद्याख्यावस्थाभेदाः क्रमिकास्त्रिविधाः परिणामा उक्ता इति सोस्मच्छास्त्रे च बिंता
वृत्तिकस्य चित्तस्य बुद्धावेवांतर्भावः ततः प्रकृतेः ५६ ततो महत्तत्त्वात्कार्यात्कारणतया प्रकृतेरनुमानेन
बोध इत्यर्थः अंतःकरणसामान्यस्यापि कार्यत्वं तावदेकदा पंचेंद्रियज्ञानोत्पत्त्या मध्यमपरिमाणतया देहा
दिवदेव सिद्धं श्रुतिस्मृतिप्रामाण्याच्च तस्य च प्रकृतिकार्यत्वे अयं प्रयोगः सुखदुःखमोहधर्मकद्रव्यजन्या कार्य
त्वे सति सुखदुःखमोहात्मकत्वात्कांतादिवदिति कारणगुणानुसारेणैव कार्यगुणोत्पत्तिसंभवाच्चानुकूलतर्कः श्रु
तिस्मृतयोपीति मंतव्यं ननु विषयेषु सुखादिमत्त्वे प्रमाणं नास्ति अहं सुखीत्याद्येवानुभवात् तत्कथं कांतादि
र्विषयो दृष्टांत इति चेन्न सुखाद्यात्मकबुद्धिकार्यतया स्रक्सुखं चंदनसुखं इत्याद्यनुभावेन च विषयाणामपि
सुखादिधर्मकत्वसिद्धेः श्रुतिस्मृतिप्रामाण्याच्च किंच यस्यान्वयव्यतिरेकौ सुखादिना सह दृश्येते तस्यैव सुखा
द्युपादानत्वं कल्पने तस्य निमित्तत्वं परिकल्प्यान्यस्योपादानत्वकल्पने कारणद्वयकल्पनागौरवात् अपि च अ
न्योन्यसंवादेन प्रत्यभिज्ञया च विषयेषु सर्वपुरुषसाधारणस्थिरसुखसिद्धिः तत्स्वरूपग्रहणायास्मिन्नये वृत्तिनि
यमादिकल्पनागौरवं च फलसुखत्वाभ्यां दोषावहं अन्यथा प्रत्यभिज्ञयावयवसिद्धिप्रसंगात् तत्करणादिकल्प
नागौरवादिति विषयेपि सुखादिकं च मार्कंडेयप्रोक्तं तत्संतु चेतस्यथवापि देहे सुखानि दुःखानि च किं ममात्रेति १७

अहं सुखीत्यादिप्रत्ययास्तु अहं धनीत्यादिप्रत्ययवत् स्वस्वामिभावाख्यसंबंधविषयकास्तेषां प्रत्ययानां सम
वायसंबंधविषयकत्वभ्रमनिरासार्थं तु सुखी दुःखी मूढ इत्येभ्यः पुरुषो विविच्यते शास्त्रेष्विति शब्दादिषु च सुखा
द्यात्मता व्यवहारकार्यसमवायात् अस्मद्वादे शब्दादिषु साक्षादेव सुखं उक्तप्रमाणेभ्यो विषयगतसुखादेश्च बुद्धि
मात्रग्राह्यत्वफलवत्त्वात् यत्तु विषयासंप्रयोगकाले शांतिसुखं सात्विकं सुषुप्त्यादौ व्यज्यते तदेव बुद्धिधर्म आत्म
सुखमुच्यत इति यद्यपि वैशेषिका अपि तार्किकाः प्रपंचेन्यथापि कार्यकारणव्यवस्थामनुमिन्वते तथापि बहुलश्रु
तिस्मृत्युपबृंहिताभिरनुमितिभिर्व्यवस्था मुमुक्षुभिरुपादेया मूलशैथिल्यदोषेण परानुमानानां दुर्बलत्वात् अत
एव तर्काप्रतिष्ठानादित्येतत्सूत्रेणाप्रतिष्ठादोषतः केवलतर्कोपालः तथा मनुनापि आर्षं धर्मोपदेशं च वेदशा
स्त्राविरोधिना यस्तर्केणानुसंधत्ते स धर्मं वेद नेतर इति वेदाविरुद्धतर्कस्यैवार्थनिश्चायकत्वमुक्तं तस्मात् श्रोतव्यः श्रु
तिवाक्येभ्यो मंतव्यश्चोपपत्तिभिरित्यादिवाक्येभ्यः श्रवणसमानार्थकमेव मननं बलवत् अन्याकारमननं तु परेषां दु
र्बलं एवं पुरुषेपि सुखदुःखादिमत्त्वेन तेषामनुमानं च कुलश्रुत्यादिविरोधात् दुर्बलमिति दिक् प्रकृतिगतविशेषं च
पश्चाद्वक्ष्यामः नन्वखिलजडेभ्यः पुरुषविवेक एव मुक्तौ हेतुस्तत् किमर्थं जडानामन्योन्यविवेकोत्र दर्शित इति चेत् प्र
कृत्यादिनत्वोपासनयापि सत्त्वशुद्ध्यर्थं तद्विकस्याप्यपेक्षितत्वादिति कार्यकारणमुद्रया प्रकृतिपर्यंतस्यानुमाने न विवे
कतः सिद्धिमुक्ता पर्यायतः कार्यकारणभावस्त्यस्य पुरुषस्य प्रकारांतरेणानुमानतस्तथासिद्धिमाह संहतपरा
र्थत्वात् पुरुषस्य ५७ संहतत्वं नमारंभकयोगः स चावयवावयव्यभेदात् प्रकृतिकार्यसाधारणः तथात्र सं
हतानां प्रकृतितत्कार्याणां परार्थत्वानुमानेन पुरुषस्य बोध इत्यर्थः तद्यथा विवादास्पदं प्रकृतिमहदादिकं
परार्थं स्वेतरस्य भोगापवर्गफलकं संहतत्वात् शय्यासनादिवदिति अनेनानुमानेन प्रकृतेः परो असंहत एव पु

35
1990

सा·भा· १८ रुषः सिध्यति तस्यापि संहतत्वेनव्यवस्थापनेः पातंजलेचापरार्थं संहत्यकारित्वादिति सत्रकारेणानुमानकृ
तंयत्तु यथा शुनमेवो सावयविसाधारणमितिरसाहिते नार्थक्रियाकारित्वस्येव संहत्यकारिता प्राब्दार्थत्वात् पु
रुषस्तु विषयप्रकाशरूपायां स्वार्थक्रियायां नान्यदपेक्षते नित्यप्रकाशरूपत्वात् पुरुषार्थसंबंधमात्रे बुद्धिरपे
क्षणात्संबंधस्तु नासाधरेणार्थः क्रियेति अत्र च नवा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामा
य सर्वं प्रियं भवति इत्यादिश्रुतिस्तत्रयोनुकूलतर्कः अन्यस्य सुखादिमत्प्रधानादिकं स्वस्य सुखादिभोगार्थं स्यात्
तादृ स्वस्य साक्षात्त्वं ज्ञेयत्वे कर्मकर्तृविरोधो नहि धर्मिमानं विना सुखस्य गानं संभवति अहं सुखी सेव सुखानुभावा
दिति अपि च संहत्य मानानां बहूनां गुणानां तत्कार्याणां वानेकविकाराणां अनेकत्वेन त्र्यगुणकल्पना यागौरवे
णान्त्र घवादेक एव नित्यप्रकाशरूपः पुरुषः सर्वसंहतेभ्यः परः कल्पयितुं युक्त इति अनेन सूत्रेण निमित्त म·
कारणतया पुरुषानुमानमुक्तं पुरुषार्थस्य अस्ति तु वस्तु सहैर्थेन निमित्तत्व वचनात् अतएव सर्गाद्युत्
पुरुषं प्रकृत्य विष्णुपुराणादौ स्मर्यते निमित्तमात्रमेवासो सृज्यानां सर्गकर्मणि प्रधानकारणीभूतायतो
वै सृज्यशक्तयः गुणसाम्यात्ततस्तस्मात् क्षेत्रज्ञाधिष्ठितान्मुने गुणव्यंजनसंभूतिः सर्गकाले द्विजोत्तमेत्या
दि क्षेत्रज्ञाधिष्ठानं चासमासपुरुषार्थस्य पुरुषस्य संयोगमात्रं गुणव्यंजनकमहत्तत्त्वकारणतया त्रिगु
णात्मकप्रधानव्यंजकत्वादिति तदेवं महदादिकार्याणामनुमानेन सिद्धिरुक्ता इदानीं सत्त्वकारणत्वोपपत्तये प्रकृते
र्निर्मूलत्वमुपपादयन्ने पुरुषकोटस्थ्यसिद्ध्यर्थं मूले मूलाभावादमूलं मूलं ५८ त्रयोविंशतितत्त्वानां मूलमुपा १८
दानं प्रधानं मूलहरत्ये अनवस्थापत्त्यात त्र मूलांतरासंभवादित्यर्थः ननु तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विज
सत्तमेत्यादिना प्रधानस्यापि पुरुषादुत्पत्ति श्रवणात् पुरुष एव प्रकृतेर्मूलं भवतु पुरुषस्य नित्यतया तन्ना

तत्स्यात् अविद्याद्वारकतया च न पुरुषस्य कौटस्थ्यहानिः तथा च स्मर्यते तस्मादज्ञानमूलोयं संसारः पुरुषस्य हीतो
याशंक्याह पारंपर्ये कुत्रापि परिनिष्ठेति संज्ञामात्रं अविद्याद्वारेण परंपरया पुरुषस्य जगन्मूलकारणत्वेप्येकस्मिन्नि
यादी यत्र कुत्रचित् नित्ये द्विपरंपरायाः पर्यवसानं भविष्यति पुरुषस्यापरिणामित्वात् अतो यत्र पर्यवसानं सैव
नित्या प्रकृतिः प्रकृतिरिति हि मूलकारणस्य संज्ञामात्रमित्यर्थः नन्वेवं पंचविंशतितत्त्वानीति नोपपद्यते महतत्त्वकार
णात्मकापेक्षयापि जडतत्त्वांतरापत्तेरित्याशयेन मूलसमाधानमाह समानः प्रकृतेर्द्वयोः ६० वस्तुतस्तु प्र
कृतेर्मूलकारणविचारे द्वयोर्वादिप्रतिवादिनो रावयोः समानः पक्ष एतदुक्तं भवति यथा प्रकृतेरुत्पत्तिः श्रूयते ए
वमविद्यायाः अपि अविद्या पंचपर्वैषा प्रादुर्भूता महात्मनः इत्यादिवाक्ये अतएकस्या अवश्यं गौणत्वुत्पत्तिर्युक्त
संयोगलक्षणोत्पत्तिः कथ्यते ज्ञानकर्मणोरिति कौर्मवाक्ये प्रकृतिपुरुषयोर्गौणोत्पत्तिस्मरणात् अविद्याया अ
कापि गौणोत्पत्तिश्रवणात् तस्या अनादित्वात् प्रवाहरूपेण वासनाद्यनादिवक्ष्यमाणत्वेयानीति अवि
द्या च मिथ्याज्ञानरूपा बुद्धिधर्म इति योगे सत्रितमतो न तत्त्वाधिक्यं अथवा द्वयोः प्रकृतिपुरुषयोः समान एव
न्याय इत्यर्थः यतः प्रधानपुरुषौ यत्स्थैर्य चराचरं कारणं सकलस्यास्य स नो विष्णुः प्रसीदत्विति इत्यादिवाक्यैः पु
रुषस्याप्युत्पत्तिश्रवणादिति भावः तथा च पुरुषस्येव प्रकृतेरपि गौणोत्पत्तिः नित्यत्वश्रवणादित्यपि समा
नमिति तस्मात्प्रकृतिरेवोपादानं जगतः प्रकृतिधर्मा अविद्या जगन्निमित्तकारणं तथा पुरुषेपि इति सिद्धं
यतु अविद्यामादुरव्यक्तं सर्गप्रलयधर्मिणं सर्गप्रलयनिर्मुक्तं विद्यां वै पंचविंशकमित्तिमोक्षधर्मे प्रकृति
पुरुषयोरविद्याविद्येति वचनं तदुभयविषयतयोपचरितमेव परिणामित्वेन हि पुरुषापेक्षया प्रकृतिरसती
तिनस्या अविद्याविषयत्वमुक्तं एवमेव तस्मिन् प्रकरणे स्वस्वकारणापेक्षया प्रकृतानां कार्यजातमप्यविद्यात्वे कं

37/1990

सां॰भा॰
१०

स्वस्वापेक्षया प्रकृतिस्सर्वकारणमित्येतेन पुरुषस्यापरिणामरूपं जगदुपादानत्वं तु प्रकृत्यौपाधिकमेव कर्तृत्वा
दिवत् श्रुतिस्मृत्योरुपासनार्थमेवानूद्यते अन्यथा अस्थूलमनणु एवमन्तरस्वमित्यादिश्रुतिविरोधापत्तेरिति मन्तव्यं
मथशब्देन च प्रकृतिरेवोच्यते मायां तु प्रकृतिं विद्यादित्यादिश्रुतेः अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया
सन्निरुद्ध इति पूर्वप्रक्रान्तं मायायाः प्रकृतिस्वरूपत्वावचनात् सत्त्वं रजस्तम इति प्राकृतं हि गुणत्रयं एतन्मयी वै
प्रकृतिर्माया वेद्ये सर्वास्वतत्त्वलोहितश्वेतकृष्णेति निरास्त्वादृक् बह्वीः प्रजा इत्यादिस्मृतिश्च न तु ज्ञानरूपा अवि
द्या माया शब्दार्थः नित्यत्वानुपपत्तेः किं चाविद्याया द्रव्यत्वे शब्दमात्रभेदः गुणत्वे च न ह्याधारतया प्रकृतिसिद्धिः
पुरुषस्य निर्गुणत्वादिभ्यः अथ द्रव्यगुणकर्मविलक्षणैवास्माभिरविद्या वक्तव्येति चेन्न तादृक्पदार्थाप्रतीतेरु
क्तत्वादिति नन्वेवं चेत्प्रकृतिपुरुषाद्यनुमानप्रकारोऽस्ति तर्हि सर्वेषामेव कथं विवेकमननं न जायते तत्राह अधिकारि
त्रैविध्यान्न नियमः ६१ श्रवणादाविव मननेऽप्यधिकारिणस्त्रिविधाः मन्दमध्यमोत्तमा इत्यतो न सर्वेषामेव मनन
नियमः कुतर्कादिभिर्मन्दमध्यमयोः बाधस्य प्रतिपक्षसंभवादित्यर्थः मन्दे हि कुतर्कजातेनानुमानानि
बध्यन्ते मध्यमे च बुध्यादेरेव विरुद्धासल्लिंगैः सत्प्रतिपक्षतानिक्रियन्ते अत उत्तमाधिकारिणामेवैतादृशमननं भ
वतीति भावः प्रकृतेः स्वरूपस्वगुणसाम्यं प्रागेवोक्तं सूक्ष्मभूतादिकं च प्रसिद्धमेवास्तीत्यवशिष्टयोः महदहंकारयो
स्वरूपमाह सत्त्वाभ्यां महदाख्यमाद्यं कार्यं तन्मनः ६२ महदाख्यमाद्यं कार्यं तन्मनः मननवृत्तिकं मननमात्रं निश्चय
वृत्तिका बुद्धिरित्यर्थः यदुत्पत्ति वितत्तं तं बीजं प्रधानपुरुषात्मकं महत्तत्त्वमिति प्रोक्तं बुद्धितत्त्वं तदुच्यते इत्यादिवाक्ये १९
भ्यो बुद्धेरेवाद्यकार्यत्वावगमात् चरमोऽहंकारः ६३ तस्यानन्तरो यः सोऽहंकारोऽभिमानवृत्तिक इत्यर्थः यतोऽभिमान
वृत्तिकोऽहंकारस्तत्कार्यत्वमुत्तरेषामुपपन्नमित्याह तत्कार्यत्वमन्येषां ६४ सुगमं एवं त्रीस्सूत्री व्याख्याय यथो नरुत्वा

39/1990

शंकाः परास्ता नन्वेवं प्रकृतिः सर्वकारणमिति श्रुतिविरोध इत्याशंकायामाह आद्यहेतुता तद्द्वारा पारंपर्येऽप्यणुव
त् ६५ पारंपर्येऽपि साक्षाद्धेतुत्वे आद्यायाः प्रकृतेर्हेतुताहंकारादिमहदादिद्वाराऽस्ति यथा वैशेषिकमतेऽणूनां
घटादिहेतुता द्व्यणुकादिद्वारेत्यर्थः ननु प्रकृतिपुरुषयोरुभयोरेव नित्यत्वात् प्रकृतेरेव कारणत्वे तत्र किं नियामा
कं तत्राह पूर्वभावित्वे द्वयोरेकतरस्य हानेः अन्यतरयोगः ६६ द्वयोरेव पुं प्रकृत्योः यद्यपि पूर्वभावित्वेऽपि एकत
रस्य पुरुषस्यापरिणामित्वेन कारणताहान्या अन्यतरस्याः कारणत्वौचित्यमित्यर्थः पुरुषस्यापरिणामित्वे चेदं
बीजं पुरुषस्य संहत्यकारित्वे परार्थत्वापत्त्यानवस्था असंहत्यकारित्वे सर्वदा महदादिकार्यप्रसंगः प्रकृतिद्वारा परि
णामकल्पने च लाघवादस्या एव परिणामोऽस्तु पुरुषे तु स्वामित्वेन सत्त्वोपचारो यथा योधेषु वर्तमानो जयपराज
यौ राज्ञ्युपचर्येते तत्फलसुखदुःखभोक्तृत्वेन तत्स्वामित्वादिति किं चित्तमिन्द्रियग्राहकमाह तन्ने द्रष्टृतया पुरुषसिद्धौ नान्य
द्रष्टाकांक्षेति अपि च पुरुषस्य परिणामित्वे कदाचिच्चक्षुर्मन आदिवत् साध्यमपि स्यात्तदा च विद्यमानमपि सुख
दुःखादिकं न ज्ञायते न तस्थाहं सुखी न वेत्यादिसंशयापत्तिः अतः सदा प्रकाशस्वरूपत्वानपायेन पुरुषस्यापरिणा
मित्वं सिध्यतीत्युक्तं योगसूत्रेण सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वादिति तद्भाष्येण च सदा
ज्ञातविषयत्वं तु पुरुषस्यापरिणामित्वं परिदीपयतीति सदा प्रकाशस्वरूपत्वेऽपि यथानेकदाविश्वप्रकाशत्वं तथा वक्ष्या
मः प्रकृतेर्युगपत्कारणत्वोपपत्तये विभुत्वमपि प्रतिपादयति परिच्छिन्नं न सर्वोपादानं ६७ सर्वोपादानं प्रधानमप
रिच्छिन्नं व्यापकमित्यर्थः सर्वोपादानत्वमत्र हेतुगर्भविशेषणं परिच्छिन्नेत्यसंभवादिति ननु प्रकृतेरपरिच्छिन्नत्वं नो
पपद्यते प्रकृतिर्हि सत्त्वादिगुणत्रयादतिरिक्तं न भवति सत्त्वादीनां मनर्द्धर्मत्वं न रूपादिस्यागामित्वात् योगसू
त्रभाष्याभ्यां स्पष्टमवक्तृत्वात् अतेषां च सत्त्वादीनां लघुत्वचलत्वगुरुत्वादयो धर्मा वक्ष्यमाणा विभुत्वे सतीवि

रूपत्वे स्कंधादिहेतवः संयोगविभागादयश्च नोपपद्यंत इति अथोच्यते परिच्छिन्नत्वमत्र देशिकाभावप्रतियोगि
तावच्छेदकावच्छिन्नत्वं तदभावश्च व्यापकत्वं तथा च जगत्कारणत्वस्य देशिकाभावप्रतियोगितानवच्छेदकत्वमेव प्रकृ
तेर्व्यापकत्वमिति पर्यवसितं यथा प्राणस्य स्थावरजंगमाद्यखिलशरीरव्यापकत्वं प्राणत्वसामान्येनोच्यते प्राण
व्यक्तीनां सर्वदेहासंबंधात् इदं प्रकृतेर्व्यापकत्वमिति प्रकृतेरक्रियकत्वादिकं च साधर्म्यवैधर्म्यसूत्रे प्रतिपादयिष्या
मः न कर्मवत्सर्वोपादानत्वात् अपि तु न दुःखमिति श्रुतेश्च ६९ अवस्तुनो भावान्न वस्तुनः नश्वरपरिच्छिन्नानामुत्पत्तिश्र
वणाच्च अथ यदल्पं तन्मर्त्यमित्यादिश्रुतिषु अत्र मरणधर्मकत्वेन परिच्छिन्नस्यासत्त्वगमात् श्रुत्यंतरमप्येवमित्यर्थः
इदानीं प्रकृतिकारणतोपपत्तये भावविकारणतां निरस्यति नावस्तुनो वस्तुसिद्धिः ६९ अवस्तुनो भावाद्वस्तुसि
द्धिः भावो सत्तिः शशशृंगात्र गगनकुसुमाद्मोक्षाद्यनुपपत्तेः तददर्शनादित्यर्थः ननु जगज्जन्यवस्तुत्वात् स्वप्नादिव
दित्यत्राह अबाधाददुष्टकारणजन्यत्वाच्च नावस्तुत्वं ७० स्वप्नपदार्थस्येव प्रपंचस्य बाधः श्रुत्यादिप्रमाणै
र्नास्ति तथा शंखपीतिमादेरिव दुष्टेंद्रियादिजन्यत्वमपि नास्ति दोषकल्पने प्रमाणाभावादित्यतो न कार्यस्यावस्तु
त्वमित्यर्थः ननु वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतिभिरेव प्रपंचस्य बाधा बाधाच्चा
विद्याख्यदोषो विश्वकारणेऽस्तीति चेन्न दृष्टांतसिद्ध्यन्यथानुपपत्त्या स्वकारणापेक्षिकास्थैर्यरूपासत्तापरत्वात्
द्वाचाक्यानां अन्यथा सदेवेत्यादिवाक्यविरोधाच्च किंच श्रुत्या प्रपंचबाधे आत्माश्रयः स्वस्यापि प्रपंचांतर्गततया बा
धप्रमाणबाधेन तदसिद्धितार्थे पुनः संशयापत्तिश्चेति अत एव बाधाबाधादिवैधर्म्याद् उपलंभाच्च जाग्रत्त्वस्य
स्वप्नखपुष्पादितुल्यत्वमिति निबंधेन प्रत्याचष्टे वेदांतसूत्रद्वयं वैधर्म्याच्च न स्वप्नादिवदिति भाव उपलब्धेश्चेति
च नेति नेत्यादि सर्वविधवाक्यानि च विधानपराण्येव न तु स्वरूपतः प्रपंचनिषेधकानि प्रकृत्यैतावत्त्वं प्रतिषेधतीति

41
1990

वेदांतसूत्रादेवमन्यान्यपि वाक्यानि ब्रह्मभाष्येऽस्माभिर्व्याख्यातानि नावस्तुनो वस्तुनो वस्तुसिद्धिरिति यदुक्तं तत्र हेतुमा
ह भावेन योगेन तत्सिद्धिरिति यदुक्तं तत्रैव हेतुरभावेन तदभावात् कुतस्तरां तत्सिद्धिः ७१ भावकारणस्य सद्रूपत्वेन
योगेन सत्तायोगेन कार्यसिद्धिः घटते कारणस्याभावे सद्रूपत्वे तु तदभावात् कार्यस्याप्यसत्त्वात् कथं वस्तुभूतकार्यसि
द्धिः कारणस्वरूपस्यैव कार्ये संचित्यादित्यर्थः ननु तथापि कर्मवाद्यवश्यकत्वात् जगत्कारणमस्तु किं प्रधानकल्पनयेति
तत्राह व्यो। न कर्मण उपादानायोगात् ७२ कर्मणोऽपि न वस्तुसिद्धिः निमित्तकारणस्य कर्मणो न मूलकारणत्वं गुणा
नां द्रव्योपादानत्वायोगात् कल्पना हि दृष्टानुसारेणैव भवति वैशेषिकोक्तः गुणानां चोपादानत्वं न क्वापि दृष्टमित्यर्थः अ
त्र कर्मशब्दो विद्यादीनामप्युपलक्षकः गुणत्वाविशेषणात् तेषां मप्युपादानत्वायोगाच्च सुषुप्तः परत्वादिवदविद्याया
श्चेतनगतद्रव्यं तु प्रधानस्य संज्ञामात्रभेद इति तदेवं परिणामित्वात् परिणामित्वपरार्थत्वापरार्थत्वाभ्यां पुंप्रकृत्यो
र्विवेकादर्शनः इदानीं विवेकज्ञानस्य याविवेकनाशद्वारा परमपुरुषार्थहेतुत्वं ननु तत्रैव वैदिककर्मणोऽस्तु तद्धेतुता
स्त्वीति प्रयाणक्रमविशेषश्चाभयोरिति सूत्रेण तदेव प्रपंचयति पंचभिः सूत्रैः नानुश्रविकादपि तत्सिद्धिः साध्यत्वेनावृत्ति
योगादपुरुषार्थत्वं ७३ अपिशब्देन दृष्टांतसिद्धिरिति प्रागुक्तदृष्टसमुच्चये गुरोरनुश्रयत इत्यनुश्रवो वेदस्तद्विहितो या
गादिश्चानुश्रविकं कर्म न स्मात्स्मादपि न पूर्वोक्तपुरुषार्थसिद्धिरिति यत्कर्मसाध्यत्वेन पुनरावृत्तिसंबंधादसंतपुरुषार्थ
त्वाभाव इत्यर्थः कर्मसाध्यस्य चानित्यत्वे श्रुतिः तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत
इति न कर्मणाऽन्यधर्मत्वादिति सूत्रेण पूर्वं कर्मणा बंधो निराकृतः इदानीं च मोक्षो निराक्रियत इत्यपौनरुक्त्यं अन्यध
र्मत्वेन पूर्वोक्तहेतुना बंधवन्मोक्षेऽपि कर्मणो हेतुत्वं निराकृतमप्यत्र पुनराशंकवनादिति च न बंधहेतुत्वेनाविवे
कसिद्धे तत्सुरूपो याविवेकजत्वे न कर्मणा तदीयत्वव्यवस्थापपत्तेरिति नन्वेवं पंचाग्निविद्यारूपणोपासनात्मक

र्मणां तीर्थमरणादिकर्मणा च ब्रह्मलोकगतस्यानावृत्तिश्रुतिः कथमुपपद्यते तत्राह तत्र प्राप्तविवेकस्यानावृत्ति
श्रुतिः ७४ तत्रानुश्राविककर्मणि ब्रह्मलोकगतादीनां यानावृत्तिश्रुतिः सा तत्रैव प्राप्तविवेकस्य मन्तव्या अन्यथा हि
ब्रह्मलोकादप्यावृत्तिं प्रतिपादयन्तीनां वाक्यान्तराणां विरोध इत्यर्थः तथा च साध्यनावृत्तिर्विवेकज्ञानस्यैव फलं न तु श्रा
द्धप्रकर्मणा इति च शब्दाध्याये प्रपंचयिष्यति ब्रह्ममीमांसाभाष्ये च तयोर्वाक्ययोर्मुख्यस्माभिर्व्याख्याता निकृष्ट
फलकत्वं तदा आह दुःखाद्दुःखं जलाभिषेकवन्न जाड्यविमोकः ७५ आनुश्रविकात्तु हिंसादिदोषेण दुःखात्मकेन यो
गेन च दुःखाद्दुःखं दुःखधारैव भवति न तु जाड्यविमोको विवेकनिर्वर्त्य दुःखविमोक्षस्तत् दुःखमेव तिष्ठति यथा जाड्या
र्तस्य जलाभिषेकाद्दुःखवृद्धिरेव भवति न तु जाड्यविमोक्ष इत्यर्थः तदुक्तं यथा विपंकेन पंकांभः सुरया वा सुराकृतम्
न हत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति इति श्रूयते ब्रह्मलोकस्थानां विष्णुपार्षदानामपि जयविजयादीनां पुनः राक्षस
योनौ दुःखधारेति काम्ययाचेत्युक्तं दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्त इति न तु निष्कामादृ
ष्टयागजपादिरूपकर्मणा न दुःखप्रसक्तमोक्षः फलं श्रूयत इति तत्राह काम्यकाम्येऽपि साध्यत्वाविशेषात् काम्ये
काम्ये च कर्मणि दुःखाद्दुःखं भवति कुतः साध्यत्वाविशेषात् कर्मसाध्यस्य सत्त्वशुद्धिद्वारका ज्ञानस्यापि त्रिगुणात्म
कतया दुःखात्मकत्वादित्यर्थः न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरित्यादिश्रुतिभ्यश्च कर्मणा
न साक्षान्मोक्षः फलमिति भावः त्यागेन अभिमानत्यागेन एके केचिदेव अमृतत्वमानशुः प्रापुर्न तु सर्वे अभिमा
नत्यागस्य तत्त्वज्ञानजन्यतया दुर्लभत्वादित्यर्थः ननु भवन्मतेऽपि कथं ज्ञानसाध्यस्य न दुःखत्वं साध्यत्वावि
शेषादिति तत्राह निजमुक्तस्य बंधध्वंसमात्रं न समानत्वं ७७ निजमुक्तस्य स्वभावमुक्तस्यापि विद्याविद्या २१
द्यास्य कारणनाशेन यथोक्तबंधनिवृत्तिमात्रं परमार्थतः विवेकज्ञानस्य फलं ध्वंसश्चाविनाशान्न तु कर्मव

43/1990

अदृष्टकारणं विना न सम्भवत्येवाविद्यानाशकत्वं घटत इति अतो ज्ञानस्याक्षयफलकत्वान्न समानत्वं ज्ञान
कर्मणोरित्यर्थः ज्ञानान्न पुनरावृत्तिः संभवति अविवेकाख्यकारणनाशादिति सिद्धं तदेवं विवेकज्ञानमेव
साक्षान्मोक्षोपाय इत्युक्तं इदानीं विवेकज्ञानस्यापि साक्षादुपायाः प्रमाणानि परीक्ष्यन्ते आत्मा वा अरे द्रष्टव्यः
श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादिश्रुतिभिर्हि प्रमाणत्रयेणात्मज्ञानमवगम्यते कर्मादिकं त्वन्यत् मनन आ
दिप्रमाणानां शुद्ध्यादिकरणमेवेति द्वयोरेकतरस्य वाप्यसंनिकृष्टार्थपरिच्छित्तिः प्रमा तत्साधकतमं यत्तत्त्रिवि
धं प्रमाणं असन्निकृष्टः प्रमात्रानारूढो नधिगत इति यावत् एवंभूतस्यार्थस्य वस्तुनः परिच्छित्तिरवधार
णं प्रमा सा च द्वयोर्बुद्धिपुरुषयोरेव धर्मो भवतु किं वैकतरमात्रस्य उभयथैव तस्याः प्रमायाः यत्साधकतमं फला
योगव्यवच्छिन्नं कारणं तत्प्रमाणं तच्च त्रिविधं वक्ष्यमाणरूपेणेत्यर्थः स्मृतिव्यावर्तनाय अनधिगतेति भ्रम
व्यावर्तनाय वस्त्विति संशयव्यावर्तनाय चावधारणमिति अत्र यदि प्रमारूपं फलं पुरुषनिष्ठमात्रमुच्यते त
दा बुद्धिवृत्तिरेव प्रमाणं यदि च बुद्धिनिष्ठमात्रमुच्यते तदेंद्रियसन्निकर्षादिरेव प्रमाणं पुरुषस्तु प्रमासाक्ष्येव न प्रमा
तेति यदि च पौरुषेयबोधो बुद्धिवृत्तिश्चोभयमपि प्रमोच्यते तदा तूक्तमुभयमेव प्रमाभेदेन प्रमाणं भवति चक्षु
रादिषु तु प्रमाणव्यवहारः परंपरयैव सर्वथेति भावः पातंजलभाष्ये तु व्यासदेवैः पुरुषनिष्ठ एव बोधः प्रमेत्यु
क्तः पुरुषार्थमेव करणानां प्रवृत्त्या फलस्य पुरुषनिष्ठताया एवौचित्यात् अतोऽत्रापि स एव मुख्यः सिद्धांतः न च पुरु
षबोधस्वरूपस्य नित्यतया कथं फलत्वमिति वाच्यं केवलस्य नित्यत्वेऽपि अर्थोपरक्तस्य कार्यत्वात् परागस्येव वा फल
त्वादिति अत्रेयं प्रक्रिया इंद्रियप्रणालिकया अर्थसंनिकर्षेण लिंगज्ञानादिद्वारा बुद्धेरर्थाकारा वृत्तिर्जायते तत्रें
द्रियसन्निकर्षजा प्रत्यक्षा वृत्तिरिंद्रियविशिष्टबुद्ध्याश्रिता नयनादिगतापि तादिदोषैः पीताद्याकारवत्सु इत्यादि

निविशेषः साच वृत्तिरर्थोपरक्ता प्रतिबिंबरूपेण पुरुषारूढा सती भासते पुरुषस्यापरिणामितया बुद्धिवत् स्वतो
र्थाकारत्वासंभवात् अर्थाकारतायाएवचार्थग्रहणत्वात् अन्यस्य दुर्वचत्वादिति तदेतद्दूष्यत्ति जपास्फटिकयोरि
वनोपरागः किंत्वभिमान इति योगसूत्रं च वृत्तिसारूप्यमितरत्रेति स्मृतिरपि तस्मिंश्चिद्दर्पणे स्फारे समस्तावस्तुदृष्ट
यः इमास्ताः प्रतिबिंबंति सरसीव तटद्रुमाः इति योगभाष्यं च बुद्धेः प्रतिसंवेदी पुरुष इति प्रतिध्वनिवत्प्रतिसंवे
दनं प्रतिबिंबस्तस्याश्रय इत्यर्थः एतेन पुरुषाणां कूटस्थ विभुचिद्रूपत्वेपि न सदासर्वावभासप्रसंगः असंगतयास्त
नोर्थाकारतां विना संयोगमात्रेणार्थग्रहणस्यानीदियादिस्थलेवुधोवदृष्टत्वादिति पुरुषे च स्वस्वबुद्धिवृत्तीनामेव प्र
तिबिंबार्पणसामर्थ्यमिति फलबलात् कल्प्यते यथा रूपवतामेव जलादिप्रतिबिंबनसामर्थ्यं नेतरस्येति रूपवत्वं च न
साम्यतः प्रतिबिंबप्रयोजकं शब्दस्यापि प्रतिध्वनिरूपप्रतिबिंबदर्शनात् नच शब्दजन्यं शब्दांतरमेव प्रतिध्वनिरिति वा
च्यं स्फटिकलौहित्यादेरपि जपासन्निकर्षजन्यतापत्त्या प्रतिबिंबमिथ्यात्वसिद्धांतक्षतेरिति प्रतिबिंबश्च बुद्धेरेव परि
णामविशेषो बिंबाकारो जलादिगत इति मंतव्यः केचित्तु वृत्तौ प्रतिबिंबितं चैतन्यं वृत्तिं प्रकाशयति तथाच वृत्तिगतप्र
तिबिंबएव वृत्तौ चैतन्यविषयता ननु चैतन्ये वृत्तिप्रतिबिंबोस्तीत्याहुः तदसत् उपदर्शितशास्त्रविरोधेन केवलतर्क
स्याप्रयोजकत्वात् विनिगमनाविरहेण वृत्तिचैतन्ययोरन्योन्यविषयतास्यसंबंधिरूपतयाऽन्योन्यस्मिन् अन्योन्य
प्रतिबिंबसिद्धेश्च घटादिस्थलेऽर्थाकारताया एव विषयतारूपत्वसिद्ध्याऽनंततोपि तदर्थाकारताया एव विषयतात्वौचित्या
च्चेति यत्तु तार्किकाः ज्ञानस्य विषयतां विषयादतिरिक्तां नेच्छंति प्राचीनाः विषयतां नेच्छंति तन्मते ज्ञानव्यक्तीनां अनुगम
कधर्माभावेन घटविषयकं ज्ञानं पटविषयकं ज्ञानमित्याद्यनुगतव्यवहारानुपपत्तिः केचित्तु तार्किकाः अनयैवानुप
पत्त्या विषयतां मतिरिक्तपदार्थमाहुः तदप्यसत् अनुभूयमानानामर्थाकारतां विहाय विषयाकारताकल्पने गौरवादि २२

45
1990

ति प्रतिबिंबद्वयेनेति चेन्न प्रतिबिंबं विनास्वत्वस्यापि दुर्वचत्वात्स्वत्वं हि स्वभुक्तवृत्तिवासनावत्वे भोगश्च ज्ञानं तथा
च विषयतालक्षणस्य विषयसामग्री घटितत्वेनात्माश्रयः तस्माच्चैतन्याच्चैतन्ययोरन्योन्यविषयतारूपोऽन्यो
न्यस्मिन्नन्योन्य प्रतिबिंबसिद्धिः अधिकं तु योगवार्तिके द्रष्टव्यमिति दिक् अत्रायं प्रमात्रादिविभागः प्रमाता चेत
नः शुद्धः प्रमाणवृत्तिरेव न प्रमार्थाकाररूजानां चेतने प्रतिबिंबनं प्रतिबिंबितवृत्तीनां विषयो मेय उच्यते सा
क्षादर्शनरूपं च साक्षित्वं वक्ष्यति स्वयं अत स्यात् कारणाभावाद्वृत्तेः साक्ष्यचेतनः विष्ण्वादेः सर्वसाक्षित्वं गौणं
लिंगाद्यभावत इति ननु यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारते
त्यादिवाक्येषु उपमानादिकं प्रकृतिपुरुषविवेके प्रमाणमुपन्यस्तं तत्कथमुच्यते त्रिविधमिति तत्राह तत्सि
द्धौ सर्वसिद्धेर्नाधिक्यसिद्धिः ७८ त्रिविधप्रमाणसिद्धौ च सर्वस्यार्थस्य सिद्धेर्न प्रमाणाधिक्यं सिध्यति गौरवा
दित्यर्थः अतएव मनुनापि प्रमाणं त्रयमेवोपन्यस्तं प्रत्यक्षमनुमानं च शास्त्रं च विविधागमं त्रयं सुविदितं कार्यं ध
र्मशुद्धिमभीप्सते उपमानादीनां चानुमानशब्दयोः प्रवेशः अनुपलब्ध्यादीनां च प्रत्यक्षे प्रवेश इति उक्तवाक्ये चे
दमनुमानमभिप्रेतं आपादतलमस्तकं कृत्स्नं स्वव्यतिरिक्तेन केन प्रकाश्यं स्वयमप्रकाशत्वात् त्रैलोक्यवदिति
तेजश्चैतन्यसाधारणं च प्रकाशत्वमखंडोपाधिः प्रकाशव्यवहारनियामकतया सिध्येदिति पुरुषनिष्ठप्रमेतिसु
त्यसिद्धांतमाश्रित्य प्रमाणानां विशेषलक्षणानि वक्तुमुपक्रमते यत्संबंधसत्तदाकारोल्लेखि विज्ञानं तत्प्रत्यक्षं ७९
संबद्धं भवत्संबद्धवस्त्वाकारधारि भवति यद्विज्ञानं बुद्धिवृत्तिस्तत्प्रत्यक्षं प्रमाणमित्यर्थः अत्र सदिति तं हेतुगर्भ
विशेषणं तथाच स्वार्थसन्निकर्षजन्याकारस्याश्रयो वृत्तिः प्रत्यक्षं प्रमाणमिति निष्कर्षः वृत्तिः संबंधार्थसर्पनीति
आगामिसूत्रान्वयतः सन्निकर्षजन्यत्वं इत्याकाराश्रयग्रहणं चक्षुरादिद्वारकबुद्धिवृद्धिश्च प्रदीपसिखातुल्या बा

सा·भा·
२३

ह्यार्थसन्निकर्षानंतरमेव तदाकारोल्लेखवती भवतीति नासंभवः ननु योगिनामतीतानागतव्यवहितवस्तु
प्रत्यक्षे व्याप्तिः संबद्धवस्त्वाकाराभावादित्याशंक्य तस्यालक्ष्यत्वेन समाधत्ते योगिनामबाह्यप्रत्यक्षत्वान्न
दोषः ८० ऐंद्रियकप्रत्यक्षा योगिनश्चाबाह्यप्रत्यक्षकाः अतो न दोषो न तत्प्रत्यक्षे व्याप्तिरित्यर्थः वास्तवंस
माधानमाह लीनवस्तुलब्धातिशयसंबंधाद्वाऽदोषः ८१ अथवा तदपि लक्ष्यमेव तथापि न दोषो नाव्या
प्तिः यतो लीनवस्तुषु लब्धयोगजन्यातिशयस्य योगिचित्तस्य संबंधो घटत इत्यर्थः अत्र लीन
शब्दः पराभिप्रेतासन्निकृष्टवाची सत्कार्यवादिनां ह्यतीतादिकमपि स्वरूपतोऽस्तीति न संबंधः संबंधवेदिति
व्यवहितविप्रकृष्टेषु संबंधे हेतुविधया लब्धातिशयेति विशेषणं अतिशयश्च व्यापकत्वं वृत्तिप्रतिबंधक
तमोनिवृत्त्यादिश्चेति इदं चात्रावधेयं यत्संबंधं सदिति पूर्वसूत्रे बुद्ध्यर्थसन्निकर्षस्यैव प्रत्यक्षहेतुतालाभा
त्प्रत्यक्षसामान्ये बाह्यार्थसाधारणे बुद्ध्यर्थसन्निकर्ष एव कारणमिंद्रियसन्निकर्षास्तु चाक्षुषादिप्रत्यक्षेषु वि
शिष्येव कारणानि नन्वेवमिंद्रियसन्निकर्षयोगजधर्माद्यभावेऽपि बुद्ध्या बाह्यार्थप्रत्यक्षापत्तिः सैवं तमःप्रतिबंधे
न तदानीं बुद्धिसत्त्वस्य वृत्त्यसंभवात् तच्च तमः कदाचिदर्थेंद्रिययोः सन्निकर्षेण कदाचिच्च योगजधर्मेणापसार्यं अंज
नसंयोगेन नयनमालिन्यवत् न चैवं तद्धेतोरेव तदस्त्विति न्यायेनेंद्रियसन्निकर्षादेरेव बाह्यार्थप्रत्यक्षसामान्य
हेतुतास्त्विति वाच्यं सुषुप्त्यादौ तमसो बुद्धिवृत्तिप्रतिबंधकत्वसिद्धेः सत्वाज्जागरणं विद्यात् रजसा स्वप्नमादिशे
त्प्रस्वापनं तु तमसा तुरीयं त्रिषु संततमित्यादिस्मृतिभ्यः सुषुप्त्यादौ वृत्तिप्रतिबंधकांतरासंभवाच्च चाक्षुष
त्वाद्यपि तमसः प्रतिबंधकत्वदर्शनाच्च यत्तु शुष्कतार्किकाः सुषुप्तौ ज्ञानानुत्पादार्थं ज्ञानसामान्ये त्वङ्मनोयोगं
कारणं कल्पयंति तदसत् त्वगिंद्रियोत्पत्तेः प्रागपि केवलबुद्ध्या स्वयंभुवः सर्वप्रत्यक्षश्रवणात् त्वङ्मनोयोगस्तु

सुषुप्तावपि तमस एव निमित्ततया वक्तव्यत्वाच्च केवलतर्कस्याप्रतिष्ठादोषग्रस्तत्वाच्चेति दिक् ननु तथापीश्वरप्रत्य
क्षेऽव्याप्तिः तस्य नित्यत्वेन संनिकर्षाजन्यत्वादित्यत आह ईश्वरासिद्धेः ८२ ईश्वरे प्रमाणाभावान्न दोष इत्यनुवर्त
ते अयं चेश्वरप्रतिषेध एकदेशिनां प्रौढिवादेनैवेति प्रागेव प्रतिपादितं अन्यथा हीश्वराभावादित्येवोच्येत
ईश्वराभ्युपगमे तु सन्निकर्षजन्यजातीयत्वमेव लक्षणं विवक्षितं साजात्यं च ज्ञानत्वसाक्षाद्व्याप्यजात्येति भावः
श्रुतिस्मृतिभ्यां कथमीश्वरो नास्तीत्याकांक्षायां न कर्मविधिं लौकिकमेव बाधकमाह मुक्तबद्धयोरन्यतराभा
वान्न तत्सिद्धिः ८३ ईश्वरोऽभिमतः किलेश्वरादि मुक्तो वा निबद्धो वा अन्यतरस्याप्यसंभवान्नेश्वरसिद्धिरित्यर्थः
उभयथाप्यसत्करत्वं ८४ मुक्तत्वस्य दुःखाद्यसमर्थत्वं न तद्योजकाभिमानरागाद्यभावाद्बद्धत्वेऽपि मूढत्वान्न सृष्ट्या
दिसमर्थत्वमित्यर्थः नन्वेवमीश्वरप्रतिपादकश्रुतीनां का गतिस्तत्राह मुक्तात्मनः प्रशंसा उपासा सिद्धस्य वा
८५ यथायोग्यं कासांचिच्छ्रुतिः मुक्तात्मना केवलात्मसामान्यस्य ज्ञेयतया विधायैनो सन्निधिमात्रेणैश्वर्येण स्तुतिरूपा
प्ररोचनार्था कासांचित्संकल्पपूर्वकसृष्ट्यादिप्रतिपादिका श्रुतिः सिद्धस्य जन्यसिद्धमहदादेरेवानित्येश्वरस्याभिमाना
दिमतो पिंगेण नित्यत्वादिमत्वात् नित्यताद्युपासापरेत्यर्थः ननु तथापि प्रकृत्यादिचित्ताधिष्ठातृत्वं श्रूयमाणं नोपपद्य
ते लोकासंकल्पादिना परिणाममानस्यैवाधिष्ठातृत्वे व्यवहारादित्यत आह तत्सन्निधानादधिष्ठातृत्वं मणिवत् यदि
संकल्पेन स्रष्टृत्वमधिष्ठातृत्वमुच्यते तदायं दोषः स्यान्न त्वस्माभिस्तु पुरुषस्य सन्निधानादेवाधिष्ठातृत्वं स्रष्टृत्वादि
रूपमिष्यते मणिवत् यथायस्कांतमणेः सान्निध्यमात्रेण शल्यनिष्कर्षकत्वं न संकल्पादिना तथैवादिपुरुषस्य संयो
गमात्रेण प्रकृतेर्महत्तत्त्वरूपेण परिणमनं तदेव च सोपाधिस्रष्टृत्वमित्यर्थः तथा चोक्तं निरिच्छे संस्थिते रत्ने यथा
लोहः प्रवर्तते सत्तामात्रेण देवेन तथा चायं जगज्जनः अत आत्मनि कर्तृत्वमकर्तृत्वं च संस्थितं निरिच्छत्वादकर्तासौ कर्ता

47/1990

सन्निधिमात्रत इति तदेव अतः बहु स्यां इत्यादिश्रुतिस्तु कूलं पिपतिषतीतिवत् गौणी प्रकृतेर्वा सन्निकृष्टतर
गुणसंयोगात् अथवाबुद्धिपूर्वसृष्टिविषयमेतादृशवाक्यजातं महत्तत्वादिसर्गपरं तस्याबुद्धिपूर्वकत्वस्मरणा
दिति भावः यथा कौर्मे इत्येषः प्राकृतः सर्गः संक्षेपात्कथितो मया अबुद्धिपूर्वकस्त्वेष ब्राह्मीं सृष्टिं निबोधतेति
अस्य च वाक्यस्यादिपुरुषबुद्ध्यजन्यत्वेन संकोचे गौरवमिति न केवलं सृष्ट्यादावेव पुरुषसंयोगमात्रेण स्रष्टृत्वादि
कं अपि तु अन्येष्वपि संकल्पादिपूर्वकेषु भूतादिसृष्टिरूपेषु विशेषकार्येष्वपि सर्वपुरुषाणामित्याह विशेषकार्येष्व
पि जीवानां अधिष्ठातृत्वं सन्निधानादेवेत्यनुषज्यते अंतःकरणोपलक्षितस्यैव जीवशब्दार्थत्वं षष्ठाध्याये वक्ष्य
ति तथा च विशेषकार्येष्वपि सर्गस्थित्यादिसृष्टावपि जीवानामंतःकरणप्रतिबिंबितचेतनानां सन्निधाना
देवाधिष्ठातृत्वं न तु केनापि व्यापारेण कूटस्थचिन्मात्ररूपत्वादित्यर्थः ननु चेत्सदा सर्वज्ञ ईश्वरो नास्ति तर्हि वेदां
तमहावाक्यार्थस्य विवेकस्योपदेष्टुरन्धपरंपराशंकयाप्रामाण्यं प्रसज्जेतेत्यत्राह सिद्धरूपबोद्धृत्वाद्वाक्यार्थो
पदेशः ९८ हिरण्यगर्भादीनां सिद्धरूपस्य यथार्थस्य बोधकत्वात् तद्वक्तृकायुर्वेदादिप्रामाण्येनावधृतात् तेषां
वाक्यार्थोपदेशः प्रमाणमिति शेषः ननु पुरुषस्य चेत्सन्निधिमात्रेण गौणमधिष्ठातृत्वं तर्हि मुख्यमधिष्ठातृत्वं
कस्येत्याकांक्षायामाह अंतःकरणस्य तदुज्ज्वलितत्वात् लोहवदधिष्ठातृत्वं ९९ अंतःकरणस्यानुपचरितम
धिष्ठातृत्वं संकल्पादिद्वारकं प्रसेतव्यं न चाधिष्ठातृत्वं घटादिवदचेतनस्यायुक्तं तत्राह लोहवत्तदुज्ज्वलितत्वादिति
अंतःकरणं हि तप्तलोहवत् चेतनोज्ज्वलितं भवति अतस्तस्य चेतनोपमानतयाधिष्ठातृत्वं घटादिव्यावृत्तमुप २४
पद्यत इत्यर्थः नन्वेवं चेतनेनांतःकरणस्योज्ज्वलने चितः संगित्वं अग्निवदेव स्यादिति चेन्न नित्योज्ज्वलचेतनस्य
संयोगविशेषमात्रस्य संयोगविशेषजन्यचेतनप्रतिबिंबस्य वांतःकरणोज्ज्वलनरूपत्वात् ननु चैतन्यं मंतः

49/1990

करणे संक्रमति किं येन संगितास्यात् अग्नेरपि हि प्रकाशादिकं न लोहे संक्रमति किं त्वग्निसंयोगविशेष एव लो
हस्योज्ज्वलनमिति न त्वेवमप्यग्निसंयोगेन परिणामित्वमिति चेन्न सामान्यगुणातिरिक्तधर्मोत्पत्तावेव परिणाम
व्यवहारादिति अयं च संयोगविशेषोंतःकरणस्यैव सत्वादेकरूपपरिणामात् भवतीति फलबलात्कल्प्यते पु
रुषस्यापरिणामित्वेन संयोगतन्निमित्तकविशेषासंभवादिति अयमेव च संयोगविशेषो बुद्ध्यात्मनोरन्योन्य
प्रतिबिंबने हेतुः ननु प्रतिबिंबहेतुतया संयोगविशेषावश्यकत्वे तेषां प्रतिबिंबकल्पना व्यर्था प्रतिबिंबकार्य
स्यार्थज्ञानादेः संयोगविशेषादेवसंभवादिति तन्नैवं बुद्धौ चैतन्यप्रतिबिंबं चैतन्यदर्शनार्थं कल्प्यते दर्पणे मुख
प्रतिबिंबवत् अन्यथा कर्मकर्तृविरोधेन स्वस्य साक्षात्स्वदर्शनानुपपत्तेः अयमेव चित्प्रतिबिंबो बुद्धौ चिच्छाया
पत्तिरिति चैतन्याध्यास इति चिदावेश इति चोच्यते यश्चैतन्ये बुद्धेः प्रतिबिंबः स चारूढैः विषयैः सह बुद्धेः भाना
र्थमिष्यते अर्थाकारतयैवार्थग्रहणस्य बुद्धिस्थले दृष्टत्वेन तां विना संयोगविशेषमात्रेणार्थभानस्य पुरुषेप्यनौ
चित्यात् अर्थाकारस्य चार्थग्रहणशब्दार्थत्वाच्चेति स चार्थाकारः पुरुषे परिणामो न संभवतीति अर्थप्रतिबिं
बरूप एव पर्यवस्यतीत्युक्तदिक् स चायमन्योन्यप्रतिबिंबयोगभाष्ये व्यासदेवैः सिद्धांतितः चितिशक्तिर
परिणामिन्यप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रांतेव तद्वृत्तिमनुपततीति तस्याश्च प्राप्तचैतन्योपग्रहरू
पाया बुद्धिवृत्तेरनुकारिमात्रतया बुद्धिवृत्त्यविशिष्टा हि ज्ञानवृत्तिरित्याख्यायत इत्यादिना योगवार्त्तिके चैत
दुत्तरतो ऽस्माभिः प्रतिपादितं कश्चित्तु बुद्धिगतया चिच्छायया बुद्धेरेव सर्वार्थज्ञातृत्वं इत्यादि भिन्नज्ञानस्य सामा
नाधिकरण्यानुभावात् अन्यस्य ज्ञानेनान्यस्य प्रवृत्त्यनौचित्याच्चेत्याह तदात्माज्ञानमूलकत्वादुपेक्षणीयं ज्ञाने
नान्यस्य प्रवृत्त्यनौचित्यात् एवं हि बुद्धेरेव ज्ञातृत्वे चिदवसानो भोग इत्यागामिसूत्रद्वयविरोधः पुरुषे प्रमाणा

भावाञ्च पुरुषलिंगस्य भोगस्य बुद्धावेवस्वीकारात् न च प्रतिबिंबान्यथानुपपत्त्या बिंबभूतः पुरुषः सेत्स्यतीति
वाच्यं अन्योन्याश्रयात् पृथक् बिंबसिद्धौ बुद्धिस्थ चैतन्यस्य प्रतिबिंबता सिद्धिः प्रतिबिंबसिद्धौ च तत्प्रतियोगि
तया बिंबसिद्धिरिति अस्मन्मते च ज्ञातत्तया पुरुषस्य ज्ञानं तस्य ज्ञेयत्वान्यथानुपपत्त्या प्रतिबिंबसिद्धौ ना
न्योन्याश्रयः अथ वृत्तिसाक्षितया बिंबरूपश्चेतनः सिध्यतीति चेत् तर्हि साक्षिण एव प्रमातृत्वमुचितमुभयोर्ज्ञा
तृत्वकल्पने गौरवात् वृत्तिज्ञान घटज्ञानयोः सामानाधिकरण्यानुभवाच्च किंच एवं सति बुद्धेरेव भोक्तृतया
भोक्तृभावादि त्यागाभिसूत्रेण भोक्तृतया पुरुषसाधनं विरुध्यते अथ बुद्धिगत चिच्छायारूपेण संबंधेन
बिंबस्यैव ज्ञानं न तु चित्तौ बुद्धिप्रतिबिंबः कल्प्यत इत्येतावन्मात्रे चेत्तस्याशयो वर्ण्यते तदप्यसत् यदि
स्वप्रतिबिंबरूपसंबंधेन जलादिस्थवस्तु भासकत्वा दर्शनात् किरणैरेव तदुभयभासनात् मरीचिकादौ
सुस्पष्टस्तु जलादिभासकत्वात् दृष्टमेवेति दृष्टानुसारेणास्माभिश्चित्तौ बुद्धिप्रतिबिंब एव सर्वार्थभा
नहेतुतया संबंधः क्लृप्त इति यत्रोक्तमन्यस्य ज्ञानेनान्यत्र परस्यनुपपत्तिरिति तदपि न अकर्तुरपि फल
भोगोन्नादिवत् इत्यागाभिसूत्रेण ज्ञानप्रत्ययवैयधिकरण्यदृष्टांतेनोपपादयिष्यमाणत्वात् बुद्धेः संकल्पेन
देहक्रियायामिवात्रापि संयोगविशेषादेव नियमकत्वादिति प्रत्यक्षप्रमाणं लक्षयित्वानुमानं लक्षयति प्रति
बंधदृशः प्रतिबद्धज्ञानमनुमानं ८० प्रतिबंधो व्याप्तिः व्याप्तिदर्शनात् व्यापकज्ञानं वृत्तिरूपमनुमानं प्र
माणमित्यर्थः अनुमितिस्तु पौरुषेय बोधक इति शब्दप्रमाणं लक्षयति आप्तोपदेशः शब्दः ८१ आ
प्तिरत्र यो[illegible]ग्यता वेदस्यापौरुषेयतया पंचमाध्याये वक्ष्यमाणत्वात् तथा च योग्यः शब्दस्तज्जन्यं ज्ञानं
शास्त्रं प्रमाणमित्यर्थः फलं च पौरुषेयः शब्द इति प्रमाण प्रतिपादनस्य स्वयमेव फलमाह उभयसिद्धिः प्र २५

51
1990

माणात्तदुपदेशः ८२ उभयोरात्मानात्मनोर्विवेकेन सिद्धिः प्रमाणादेव भवति अतस्तस्य प्रमाणस्योपदे
शः कृत इत्यर्थः तत्रानुमान विशेषेण प्रमाणमुख्यतोत्र प्रकृतिपुरुषौ विविच्य साधनीयौ तद्वर्णयति सा
मान्यतो दृष्टादुभयसिद्धिः अनुमानं तावत्त्रिविधं भवति पूर्ववत् शेषवत् सामान्यतो दृष्टं चेति तत्र प्रत्यक्षी
कृतजातीयविषयकं पूर्ववत् यथा धूमेन वह्न्यनुमानं वह्निजातीयो हि महानसादौ पूर्वं प्रत्यक्षीकृतः व्यतिरेका
नुमानं च शेषवत् शेषः परिशेषोऽर्थस्य विषयत्वेनास्तीति शेषवत् आप्रसिद्धसाधकमिति यावत् यथा पृथिवीत्वेनेतरभे
दानुमानं पृथिवीतरभेदो हि प्राग्सिद्धः सामान्यतो दृष्टं च तदुभयभिन्नमनुमानं यत्र सामान्यतः प्रत्यक्षादिज्ञातीय
माहाय व्याप्तिग्रहात् पक्षधर्मताबलेन तद्विजातीयं कुठारादि करणमादाय व्याप्तिं गृहीत्वा तद्विजातीयमतींद्रिय
ज्ञानकरणमिंद्रियसाध्यत इत्येवं तत्र सामान्यतो दृष्टानुमानात् अत्र द्वयोः प्रकृतिपुरुषयोः सिद्धिरित्यर्थः तत्र
प्रकृते सामान्यदृष्टमनुमानं यथा महत्तत्त्वसुखदुःखमोहधर्मकद्रव्योपादानकं कार्यत्वे सति सुखदुःखमोहध
र्मकत्वात् स्रक्चंदनादिवत् कुड्यादिवदित्यादि पुरुषेनुयद्यप्यनुमान पक्षनास्ति सर्वसंमतत्वात् तथापि प्रकृत्यादिविवे
कं सामान्यतो दृष्टमेवा पक्षतो न यथा प्रधानं परार्थं संहत्यकारित्वात् गृहादिवदिति अत्रेति प्रत्यक्षसिद्धिरेहाद्यर्थ
कत्वगृहादिषु गृहीतं तद्विजातीयः पुरुषप्रधानादि परत्वेनानुमेयः देहादीनां च भोक्तृत्वमविवेकेनाकगृही
तमिति उभयसिद्धिरिति या प्रमाणस्य फलभूता प्रमा स्यासिद्धिरुक्ता तया पुरुषस्य परिणामापत्तिरिति शंकायां
तस्य स्वरूपमाह चिदवसानो भोगः ८३ पुरुषस्वरूपे चैतन्ये पर्यवसानं यस्य एतादृशो भोगः सिद्धिरित्यर्थः बु
द्धेर्भोगस्य व्यावर्तनाय चिदवसान इति चित्तेः परिणामित्वं सधर्मत्वादि शंकानिरासाया वसानपदं चित्तो भोग
स्य स्वरूपे पर्यवसितत्वात् न कौटस्थ्यादिहानिरत्याशयः तथा हि प्रमाणारब्धवृत्त्यारूढं प्रकृतिपुरुषादिकं

सां·भा·
२६

प्रमेयं च स्यात् पुरुषे प्रतिबिंबितं सत् भासते अतोऽर्थोपरक्तवृत्तिप्रतिबिंबावच्छिन्नस्वरूपचैतन्यमेव भानं
पुरुषस्य भोगः प्रमाणस्य च फलमिति तत्त्वश्च प्रतिबिंबरूपेणार्थसंबंधद्वारतया वृत्तीनां कारणत्वमिति तदुक्तं
विष्णुपुराणे गृहीतानींद्रियैरर्थानात्मने यः प्रयच्छति अंतःकरणरूपाय तस्मै विश्वात्मने नम इति राज्ञोऽपि हि
करणवर्गः स्वामिने भोग्यजातं समर्पयतीति दृष्टमिति भोगश्चात्रार्थः स्वाभ्यवहरणं आसाक्षात्करणमिति या
वत् स च देहादिचेतनांतेषु साधारणः विशेषस्तु परिणामित्वात्पुरुषस्य विषयभोगः प्रतिबिंबादानमात्रं अ
न्येषां तु परिणामित्वात् पुंड्रस्यादिरपीति अयमेव च परिणामरूपः पारमार्थिको भोगः पुरुषे प्रतिषिध्यते बुद्धे
भोगः नात्मना साक्षिभिरिति मंतव्यं अस्मिंस्तंत्रे पुरुषस्यापि फलव्याप्यतासिद्धांताद्विरवसानताया एव तदुभयसिद्धि
त्ववचनादिनानुकर्तरि च लोके क्रियाफलभोगो दृष्टः यथा संचरन् चर संचारो स्थ दुःखभोग इति न तत्कथं बुध्य कृतं
धर्मादिफलस्य सुखाद्यात्मिकाया अर्थोपरक्तबुद्धिवृत्तेर्भोगः घटेत इत्याशंकायामाह अकर्तुरपि फलोपभोगो
ऽन्नाद्यवत् ०४ बुद्धिकर्मफलस्यापि वृत्तिरूपभोगः वरं कर्तुरपि पुरुषस्य युक्तः अन्नाद्यवत् यथा अन्नकृतस्यान्ना
देरूपभोगो राज्ञो भवति तद्वदित्यर्थः अविवेकस्य स्वस्वामिभावस्य वा भोगनियमकत्वात् नातिप्रसंगः सुखदुः
खादेः कर्मफलत्वमभ्युपेत्य बुद्धिगतं कर्मफलं पुरुषो भुंक्त इत्युक्तं इदानीं पुरुषगतभोगस्यैव कर्मफलत्वं स्वीकृत्य
बुद्धिकर्मणा पुरुष एव फलमुपयत इति मुख्यसिद्धांतमाह अविवेकाद्वा तत्सिद्धेः कर्तुः फलावगमः ०५ अथवा
कर्तुरपि फलमेव न भवति सुखं भुंजीयेत्यादिकामनाभिर्भोगस्यैव फलत्वात् अतो भोक्तृनिष्ठमेव फलं भवति शा
स्त्रविहितं फलमनुष्ठातरीति शास्त्रेषु कर्तुः फलावगमस्तु तत्सिद्धेः अकर्तरि निष्ठाया भोगान्यसिद्धेः कर्तृबुद्धा
वविवेकात्सिद्धेरित्यर्थः योऽहंकारो मिस एवाहं भुंज इति हि लौकिकानुभव इति या च सुखं मे भूयादित्यादिकाम २६

53/1990

नासा पुत्रो मे भूयादित्यादिकफलसाधनत्वेनैवोपपद्यते भोगस्तु नान्यस्य साधनं अतः स एव फलमिति मुख्यसिद्धां
तः भोगस्य पुरुषस्वरूपत्वेति वैशेषिकाणां श्रोत्रवत्कार्यताबोध्या सुखाद्यवच्छिन्नचित्तेरेव भोगत्वात् अस्मिंश्च भो
गस्य पुरुषस्वरूपफलत्वपक्षे दुःखभोगाभाव एवापवर्गो बोध्यः अथवा भोग्यतारूपस्वत्वसंबंधेन सुखदुःखाभाव
योरेव फलत्वमस्तु तेन संबंधेन धर्मादेरिव सुखादेरपि पुरुषनिष्ठत्वादिति तदेवं प्रमाणानि प्रमाणफलं च तां प्रमेयप्र
सिद्धं च प्रतिपाद्य प्रमेयसिद्धेरपि फलमाह नोभयं च तत्त्वाख्याने ०६ प्रमाणेन प्रकृतिपुरुषयोस्तत्त्वाख्याने तत्सा
क्षात्कारे सति उभयमपि सुखदुःखे न भवतः विद्वान् हर्षशोकौ जहातीति श्रुते उभयं सुखदुःखे न स्यातामित्यर्थः संक्षेप
तो विवेकेनानुमापितौ प्रकृतिपुरुषौ तयोः प्रकृतिपुरुषयोरनुमानेनैवांतरविशेषाः इतः परमध्यायसमाप्तिं याव
द्विचार्याः तत्रादौ प्रकृत्याद्यनुमानेष्वनुपलंभं बाधकमपाकरोति विषयोऽविषयोऽप्यतिदूरादेर्हानोपादानाभ्यामिं
द्रियस्य ०७ इंद्रियाऽनुपलभ्यतामात्रतो घटाद्यभाववत्प्रत्यक्षेण चार्वाको प्रकृत्याद्यभावः साधयितुं न शक्यते त
तद्योग्यविद्यमानोऽप्यर्थ इंद्रियाणां कालभेदेन विषयोऽविषयश्च भवति अतिदूरत्वादिदोषात् इंद्रियघातेंद्रियनियाम्यां
वेत्यर्थः सामग्र्यसमवधाने सत्यनुपलंभ्यस्याभावप्रत्यक्षहेतुता प्रकृत्याद्युपलंभे तु वक्ष्यमाणप्रतिबंधात् सा
मग्र्यसमवधानमिति भावः अतिदूरादयश्च दोषा विज्ञाप्यकारिकया गणिताः अतिदूरात्सामीप्यादिंद्रियघा
तान्मनोऽनवस्थानात् सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्चेति समानाभिहारः सजातीयसंमेलनं यथा मा
हिषे गव्यमिश्रणान्माहिषत्वाग्रहणमिति ननु अतिदूरत्वादिमध्ये प्रकृत्याद्युपलंभे किं बाधकमिति तत्राह सौक्ष्म्या
त्तदनुपलब्धिः ०८ तयोः पूर्वोक्तयोः प्रकृतिपुरुषयोरनुपलब्धिस्तु सौक्ष्म्यादित्यर्थः सूक्ष्मत्वं च नाणुत्वं विभुत्वा
पत्तावपि दुरूहत्वादिकं दुर्वचत्वात् किंतु प्रत्यक्षप्रमाप्रतिबंधिका जातिः योगजधर्मस्य चोत्तेजकतया प्रकृति

पुरुषादीनां प्रत्यक्षप्रमाभवति व्रातिसां कार्यं नचदोषावहं अथवानिरवयवद्रव्यत्वेसत्यत्रसूक्ष्मत्वयोगानधर्मश्चो
तेजकत्वे तिवच्चभावादेवानुपलब्धिसंभवे किमर्थं सोक्ष्म्यं कल्प्यते अन्यथा च शशशृंगादेरपि सोक्ष्म्यादनुपलब्धिः
किंनस्यादितितत्राह कार्यदर्शनात्तदुपलब्धिः ९९ कार्यान्यथानुपपत्त्या प्रकृत्यादिसिद्धेः सत्सां तेषां सूक्ष्मत्वं
कल्प्यते अनुमानात्सर्वंच सूक्ष्मत्वादिसंशयनाभावात्निर्णयात् अनुमानमुपपद्यत इत्यर्थः अत्रशंकते वादिप्रति
पत्तेस्तत्त्वसिद्धिरितिचेन्नु १०० ननुकार्यं चेदुत्पत्तेः प्राक्सिद्धं स्यात्तदा तेन धारतया तिसा प्रकृतिः सेत्स्यति कार्यं
साहित्येनैवकारणानुमानस्य वक्ष्यमाणत्वात् वादिविप्रतिपत्तेस्तुसत्कार्यस्यैवासिद्धिरिति यदीत्यर्थः अभ्युपे
त्यपरिहरति तथाप्येकतरदृष्ट्या एकतरसिद्धेर्नापलापः १०१ मास्तुसत्कार्यं तथापि एकतरस्य कार्यस्यासिद्ध्या
कारणस्यासिद्धेरपलापोनास्त्येवेतिनिस्सं कारणंसिद्धमेवनतु एवचपरिणामिनः सकाशात्परिणामितयापुरुस्य
विवेकेनमोक्षोपपत्तिरित्यर्थः अनेनैवाभ्युपगमवादेनवैशेषिकाद्यास्तिकशास्त्रं प्रवर्तते अतोनसत्कार्यवादि
श्रुतिस्मृतिविरोधेपितेषांमशांतरेष्वर्थेप्रमाणमितिमंतव्यंपरमार्थतः परिहारमाह त्रिविधविरोधापत्तेश्च
१०२ सर्वं कार्यं त्रिविधं सर्ववादिसिद्धं अतीतमनागतंवर्तमानमिति तत्रयदि कार्यं सदासत्त्वेष्यते तदात्रिवि
धत्वानुपपत्तिः अतीतादिकाले घटाद्यभावेन घटादेरतीतत्वादिधर्मकत्वानुपपत्तेः सदसतोसंबंधानुप
पत्तेः किंचिद्प्रतियोगित्वस्य प्रतियोगिस्वरूपत्वेन दोषतादवस्थ्यात् अभावमात्रस्वरूपत्वेघटाद्यभावोपिघ
टाद्यभावः स्यात् अभावत्वाविशेषात् अभावेष्वपिस्वरूपतो विशेषांगीकारेवाभावत्वस्य परिभाषामात्रत्वप्र
संगात् अथप्रतियोग्येवभावविशेषः कइतिचेन्न असतः प्रतियोगिनः प्राक्अभावादिषु विशेषकत्वासंभवा २८
दिति तस्मान्नित्यसतोपि कार्यस्यातीतानागतवर्तमानावस्थाभेदाएव वक्तव्याः घटोतीतो घटोवर्तमानो घटो

55
1990

भविष्यतीतिप्रत्ययानां तुल्यरूपत्वौचित्यात् नत्वेकस्य भावविषयत्वं अन्ययोश्चाभावविषयत्वमिति तेएवातीता
न नागतवस्थेध्वंसप्रागभावव्यवहारं जनयतः तदतिरिक्ताभावद्वये प्रमाणाभावादिति दिक् अधिकं तुप
तंजलेद्रष्टव्यं एवमेसंताभावान्योन्याभावावपिआधिकरणस्वरूपावेवतत्रैवं प्रतियोगिसंबंधाकालेप्य
धिकारणस्वरूपानपायात् असंताभावप्रत्ययप्रसंगइतिवाच्यं परैरपिप्रतियोगिमतिदेशेतदत्यंताभावा
नंगीकारात् प्रतियोगिसंबंधस्यातीतानागतावस्थयोरेवसामयिकात्यंताभावत्वसंभवाच्च तस्मात्रास्मत्सि
द्धांते भावोतिरिक्तः किंचघटो ध्वस्तो नायंघटः घटोत्रनास्तीत्यादिप्रत्ययनियामकतयाकिंचित् वस्त्वाकां
क्षायां नभावरूपमेव कल्प्यते लाघवात् अभावस्यात्वस्य कल्पनेगौरवादितिमंतव्यं अतश्चसत्कार्यसिद्धि
रित्याह नासदुत्पादोनृशृंगवत् १०३ नरशृंगतुल्यस्यासत उत्पादोपि नसंभवतीत्यर्थः अत्रहेतुमाह उपा
दाननियमात् १०४ मृदेवघटउत्पद्यते तंतुष्वेवपटायत्सर्वं कार्याणां उपादानकारणे प्रतिनियमोस्तिस संभवति उत्पत्तेः प्राक्कारणे कार्यसत्तायां हि नकोपिविशेषोस्तियेन कंचिदेवासंतं जनयेत् नेतरमिति विशे
षांगीकारेचभावत्वापत्तेगर्तमसत्तयासएवचविशेषोस्माभिः कार्यस्यानागतावस्थेत्युच्यत इति एतेन
यद्वैशेषिकाः प्राक् आभावमेवकार्योत्पत्तिनियामकं कल्पयंति तदप्यपास्तं अभावकल्पनापेक्षया भा
वकल्पनेलाघवात् भावानां दृष्टत्वात् अन्यानपेक्षत्वाच्च किंचअभावेषु स्वतोविशेषाभावत्वापत्तिः प्रतियो
गिरूपविशेषश्च प्रतियोग्यसत्ताकालेनास्ति अतोभावानामविशिष्टतयानकार्योत्पत्तौ नियामकत्वं युक्त
मिति उपादाननियमप्रमाणमाह सर्वत्रसर्वदासर्वासंभवात्क्रमं १०६ उपादाननियमेचसर्वसंभवेदि
याशयः इतश्चनासदुत्पाद इत्याह शक्तस्यशक्यकरणात् १०६ कार्यशक्तिमत्त्वमेवउपादानकारणत्वंअ

न्यस्य दुर्वचत्वात् लाघवाच्च साच शक्तिः कार्यस्यानागतावस्थैवेसतः शक्तस्य शक्यकार्यकारणात् नासदुत्पाद
इत्यर्थः इतश्च कारणभावाच्च १०७ उत्पत्तेः प्रागपि कार्यस्य कारणाभेदः श्रूयते तस्माच्च सत्कार्यसिध्या नास
दुत्पाद इत्यर्थः कार्यस्यासत्वेहि सदसतोरभेदानुपपत्तिरिति उत्पत्तेः प्राक्कार्याणां कारणाभेदश्च श्रुतयः तद्धेदं
तर्ह्यव्याकृतमासीत् सदेव सौम्येदमग्र आसीत् स एवेदमग्र आस आप एवेदमग्र आसुः इत्याद्याः शांकतेन भा
विभोविकवियोगश्चेत् १०८ नन्वेवं कार्यस्य नित्यत्वे सति भावरूपे कार्ये भावयोग उत्पत्तियोगो न संभवति असतः स
त्त्वयोगो वोत्पत्तिः व्यवहारादिति चेदित्यर्थः परिहरति नाभिव्यक्तिनिबंधनो व्यवहाराव्यवहारौ १०९ कार्योत्पत्तेः
व्यवहाराव्यवहारौ कार्याभिव्यक्तिनिमित्तकौ अभिव्यक्तितः उत्पत्तिव्यवहारो भिव्यक्त्यभावाच्चोत्पत्तिव्यवहाराभा
वो नत्वसतः सत्वयेत्यर्थः अभिव्यक्तिश्च न ज्ञानं किंतु वर्तमानावस्था कारणव्यापारोपि कार्यस्य वर्तमानलक्षण
परिणाममेव जनयति सतश्च कार्यस्य कारणव्यापारादभिव्यक्तिमात्रं लोकेपि दृष्टं यथा शिलामध्यस्थ प्रति
मायाश्शैंगिकर्मापारेणाभिव्यक्तिमात्रं तिलस्थतैलस्य च निष्पीडनेन धान्यस्थतंडुलस्यावघातेनेति तदुक्तं
वासिष्ठे सुषुप्तावस्थया चक्रफलरेखा शिलादरे यथास्थिता चितेरंतस्तथेयं जगदावलीति प्रकृतिद्वारेणे
त्यर्थः ननु भवतूत्पत्तेः प्राक्सत्त्वतः यथाकथंचिदुत्पत्तिः स्वनाशादिभावस्य कथंस्यादित्याकाङ्क्षायामाह नाशः
कारणलयः ११० लीङ् श्लेषणे इत्यनुशासनात् लय सूक्ष्मतया कारणेष्वविभागः स एव प्रागतात्स्यो नाश इत्य
र्थः अतएव अनागतास्य लय प्राक् अभाव इत्युच्यत इति विशेषः लीनकार्यस्य तु प्राक् आभावः पुन २८
रभिव्यक्तिर्नास्ति प्रत्यभिज्ञाद्यपत्यपातं जलेनिराकृतत्वात्परेषामिवास्माकमप्यनागतावस्थायाः प्राग
भावाख्याया अभिव्यक्ति हेतुत्वाश्रेति नत्वतीतमप्यस्ति इत्यत्र किं प्रमाण मत्राह नागत सता यामिव श्रुत्साद

57
1990

योनीनसत्त्वतायामपि स्फुटमुपलभ्यत इति मेवं योगी प्रत्यक्षं त्वान्यथानुपपत्त्याऽनागतानीतयोरुभयोरेवसत्ता
सिद्धेः प्रत्यक्षसामान्ये विषयस्य हेतुत्वात् अन्यथा वर्तमानस्यापि प्रत्यक्षेणासिध्यापत्तेः तस्माद्विषमो सर्गकृता
मायेप्यनासत्तिबाधके योगिप्रत्यक्षेणातीनिमप्यस्तीति सिध्यति योगिनामतीतानागतप्रत्यक्षे च श्रुतिस्मृती तीह
सादिकं प्रमाणं योगवार्तिके प्रपंचितं इति दिकूनदेवमभिव्यक्तिलयाभ्यां कायाणामुत्पत्तिनाशव्यवहारावुक्तौ न
त्वभिव्यक्तिरपि पूर्वं सती वा असती वा अधिकरणव्यापारात् प्रागपि कार्यस्याभिव्यक्त्यास्य कार्यजनकत्वापत्तिः का
रणव्यापारश्च निष्फलः अंत्ये चाभिव्यक्तावेवासत्कार्यसिद्धान्तक्षतिः असत्या एवाभिव्यक्तेरर्थिक्रियायोगीकारा
दिति अन्योन्यने कारणव्यापारात् प्राक्सर्वकार्याणां सत्त्वसत्त्वाभ्युपगमेनोक्तविकल्पानवकाशात् घटवदभिव्य
क्तेरपि वर्तमानावस्था प्रागसत्त्वेन न दसता निरस्यर्थ कारणव्यापारापेक्षणात् अनागतावस्थया च सत्कार्य
सिद्धान्तस्याक्षतेः नन्वेकदा सदसत्त्वयो विरोध इति चेत् प्रकारभेदस्योक्तत्वात् नन्वेवमपि प्रागभावानंगीकारेण प्रा
गसत्त्वमेव कार्याणां दुर्वचं स्यादिति मेवं अवस्थानामेव परस्परं परस्पराभावरूपत्वादिति ननु सत्कार्यसिद्धान्त र
क्षार्थं अभिव्यक्तेरप्यभिव्यक्तिः इष्टव्या तथा चानवस्थेत्याशंकायामह पारंपर्यतोन्वेषणात् बीजांकुरवत् १११
पारंपर्यतः परंपरारूपेणाभिव्यक्तेरनुधावनं कर्तव्यं बीजांकुरवत् प्रामाणिकत्वेन चास्या अदोषत्वादित्यर्थः बी
जांकुराभ्यां चायमेव विशेषो यद्बीजांकुरस्थले क्रमिकपरंपरया नवस्थाभिव्यक्तौ चेककालीन परंपरयेति प्रा
माणिकत्वं तु तुल्यमेवेति सर्वकार्याणां स्वरूपतो नित्यत्वमवस्थाभिः विनाशित्वं चेति पातंजलभाष्ये व्यदर्भि
व्यासदेवरपि यथमवस्था प्रामाणिकत्वेन स्वीकृतेति अर्थं च बीजांकुरदृष्टांतो लोकदृष्टोपन्यस्तो वस्तुजन्म
कर्मादिष्वत्रैव नात्सर्यं तेन बीजांकुरप्रवाहस्यादिसर्गावधिकत्वे नानवस्थाविरहेपि नक्षतिः आदिसर्गेहि

त्पत्तेर्विनेव बीजमुत्पद्यते हिरण्यगर्भसंकल्पेन तच्छरीरादिभ्य इति स्मृत्योः प्रसिद्धं यथा हि पादयो मूलस्कं
धशाखादिसंयुतः आदिबीजात् प्रभवति बीजान्यन्यानि वै ततः इति विष्णुपुराणादिवाक्यैरिति वस्के तस्त
नवस्थापि नास्तीत्याह उत्पत्तिवद्वाऽदोषः १।१२१ यथा घटोत्पत्तेरुत्पत्तिः स्वरूपमेव वैशेषिकादिभिरस्तु उत्पा
दवादिभिरिष्यते लाघवात् तथैवास्माभिः घटाभिव्यक्तेः रभिव्यक्तिस्वरूपमेवेष्यते लाघवात् असदुत्पत्ता
विवाभिव्यक्तावपि नानवस्थादोष इत्यर्थः अथैवं अभिव्यक्तिरभिव्यक्तिस्वरूपाङ्गीकारे कारणव्यापारा
त्प्राक् तस्य सत्त्वानुपपत्त्या सत्कार्यवादक्षतिरिति चेन्न अस्मिन्पक्षे सतएवाभिव्यक्तिरित्येव सत्कार्यसिद्धांत
इत्याशयात् अभिव्यक्तेश्चाभिव्यक्त्यभावेन तस्याप्रागसत्त्वेपि नासत्कार्यवादत्वापत्तिः नन्वेवं महदादीनामे
व प्रागसत्त्वमिष्यतां किमभिव्यक्त्या स्वायवस्थाकल्पनेनेति चेन्न तथैवं तर्ह्यव्याकृतमासीदित्यादिश्रुतिभिर
व्यक्तव्यवस्थायाः सतामेव कार्याणामभिव्यक्तिसिद्धेः अथाप्यभिव्यक्तेः प्रागभावादिस्वीकारापत्तिरिति चे
न्न तिसृणामनागतादिव्यवस्थानामन्योन्यमन्योन्यस्याभावरूपायोक्तत्वात् तादृशाभावनिरूपसैव च कारणव्या
पारसाफल्यादिसंभवात् अयमेव हि सत्कार्यवादिनामसत्कार्यवादिभ्यो विशेषो यत्तैरुच्यमानौ प्रागभा
वप्रध्वंसौ सत्कार्यवादिभिः कार्यस्यानागतातीतावस्थे भावरूपे प्रोच्येते वर्तमानताख्या चाभिव्यक्त्यव
स्था घटत्वव्यतिरिक्तेष्यते घटादेस्त्ववस्थात्रयवत्त्वानुभवादिति अन्यत्तु सर्वसमानं अतो नास्त्यस्मात्स्वाधि
कगौरवकाशा इति दिक् कार्यदर्शनात्तदुपलब्धेरिति सूत्रेण कार्यं मूलकारणमनुमेयमित्युक्तं तत्र
किंस्वरूपं तत्कार्यमित्यवधारयितुं सर्वकार्याणां साधर्म्यमाह हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रि
तं लिंगं १।१२ कारणानुमापकत्वाल्लिंगं यत्तन्महदादिलिंगं कार्यजातं नतु महत्तत्त्वमात्रमत्र विवक्षितं हे

३९

59/1990

महदादीनामखिलकार्यसाधारण्यात् हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं तथा च तल्लिंगं सावयवं परतं
त्रं व्यक्तं विपरीतमव्यक्तमिति कारिकायामप्येतदेव व्यक्ताख्यं सर्वकार्यमेव लिंगमित्युक्तं तथा च तल्लिंग हेतुमत्त्वादि
धर्मकमिति वाक्यार्थः तत्र हेतुमत्त्वं कारणवत्त्वं विनाशित्वं प्रधानस्य यावद्व्यापिताद्वर्त्तिकानहेतुपरिस्थमव्यापित्वं स
क्रियत्वं अध्यवसायादिरूपप्रतिनियतकार्यकारित्वं प्रधानस्य तत्सत्त्वं क्रियासाधारण्यमेककारणत्वाच्च कार्यै
कदेशमात्रकारित्वं न च सक्रियाकृमैव च वक्तुं शक्यते प्रतिक्षोभात्तत्सृष्टिश्रवणेन प्रकृतेरपि कर्मवत्तया अतः सक्रि
यात्वापत्तिरिति अनेकसर्गभेदेनभिन्नत्वं सर्गद्वयासाधारण्यमिति यावत् न तु पुनः सजातीयानेकव्यक्तिकत्वं
प्रकृतावपि व्याप्तेः प्रकृतेरपि सत्त्वाद्यनेकरूपत्वात्सत्त्वादिनामनधर्मत्वं तद्रूपत्वादित्यागामिसूत्रादिति अश्रि
तत्वं चावयवेष्विति कार्यकारणयोर्भेदे हेतुमत्त्वं सिध्यतीत्यतः कारणातिरिक्तकार्यसिद्धौ प्रमाणान्याह आ
ञ्जस्यादभेदतो वा गुणसामान्यादेस्तत्सिद्धिः प्रधानव्यपदेशाद्वा १।१४ तत्सिद्धिर्लिंगाख्यकार्यस्य कारणाति
रिक्ततः सिद्धिः कृतिरांजस्यात्प्रत्यक्षेणैवानायासेन भवतीत्यर्थः कोसादिनोत्तत्वादिभ्यो धर्मेण प्रहादीनां कचि
च्च गुणसामान्यादेरभेदतो गुणसामान्याद्यात्मकत्वेन लिंगेन नानुमानेन भवतीत्यर्थः अध्यवसायादिगुणात्मकत्व
रूपेण कारणत्वे धर्मेण महदादीनां यथा च महापृथिवीत्वादिसामान्यात्मकत्वरूपेण तन्मात्रत्वधर्मेण पृथिव्यादी
नां क्वचित् आदिशब्दग्राह्यैतेन कर्मात्मकत्वाद्यधर्मेण यथा क्रियाऽवयवेभ्योऽतिरिक्तस्य चैकस्यावयविनस्तथा
प्रधानव्यपदेशात्प्रधानश्रुतेरपि कारणातिरिक्तकार्यसिद्धिर्भवति प्रधीयतेऽनेन स्मिन्निति कार्यजातं प्रधानमुच्य
ते न च कार्यकारणयोर्भेदाभेदौ विना न घटेते अत्यंताभेदस्यासाधारणत्वासंभवादित्यर्थः कार्याणां साधर्म्यरूप
लक्षणं कारणातिरिक्तकार्ये प्रमाणं च सूत्राभ्यां दर्शितमिदानीं कार्यसधर्मकतया कारणानुमानाय कार्यका

सां॰भा॰ ३०

रणयोरपि साधर्म्यं प्रदर्शयंति त्रिगुणाचेतनत्वादि द्वयोः ११५ द्वयोः कार्यकारणयोस्त्रिगुणत्वादिकं सा
धर्म्यमित्यर्थः अदिशब्दग्राह्याश्च कारिकायामुक्ताः त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि व्य
क्तं तथा प्रधानं तद्विपरीतस्तथा च पुमानिति त्रयः सत्वादिद्रव्यरूपा गुणाः अत्रसंतीति त्रिगुणं तत्राह द्वादि
षु कारणरूपेण सत्वादीनामवस्थानं गुणत्रयसमष्टिरूपेण तु प्रधाने सत्वादीनामवस्थानं वनेवृक्षवदेशावगंतव्यं
अथवा सत्वादिशब्देन सुखदुःखमोहानामपि वचनात्कार्यकारणयोः त्रिगुणत्वं समंजसमिति अविवेकि विषयो
ऽजैरवहृत्यं भोग्यामिति यावत् अविवेकित्व विषयत्वे निरूढे तु अविवेकित्वं संभूयकारित्वं विषयत्वं भोग्यत्वमे
व सामान्यं सर्वपुरुषभेदेष्वभिन्नमिति यावत् प्रसवधर्मि परिणामि व्यक्तं कार्यं प्रधानं कारणमित्यर्थः कार्य
कारणयोरन्योन्यवैधर्म्यमपि कारिकया दर्शितं हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिंगं सावयवं प
रतंत्रं व्यक्तं तद्विपरीतमव्यक्तमिति अत्रैकत्वं सर्गभेदस्याभिन्नत्वं अतः प्रकृतेरनेकव्यक्तिकत्वेपि नैकत्वक्ष
तिः महांतं च समावृत्य प्रधानं समवस्थितं अनंतस्य न तस्यांतः संख्यानं चापि विद्यते इति विष्णुपुराणेन
असंख्येयत्वावचनात् प्रधानस्य व्यक्तिबहुत्वसिद्धिरिति प्रधानाख्यानां जगत्कारणगुणानां अन्योन्यवि
वेकाय तेषां अवांतरमपि वैधर्म्यं सिद्धांतयति विविधजगत्कारणत्वोपपत्तये च नस्यैकरूपात्कारणाद्विचि
त्रकार्याणि संभवंतीति प्रीत्यप्रीतिविषादाद्यैः गुणानामन्योन्यं वैधर्म्यं ११६ गुणानां सत्वादिद्रव्य ३०
याणामन्योन्यं सुखदुःखमोहाद्यैः रजो नाम शोकतापनोदस्तंभोद्वेगद्वेषामानादिलक्षणमनंतभेदं स
मासतो दुःखात्मकं तमो नामाच्छादनावरणबीभत्सादैन्यगौरवालस्यनिद्राप्रमादापहादिलक्षणानंत
भेदं वैधर्म्यं कार्येषु नदर्शनादित्यर्थः सुखादिकं च घटादेरपि रूपादिवद्धर्मो नः करणोपहानत्वादन्य

61/1990

काद्यभावात्मिकं अत्र यत्राद्यशास्त्रप्रास्ताः पंचशिखाचार्यैरुक्ताः यथा सत्वं नाम प्रसादलाघवाभिष्वंगप्रीतितिति
क्षासंतोषादिरूपानंतभेदं समासतः सुखात्मकं एवं रजोपि शोकादिनानाभेदं समासतो दुःखात्मकं एवं तमोपि
निद्रादिनानाभेदं समासतो मोहात्मकमिति अत्र प्रीत्यादीनां गुणधर्मत्ववचनाद्रागादिमिसत्र चलघुत्वादेः वक्ष्य
माणत्वात् सत्वादीनां द्रव्यत्वं सिद्धं सुखाद्यात्मकता गुणानां मनसः संकल्पात्मकतावद्धर्मधर्म्यभेदाद्बोध्यतेन
तु वैशेषिकोक्ताः सुखादय एव सत्वादिगुणा इति सत्वादित्रयमपि प्रत्येकव्यक्तिभेदादनंतं अन्यथा हि विभुमात्र
त्वे गुणविमर्दवैचित्र्यात्कार्यवैचित्र्यमिति सिद्धांतो नोपपद्यते अभिमर्दे अवांतरभेदासंभवात् गुणानां सत्वादी
नामेकैकव्यक्तिमात्रत्वे च दिक्कालादिकं नोपपद्यते तथा परिच्छिन्नत्वे च तन्महद्रूपस्य प्रधानस्य परिच्छिन्नत्वा
पत्त्या श्रुतिस्मृतिसिद्धमनंतासंख्यब्रह्मांडादिकं नोपपद्येत अतो संख्यत्वेपि गुणानां त्रित्वसंख्योपपादनाय
विवेकार्थं च तेषां साधर्म्यवैधर्म्ये प्रतिपादयति लघ्वादिधर्मैः साधर्म्यं वैधर्म्यं च गुणानां अथमर्थः लघ्वा
दिति भावप्रधानो निर्देशः लघुत्वादिधर्मेण सर्वासां सत्वव्यक्तीनां साधर्म्यं वैधर्म्यं च रजस्तमोभ्यां तथा च पृथि
वीव्यक्तीनां पृथिवीत्वेनैव सत्वव्यक्तीनां एकसजातीयतया एकतासजातीयोपष्टंभादिना वृद्धिः कासादिकं च यु
क्तमित्याशयः एवं चलत्वादिधर्मेण सर्वासां रजोव्यक्तीनां साधर्म्यं सत्वतमोभ्यां च वैधर्म्यं शेषं पूर्ववत् एवंगु
रुत्वादिधर्मेण सर्वासां तमोव्यक्तीनां साधर्म्यं सत्वरजोभ्यां वैधर्म्यं शेषं पूर्ववदिति वैधर्म्यस्य प्रागेवोक्तत्वात् अत्र
पुनर्वैधर्म्यकथनं संपातायातं अत्रैव धर्म्यं चेति पाठः आमादिकृएवेति अत्र सत्वसत्वादीनां कारणद्रव्याणां प्र
त्येकमनेकव्यक्तिकत्वं सिद्धं अन्यथा लघुत्वादीनां साधर्म्यत्वानुपपत्तेः समानानां धर्मस्यैव साधर्म्यत्वात् च का
र्यसत्वादीनामनेकत्वात् लघुत्वादिकं साधर्म्यं स्यादिति वाच्यं त्रिगुणात्मकत्वेन घटादीनामपि कार्यसत्वादी
नां सत्वादिसाधर्म्यत्वानुपपत्तेः तस्मात्कारणगुणानामेवात्र साधर्म्यादिकमुच्यत इति सत्वादीनां लघुत्वं चो

कं कापिकयासत्त्वं लघुप्रकाशकमिष्टमुपष्टंभकं चलं च रजः गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्ति
रिति अर्थतः पुरुषार्थनिमित्तात् नन्वेवं मूलकारणस्यपरिच्छिन्नापरिच्छिन्नासंस्थ्यव्यक्ति रूलेवंशेषिकमता
द्यशेषिकाभिमतमूलकारणस्य भूतपंचकस्य परिच्छिन्नापरिच्छिन्नोभयरूपत्वात् अविशेषइत्यर्थः अत्र को
विशेष इति चेत्कारणद्रव्यस्य शब्दस्पर्शराहित्यमेव शब्दस्पर्शविहीनं तु रूपादिभिरसंयुतं त्रिगुणं त्रिजगयो
निरनादिप्रभवाप्ययं इति विष्णुपुराणादिभ्यः एतच्च पातंजलैस्माभिः प्रपंचितं ननु महदादीनां स्वरूप
तः सिद्धावपि तेषां प्रायेणास्मदर्शनात् कार्यत्वेनास्ति प्रमाणं येन तेषां हेतुमत्त्वसाधर्म्यं स्यात् तत्राह उभया
न्यत्वात् महदादिपंचभूतान्तं विशेषस्य दं तावत् पुरुषाभोग्यत्वात् नापिप्रकृतिर्मोक्षान्यथानुपपत्त्या विना
शित्वात् अतः प्रकृतिपुरुषभिन्नं तद्भिन्नत्वाच्च कार्यं घटादिवदित्यर्थः ननु विकारशक्तिदाहादिनैव मोक्ष
स्युपपत्तेः विनाशित्वमपि तेषामसिद्धमित्याशंक्य तां कार्यत्वे हत्वंतराण्याह परिमाणात् ११९ परिच्छिन्न
त्वादृशिकाभावप्रतियोगितावच्छेदकजातिमत्त्वादित्यर्थः तेन गुणस्य कोऽनोमपि कार्यतानां परिच्छिन्नत्वेपि न
व्यभिचारः किंच समन्वयात् १२० उपवासादिना क्षीणो रिष्टु धान्यादित्वमन्नादिभिः समन्वयेन समनुग
गमनेन पुनरुपचीयते अतः समन्वयात् कार्यत्वमनुमीयत इत्यर्थः नित्यस्य निरवयवतया अवयवानुप्रवे
शारूपः समन्वयो न घटत इति समन्वये चश्रुतिः प्रमाणमतः प्रकृत्यवंते साम्यपोडशानां कालानामेक
कालाति शिष्टा सूक्ष्मा तेनोपसमाहिता प्राज्वाली दितियोगसूत्रे च जात्यंतरपरिणामः प्रकृत्या पूरादिति
किंच शक्तितश्चेति १२१ करणत्वश्चेत्यर्थः पुरुषस्य यत्करणत्वं कार्यं च चक्षुरादिवदिति भावः पुरुषे साक्षा ३७
त्कृष्यार्थकर्तृत्वं कृतेत्वात्तोनि प्रकृतिर्न करणमिति अतो महत्तत्त्वस्य करणतया कार्यत्वसिद्धसुलाममन्ये
यामपि कार्यत्वे इति शद्धत्वश्चात्र हेतुवर्गसमाप्तिसूचनार्थः यदि च महदादिमध्ये किंचित्कार्यत्वानि

63
1990

येन तदापि तदेव प्रकृतिः पुरुषाविति सिद्धं न समीहितं प्रकृतिपुरुषौ प्रसाध्य परिणामित्वापरिणामित्वा
भ्यां विवेकख्यातिरसिद्धेवास्माकं तास्यादित्याह तदाने प्रकृतिपुरुषौ वा १२२ तदानं कार्यत्वहाने यदि परिणा
मी भोक्तानदा पुरुष इत्यर्थः ननु नित्यमप्युभयभिन्नं स्यात् तत्राह तयोरन्यत्वे तु छलं १२३ अकार्यस्य प्रकृति
पुरुषभिन्नत्वे तु छलं शशशृंगादिवत्प्रमाणाभावात् आवार्यकारणतया भोक्तृतया वा सिध्यति नान्यथेत्यर्थः
तदेवं महदादिषु कार्यत्वं प्रसाध्य सांप्रतं तेः प्रकृत्यनुमाने अनुक्तं विशेषमाह कार्यात्कारणानुमानं तत्साहि
त्यात् १२४ कार्यात्महत्तत्त्वादेर्लिंगात्सामान्यतो दृष्टकारणानुमानं युक्तं तनाद्स्य निश्चये तत्साहित्यात्का
र्यसाहित्येन तत्कर्तृत्वं सदेवसौम्येदमग्र आसीत्तम एवेदमग्र आसीदित्यादिश्रुत्यनुसारात् तथा हि महदादि
कं स्वोपहितत्रिगुणात्मकस्वरूपादानकं कार्यत्वात् शिलामध्यस्थप्रतिमावर्तेलादिवदित्यर्थः अत्रानुकूल
तर्कः प्रागेवदर्शितः तस्याः प्रकृतेः कार्यादिधर्म्यं विवेकार्थमाह अव्यक्तं त्रिगुणाल्लिंगात् १२५ अभिव्यक्त
त्रिगुणात्महत्तत्त्वादप्रधिमूलकारणमव्यक्तं सूक्ष्मं महत्तत्त्वस्य हि मुख्यादिगुणः साक्षात्क्रियते प्रकृते प्रवत्त
कोपि न साक्षात्क्रियते इति प्रधानं परममव्यक्तं स्मार्यते न कार्यं न सिद्धेनोपलापः १२६ सुगमं प्रकृत्यनुमा
गतो विशेषाः विस्तरतो विचारिताः तरः परमथ्यापसमप्तिपर्यंतं पुरुषानुमानगताविशेषा विचार्याः तत्र
कं चनादौ विशेषमाह सामान्येन विवादाभावात् धर्मवन्न साधनं १२७ यत्र वस्तुनि सामान्यतो विवादो नास्ति न
तस्य स्वरूपतः साधनमपेक्षते धर्मस्येवेत्यर्थः अयं भावः अथा प्रकृतेः सामान्येनापि साधनमपेक्षितं न त
थापलापे जगदान्ध्यप्रसंगतो भोक्तर्यहं पदार्थसामान्यतो बौद्धानामप्यविवादाद्धर्मावधर्म हि सामान्यतो
वौद्धैरपि स्वीक्रियते तस्य शिलारोहणादिपुधर्मत्वाभ्युपगमात् अतः पुरुषे विवेकनित्यत्वादिसाधनमात्रमनुमा
न कार्यमिति संहतपरार्थत्वात्पुरुषस्येत्यसूत्रेणापि विवेकानुमानमेवाभिप्रेतं ननु तत्र पुरुषस्य सर्वथैवा

44540
९८

सां·भा·
३२

प्रत्यक्षत्वमभिप्रेत्य मिति च्छब्दो विवेकसूत्रं शरीरादिव्यतिरिक्तः पुमान् १२८ शरीरादिप्रकृत्यन्तं
यच्चतुर्विंशतितत्वात्मकं वस्तु ततोतिरिक्तः पुमान् भोक्तेत्यर्थः भोक्तृत्वं च दृष्टत्वमित्ति अत्र हेतुमाह सूत्रैः संह
तपरार्थत्वात् १२९ यतः सर्वं संहतं प्रकृत्यादिकं परार्थं भवति सस्यादिवत् अतोसंहतः संहतदेहादिभ्यः प
रः पुरुषः सिध्यतीत्यर्थः अयं च हेतुः संहतपरार्थत्वात्पुरुषस्येत्यत्र व्याख्यातः उक्तस्यापि हेतोः पुनरुपन्यासो
हेतुवर्गसंकलनार्थः किंच त्रिगुणादिविपर्ययात् १३० सुखदुःखमोहात्मकत्वादिवैपरीत्यादित्यर्थः शरीरादि
नीयः सुखाद्यात्मकत्वधर्मः स सुखादिभोक्तरि न संभवतीति स्वयं स्वसुखादिग्रहणे कर्मकर्तृविरोधात् धर्मिपुरस्का
रेण न सुखाद्यनुभवादिति ननु बुद्धिवृत्तिप्रतिबिंबितं स्वसुखादिकं पुरुषेण गृह्यतां स्ववदिति चेन्न एवं सति बु
द्धिरेव सुखादिकत्वं नो चित्सा पुरुषगतसुखादेः बुद्धौ प्रतिबिंबकत्वेनेगौरवात् अहं सुखी दुःखी मूढ इत्यादिप्र
त्ययास्तु न पुरुषे सुखादिसाधकाः तस्याभिते नाप्युपपत्तेः बुद्धेः सुखादिमत्ते नाप्युपपन्नत्वात् लौकिकानां स्वहं बुद्ध
वदयं बुद्धिरपि विषयः मिथ्याज्ञानवासनादिरूपदोषानुवृत्तेः तत्प्रतिबिंबं वृथकल्पनायां च गौरवादिति आदिशब्द
नवाच्च त्रिगुणविवेकिविषय इतिकारिकोक्ताः अविवेकित्वादयो ग्राह्याः तथारूपादयः शरीरादिधर्मा या
ह्याः किंच अधिष्ठानाच्चेति १३१ भोक्तुरधिष्ठातृत्वाद्यधिष्ठेयेभ्यः प्रकृत्यादिभ्योतिरिक्त इत्यर्थः अधिष्ठानं
हि भोक्तुः संयोगः स च प्रकृत्यादिना भोगहेतुपरिणामेषु कारणं भोक्तुरधिष्ठानात् भोगायतनं निर्माणमि
ति वक्ष्यमाणसूत्रात् संयोगश्च भेदस्य सत्वे भवतीति भावः इति शब्दो हेतुसमाप्तौ उक्तानुमाने अनुकूलतर्कं
प्रदर्शयति सूत्राभ्यां भोक्तृभावात् १३२ यदि हि शरीरादिस्वरूप एव भोक्ता स्यात् तदा भोक्तृत्वमेव व्याहन्येत ३२
कर्मकर्तृविरोधात् स्वस्य साक्षात्स्वभोक्तृत्वानुपपत्तेरित्यर्थः अनुपपत्तिश्च पूर्वमेव व्याख्याता अत्र सूत्रेऽ
रुपस्य भोगः स्वाङ्गलः इतिस्मर्तव्यं अपरिणामिनश्च पुरुषस्य भोगः श्चिदवसानो भोग इत्यत्र व्याख्यातः

65/19

किंच कैवल्यार्थं प्रवृत्तेश्च १३३ शरीरादिकमेव चेत् भोक्तृ स्यात्तदा भोक्तुः कैवल्यार्थं दुःखात्यंतोच्छेदार्थं कस्यापि
प्रवृत्तिर्नोपपद्यते शरीरादिनाशो विना शीलात्स्वकृतेश्च धर्मिग्राहकमानेन दुःखस्वाभाव्यसिद्ध्या कैवल्यासंभवा
त् नहि स्वभाव्यस्यात्यंतोच्छेदो घटत इत्यर्थः अत्र कैवल्यार्थं प्रवृत्तेरिति सूत्रपाठः प्रामादिकत्वादुपेक्षणीयः संहत
परार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्पुरुषोस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्चेति कारिकातः कैवल्यार्थं
प्रवृत्तेश्चेति पाठात् अर्थसंगतश्चेति चतुर्विंशतितत्वातिरिक्ततया पुरुषः साधितः इदानीं पुरुषगतो विशेषो वि
वेकस्फुटीकाराय अनुमीयते जडप्रकाशायोगात्प्रकाशः १३४ वैशेषिकास्त्वाहुः आगप्रकाररूपस्य जडस्यात्म
नो मनः संयोगात् ज्ञानाख्यः प्रकाशो जायत इति तन्न लोके जडस्य प्रकाशस्य लोष्टादेः प्रकाशोत्पत्त्यदर्शनेन तद
योगात् अतः सूर्यादिवत्प्रकाशात्मक प्रकाशरूप एव पुरुष इत्यर्थः तथा च स्मृतिः यथा प्रकाशतमसोः संबंधो नोप
पद्यते तद्वदेव कंतु संबंधो नास्य पंच परमात्मनो लिखिय यदा दीपः प्रकाशात्मा ह्रस्वो वा यदि वा महान् ज्ञानात्मानं तथा त
विद्यात्पुरुषं सर्वजंतुषु इति स्वप्रकाशत्वं च तेजः सत्वे च तन्त्वेष्वनुगतमखंडोपाधिः अनुगतव्यवहारादिति ननु प्रका
शस्वरूपत्वेपि तेजोवदस्य धर्मिभावोस्ति न वा तत्राह निर्गुणत्वान्न चिद्धर्मा १३५ सुगमं पुरुषस्य प्रकाशरूपत्वसिद्ध
त्संबंधमात्रेणान्यव्यवहारोपपत्तौ प्रकाशात्मकधर्मकल्पना गौरवमित्यपि बोध्यं तेजसस्तु प्रकाशरूपत्वाऽवि
शेषायेहपिस्पर्शपुरस्कारेण ग्रहात् प्रकाशात्तेजसो भेदः सिध्यति आत्मनस्तु ज्ञानात्म प्रकाशी ग्रहकाले ग्रह
णं नास्तीत्यतो लाघवात्धर्मधर्मिभावः द्रव्यं प्रकाशमेव रूपात्मद्रव्यकल्पनेतस्य च न गुणत्वसंयोगादिना
दिनाश्रितत्वाच्चेति तथा च स्मर्यते ज्ञानं नैवात्मनो धर्मो न गुणो वा कथंचन ज्ञानस्य एव रूपात्मा नित्यः सर्वग
तः शिव इति ननु निर्गुणत्वे एवका युक्तिरिति चेत् उच्यते पुरुषस्य लाघवात् तावन्नित्यज्ञानसंभवेनेति चेज्जन्यता प्रसक्षा

सा·भा· तु जन्यगुणानां गोकारे परिणामित्वापत्तिः तथा चोभयोरेव प्रकृतिपुरुषयोः परिणामहेतुत्वं कल्पने गौरवं आ
त्मपरिणामस्य न कदाचिदज्ञातत्वापत्त्या ज्ञानेच्छादिगौरवं संशयापत्तिश्च तथा जडप्रकाशायोगस्योक्तत्वा
दपि न नित्यस्यानित्यज्ञानसंभव इति इच्छादिकमन्वयव्यतिरेकाभ्यां मनस्येव लाघवात्सिध्यति मनःसंयोगस्या
त्मनश्च उभयोस्तद्धेतुत्वे गौरवात् गुणशब्दश्च विशेषगुणवाचीत्युक्तमेव अत आत्मा निर्गुणः अपि च येना
र्किकाश्चात्मनः कर्तृत्वमिच्छन्ति तेषां मोक्षानुपपत्तिः अहं कर्तेति बुद्धेरेव रागादिवद् दृष्टत्वादिति हेतुतयोक्तत्वा
त् तस्मात्तत्त्वं ते मिथ्याज्ञानत्वाभावेन तत्त्वज्ञाननिवर्त्यत्वासंभवात् अतः श्रुत्युक्तमोक्षानुपपत्त्यात्मनो क
र्तृत्वमस्माभिरिष्यते अकर्तृत्वाच्चादृष्टसुखाद्यभावः न तच्च मनसः कृत्यादिहेतुत्वे कल्पनीये लाघवादंतरद्
ष्टगुणत्वान्न छेदेनेति कल्प्यते अतः आत्मा निर्गुण इति यथोक्तस्य च परमसूक्ष्मस्यात्मनः स्वरूपं वाशिष्ठे क
रामलकवत्स्फुटं विविच्य प्रतिपादितं यथा असंभवति सर्वत्र दिग्भूम्याकाशरूपिणि प्रकाश्ये या दृशं रू
पं प्रकाशस्यामलं भवेत् त्रिजगत्त्वमहं चेति दृश्ये सत्तामुपागते दृष्टुः स्यात्केवलीभावः तादृशो विमलात्मन इ
ति नन्वहं जानामीति धर्मधर्मिभावानुभवात्पुरुषस्य सिद्धधर्मकत्वं सिध्यति गौरवस्य प्रामाणिकत्वेना दोषत्वा
दित्यत्राह श्रुत्यासिद्धस्य नापलापः स्तत्प्रत्यक्षबाधात् १३६ भवेदेवं यदि केवलतर्केणास्माभिः निर्गुणत्वादि
धर्मत्वादिकं प्रसाध्यते किंतु श्रुत्यापि अतः श्रुत्यासिद्धस्य निर्गुणत्वादेः नापलापः संभवति तत्प्रत्यक्षस्य गुणा
दिप्रत्यक्षस्य श्रुत्यैव बाधात् अहं गौर इत्यादिप्रत्यक्षवदित्यर्थः अन्यथा गौरोहमिति प्रत्यक्षबलेन देहातिरिक्ता
त्मसाधका अपि श्रुतयो बाधिताः स्युरिति जितं नास्तिकैः निर्गुणत्वं च श्रुतयः साक्षी चेता केवलो निर्गुणश्चेत्यथा
चिन्मात्रत्वं तु श्रुतय कर्ता चैतन्यं चिन्मात्रं सत् चिदेकरसो ह्ययमात्मेत्याद्याः इति सर्वज्ञतादिश्रुतयस्तु राहोः

62/1990

शिरवत् इति लौकिकवत् कल्प्यानुवादमात्राः विधिनिषेधश्रुतिमध्ये निषेधश्रुतेरेव बलवत्त्वात् अथात आदेशो ने
ति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्तीति श्रुतेः किंच अज्ञानामहं जानामीति प्रत्यये प्रमात्वकल्पनायामेव गौ
रवं अनाद्यविद्यादोषस्यानुवर्तमानतया भ्रमत्वस्यौत्सर्गिकत्वात् अतो भ्रमग्राहीतः पातित्वेना प्रामाण्यशंकार
स्कंदितत्वाच्च तत्प्रत्यक्षबाधने लाघवानुकार्यनुगृहीतमनुमानमपि समर्थमिति तच्चात्मनो नित्यज्ञानस्वरूपत्वे की
दृशं लाघवमिति चेत् उच्यते नैयायिकादिभिरंतःकरणव्यवसायानुव्यवसायौ तदाश्रयश्चात्मेति चत्वारः पदा
र्थाः कल्प्यंते अस्माभिस्तु अंतःकरणं व्यवसायस्थानीयं च तद्वृत्तिः अनेनानुव्यवसायस्थानीयश्च नित्यैकज्ञानरूप
आत्मेति त्रय एव पदार्थाः कल्प्यंत इति ननु यदि प्रकाशस्वरूप एवात्मा तदा सुषुप्त्याद्यवस्थाभेदस्तस्य नोपपद्यते स
दा प्रकाशानान्याद्यादित्यत्राह सुषुप्त्याद्यवस्थासाक्षित्वं १३७ सुषुप्त्याद्यवस्थात्रयस्य बुद्धिवृत्तिरूपस्य साक्षित्वमे
व पुंसः इत्यर्थः तदुक्तं जाग्रत्स्वप्नसुषुप्तं च गुणतो बुद्धिवृत्तयः तासां विलक्षणो जीवः साक्षित्वेन व्यवस्थित इति ता
सां बुद्धीनां साक्षित्वेन तद्विलक्षणो जाग्रदाद्यवस्थारहितो निर्णीतः तत्र जाग्रदवस्था इन्द्रियद्वारा बुद्धेर्विषया
कारः परिणामः स्वप्नावस्था च संस्कारमात्रजन्या तादृशपरिणामः सुषुप्त्यवस्था च द्विविधा अर्धसमग्रलयभेदेन
तत्रार्धलये विषयाकारा वृत्तिर्न भवति किंतु स्वगतसुखदुःखमोहाकारैव बुद्धिवृत्तिर्भवति अन्यथा उत्थितस्य सु
खमहमस्वाप्समित्यादिरूपेण सुषुप्तिकालीनसुखादिस्मरणानुपपत्तेः तदुक्तं व्याससूत्रेण मुग्धेर्धसंपत्तिः परि
शेषादिति समग्रलये तु बुद्धेर्वृत्तिसामान्याभावो मरणादाविव भवति अन्यथा समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपते
त्यागामिसूत्रानुपपत्तिरिति सा च समग्रसुषुप्तिः रसभावरूपेति पुरुषः स्तत्साक्षी न भवति पुरुषस्य वृत्तिमात्रसा
क्षित्वात् अन्यथा संस्कारादेरपि बुद्धिधर्मस्य साक्षिभास्यतापत्तेः सुषुप्त्यादिसाक्षित्वं तु तादृशबुद्धिवृत्तीनां स्वप्र

निर्विविक्तानां प्रकाशानुमितिं वक्ष्यामः अतो नान्तज्ञानार्थं पुरुषस्य परिणामापेक्षेति स्यादेतत् ननु सुषुप्तौ यदि सुख
दुःखादिगोचरा बुद्धिवृत्तिरिष्यते तर्हि जाग्रदादावखिलवृत्तीनां वृत्तिग्राह्यत्वस्वीकार एव युक्त इति व्यर्था नित्यसा
क्षिपुरुषकल्पना स्वगोचरवृत्तित्वेनैव स्वव्यवहारहेतुतायाः सामान्यतः सुखत्वादिजातिमेव नियमेन वृत्तिगोचरय
तिकल्पनेनानवस्थापत्तिगौरवं च स्यात् किंच अहं सुखीत्यादिवृत्तिषु सुखादीनां विशेषणतया निर्विकल्पकं तज्ज्ञानमाश
वश्यके सति तेन च ज्ञानं तन्निर्विकल्पकरूपं स्यात् लाघवेन नित्यसमेकमेवात्मस्वरूपं ज्ञानं कल्प्यते न त्वहं सुखीत्यादिवि
शिष्टज्ञानार्थं बुद्धिवृत्तेरेव ज्ञाहकाकारं च पुरुषे वृत्तिसारूप्यमात्रस्वीकरणं वृत्त्याकारातिरिक्ताकारानभ्युपगमात्स्व
तन्त्राकारेण परिणामापत्तेरिति अथैवं पुरुषस्य सुखदुःखादिसाक्षिमात्रत्वेन पुरुषैक्यस्याप्युपपत्तौ सत्किमेको वेति
संशयः तत्रायं पूर्वपक्षः लाघवतर्कसहकारेण बलवताऽभ्योऽभेदश्रुतिभ्यः एक एवात्मा सिध्यति जाग्रदाद्यवस्था
रूपाणां वैधर्म्याणां बुद्धिधर्मत्वात् यद्यप्येकस्यात्मनः सर्वबुद्धिसाक्षित्वं तथापि यस्या बुद्धेर्या वृत्तिस्तस्यैव बुद्धि
स्तवति विशिष्टतया साक्षिणं गृह्णाति घटं जानामीत्यादिरूपैः अत एकस्या बुद्धेः अयं घट इति वृत्तौ सत्यां अ
न्यकबुद्धिवृत्तिद्वारा नान्यस्यानुभावो घटमहं जानामीति तत्र सिद्धान्तमाह जन्मादिव्यवस्थातः पुरुषबहुत्वं १३९
पुण्यवान्स्वर्गे जायते पापी नरके अज्ञो बध्यते ज्ञानी मुच्यत इत्यादेः श्रुतिस्मृतिव्यवस्थायाः विभागस्यान्यथानुपप
त्त्या पुरुषा बहव इत्यर्थः जन्ममरणे चात्मनो न सति विनाशोत्पत्ती पुरुषनिष्ठत्वाभावात् किंतु अपूर्वदेहेन्द्रियादिसंघातवि
शेषेण संयोगस्तद्वियोगश्च भोगतदभावनियामकौ इति जन्मादिव्यवस्थायां च श्रुतिः अजामेकां लोहितशुक्
लकृष्णां बह्वीः प्रजाः सृजमानां सरूपां अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः यदेतद्वि
दुरमृतास्ते भवंत्यथेतरे दुःखमेवापियंतीत्यादिरिति ननु पुरुषैक्ये उपाधिरूपावच्छेदकभेदेन जन्मादिव्यवस्था ३५

69
1990

यां च श्रुतिः अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अजो ह्येको जुषमाणोऽनुशेते ज
हात्येनां भुक्तभोगामजोऽन्यः यदेतद्विदुरमृतास्ते भवंत्यथेतरे दुःखमेवापियंतीत्यादिरिति ननु पुरुषैक्ये उपा
धिरूपावच्छेदकभेदेन जन्मादिव्यवस्था भवेत्तत्राह उपाधिभेदेऽप्येकस्य नानायोग आकाशस्येव घटादिभिः
१३८ उपाधिभेदेऽप्येकस्यैव पुरुषस्य नानोपाधियोगोऽस्त्येव यथा एकस्यैवाकाशस्य घटकुड्यादिनानायोगो
ऽतोऽवच्छेदकभेदेन एकस्यात्मन एव विविधजन्ममरणाद्यापत्तिः कायव्यूहादाविवेति न संभवति व्यवस्था एकः
पुरुषो जायते नापर इत्यादिरित्यर्थः न ह्यवच्छेदभेदेन कपिसंयोगतदभाववदेकस्मिन्नेव वृक्षे व्यवस्था घ
टते एको वृक्षः कपिसंयोगी अन्यश्च नेति किंच एकोपाधितो मुक्तस्याप्यात्मप्रदेशस्य उपाध्यंतरेण पुनर्बंधा
पत्त्या बंधमोक्षव्यवस्था न स्यात् यथैव घटमुक्तस्याकाशप्रदेशस्य अन्यघटयोगात् घटाकाशव्यवस्थात इ
ति न च बंधमोक्षव्यवस्थाश्रुतिरपि लौकिकभ्रमानुवादमात्रमिति वाच्यं मोक्षस्यालौकिकत्वात् मिथ्यापुरुषार्थप्र
तिपादनेन श्रुतेः प्रतारकत्वापत्तेश्च ननु चेतनैक्येऽपि तदुपाधिविशिष्टस्यातिरिक्ततामभ्युपगम्य व्यवस्थोप
पादनीया तत्राह उपाधिर्भिद्यते न तु तद्वान् १४० उपाधिरेव नाना न तु तद्वान् नोपाधिविशिष्टोऽपि नानाभ्युपगम्यः
विशिष्टस्यातिरिक्तत्वेनानात्मतापत्तेः अवशिष्टांतरेणाभ्युपगमापत्तेरिति इत्यर्थः बंधभागिनो विशिष्टत्वे चिद्विशेषणवि
योगेन विशिष्टनाशात् मोक्षोपपत्तिरित्यादि अपि दूषणानि ननु विशिष्टजीवान्वयव्यतिरेकादिति पृष्टाध्याये त्वय
मेवाहंकारविशिष्टस्य जीवत्वं वक्ष्यते इति चेन्न तत्र प्राणधारकस्वरूपजीवत्वस्यैव विशिष्टाख्येयत्ववचनात्तु
बंधमोक्षव्यवस्थाया विशिष्टाश्रितत्वं वक्ष्यते मोक्षकाले विशिष्टसत्त्वादिति यदपि केचिन्नवीना वेदांति
ब्रुवाणा आहुः एकस्यैवात्मनः कार्यकारणोपाधिषु प्रविश्य विद्यानिजीवेश्वराः प्रतिबिंबानी चान्योन्यभेदात् जन्मा

सा॰भा॰
२७

धर्मिणस्तु व्यवस्थोपपत्तिरिति तद्व्यस्य भेदाभेदविकल्पासहत्वात् बिंबप्रतिबिंबयोः भेदे प्रतिबिंबस्याचेतना
तया भोक्तृत्वबंधमोक्षाद्यनुपपत्तिः जीवब्रह्माभेदरूपतत्त्वसिद्धांतक्षतिश्च जीवेश्वरभिन्नस्यात्मनो प्रामाणि
कत्वं च अभेदे तु सांकार्यापरिहारः भेदाभेदाभ्युपगमे तु वस्तिसिद्धांतहानिः भेदाभेदविरोधश्च अस्मन्मते च भे
दो विभागलक्षणो भेदश्चान्योन्याभाव इत्यविरोध इति अवच्छेदप्रतिबिंबादिदृष्टांतवाक्यानि त्वग्रे व्याख्यास्यामः
स्यादेतत् बिंबप्रतिबिंबादिभेदं परिकल्प्याप्युक्ता बंधमोक्षव्यवस्था कल्पितेनैव वास्माभिरिष्यते ननु परमार्थ
तो प्रतिबिंबभावस्तयोः भेदो बंधमोक्षादिकं चेष्यत इति मैवं एवं सति बंधमोक्षादिश्रुति[illegible]संतरेः स्वि
गणस्य भेदश्रुतिगणस्य चाभेदयोः बाधापेक्षयाकेवलाभेदश्रुतिगणस्यैवाविभागपरत्वेन संकोचस्य ला
घवेपि युक्तिश्रुतिस्मृत्यंतरैः स्वविभागस्य सिद्धत्वादिति आत्मैक्यवादिभिरिक्तदूषणमुपसंहरति एवमेकत्वे
न परिवर्तमानस्य न विरुद्धधर्माध्यासः १५२ एवं रीत्या एकत्वेन सर्वतो वर्तमानस्याप्यात्मनो जन्ममरणादिरूप
विरुद्धधर्मप्रसंगो न युक्त इत्यर्थः यद्वा एकत्वे शास्त्रिछेदः एकत्वेऽभ्युपगम्यमाने परितः सर्वतो वर्तमानस्य सर्वोपाधि
ष्वनुगतस्य विरुद्धधर्माध्यासो नेति न किंतु सर्वथा विरुद्धसंकार्यासरिहार्य इत्यर्थः ननु पुरुषो निर्धर्मकः तत्र क
थं जन्ममरणबंधमोक्षादिधर्मसंकार्यमापद्यते भवद्भिरपि सर्वेषां धर्माणामुपाधिनिष्ठत्वाभ्युपगमादिति
चेन्न उक्तधर्माणां संयोगवियोगभोगाभोगरूपतया पुरुषे स्वीकारात् परिणामरूपधर्माणामेव पुरुषे धर्म
स्योक्तत्वात् यथा स्फुटिकेष्वलोहित्यनीलिमादिधर्माणामारोपितानामपि व्यवस्थास्ति तथा पुरुषेष्वपि बु
द्धिधर्माणां सुखदुःखादीनां शरीरादिधर्माणां च आत्मत्वक्षत्रियत्वादीनामपि व्यवस्थास्ति शास्त्रेषु यथा विष्णु २७ ३५
पुराणे यथैकस्मिन्घटाकाशे रजोधूमादिभिर्युते न च सर्वे प्रयुज्यंत एवं जीवाः सुखादिभिरिति साप्यवस्था

71/1990

ऽकात्म्ये सति जन्मादिव्यवस्थावदेव नोपपद्येत इत्याह अन्यधर्मत्वेपि नारोपात्तत्सिद्धिरेकत्वात् १५३ अ
न्यधर्मत्वेपि धर्माणां सुखादीनामारोपात्पुरुषे व्यवस्था न सिध्यति आरोपाधिष्ठानपुरुषैकत्वादित्यर्थः आ
काशस्यैकत्वेपि घटावच्छिन्नाकाशेन घटभेदेन भिन्नत्वयौपाधिकधर्मव्यवस्था घटते आत्मत्वजीवत्वादि
कं तु नोपाध्यवच्छिन्नस्य उपाधिवियोगे घटाकाशनाशवत् नाशेन न जीवो म्रियत इत्यादिश्रुतिविरोधप्रसंगात्
किंतु केवलचैतन्यस्यैवेति शांकरवेदांतिनां बंधमोक्षादिव्यवस्थानुपपत्तिं स्पष्टामबुध्यैवाधुनिकाः वेदांतिब्रु
वाणा उपाधिभेदेन बंधमोक्षव्यवस्थामेकात्म्येप्याहुः तेप्यनेन निरस्ताः येपि तदेकदेशिन इमामेवानुपपत्ति
पश्यंतः उपाधिगतचित्प्रतिबिंबानां बंधादीन्याहुः तत्वेनीव भ्रांताः उक्तभेदाभेदादिविकल्पासहत्वादित्य
पात् अंतःकरणस्य तद्वुत्पलितत्वादित्यनोक्तदोषाच्च किंच वेदांतसूत्रे क्वापि सर्वात्मनामैक्यं नेक्यते नोक्तमस्ति
प्रत्युत भेदव्यपदेशाच्चान्यः अधिकं तु भेदनिर्देशात् अंशो नानाव्यपदेशादित्यादिसूत्रैर्भेद एवोक्तः अतः
आधुनिकानां अवच्छेदप्रतिबिंबादिवादाः अपसिद्धांताः एकस्य शास्त्रानुक्तसंदिग्धार्थेषु समानतंत्रसिद्धां
तत्वाश्रयणीयमित्यादिकं ब्रह्ममीमांसाभाष्ये प्रतिपादितमस्माभिः ननु एवं पुरुषनानात्वे सति एक एव हि भूतात्मा
भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचंद्रवत् नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः एकः सं
भिद्यते शक्त्या मायया न स्वभावतः इत्याद्याः श्रुतिस्मृतयः आत्मैक्यप्रतिपादिका नोपपद्येरन्निति तत्राह नाद्वैतश्रुति
विरोधो जातिपरत्वात् १५४ आत्मैक्यश्रुतीनां विरोधस्तु नास्ति तासां जातिपरत्वात् जातिः सामान्यमेकरूपत्वं
तत्रैवाद्वैतश्रुतीनां तात्पर्यादखंडत्वे प्रयोजनाभावादित्यर्थः जातिशब्दस्य चैकरूपतार्थकत्वमुत्तरसूत्राद्
व्यते यथा श्रुत जातिशब्दस्य इदं तु आत्मा वा इदमेक एवाग्र आसीत् सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयं

सा·भा·
३९

इत्याद्यद्वैतश्रुतेरुपपादकतयैतत्सूत्रं व्याख्येयं जातिपरत्वाद्विजातीयद्वैतनिषेधपरत्वादित्यर्थः तत्राद्यव्याख्या
यामयं भावः आत्मैक्यश्रुतिस्मृतिषु एकादिशब्दाः चिद्रूपसत्तामात्रपराः भेदादिशब्दाश्च वैधर्म्यलक्षणभेदप
राः एकत्वात्मा मंतव्यो जाग्रत्स्वप्नसुषुप्तिषु स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यत इति श्रुत्यादिवाक्येषु एक
रूपतार्थत्वावश्यकत्वात् अन्यथा अवस्थात्रयेष्वात्मन एकतामात्रज्ञानेन स्थानत्रयव्यतीतत्वरूपोक्ताः अवस्थात्र
याभिमाननिवृत्तेरसंभवात् तथैकरूपताप्रतिपादनेन वृत्तिसंक्लोपाधिविवेकेन सर्वात्मना स्वरूपबोधनं संभवान्न
तद्यन्यथानिधर्मकमात्मस्वरूपं विशिष्य ब्रह्मणापि शब्देन साक्षात्प्रतिपादयितुं शक्यते शब्दानां सामान्यमात्रगो
चरत्वात् आब्रह्मस्तंभपर्यंतेष्वात्मान एकरूपत्वेनु प्रतिपादिते तदुपपत्त्यर्थं शिष्यः स्वयमेव तावद्विवेचयति यावत्
निर्विशेषपराद्गोचरे स्वरूपे पर्यवस्यतीति तस्मान्निःशेषाभिमाननिरस्याकृतकृत्यतेति यदि पुनरद्वैतवाक्यान्यखं
डतामात्रपराणि स्युः तर्हि तेभ्यो नाभिमाननिवृत्तिः संभवति आकाशो विविधशब्दवदखंडे आत्मनि सुखदुःख
तदभावादीनामवच्छेदभेदैरुपपत्तेः एकस्यैव वाक्यस्याखंडत्वान् वैधर्म्योभयपरत्वे च वाक्यभेदो खंडतापरत्वक
ल्पनायां फलाभावश्च वैधर्म्यलक्षणभेदपराण्येव साम्यबोधकश्रुतिस्मृतिभिरैक्यत्वात्सामान्यान्ना इति ब्रह्मसत्त्वा
ख्येति न च साम्यश्रुतयः यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानतः आत्मा भवति गौतम निरंजनः
परमं साम्यमुपैतीत्याद्याः स्मृतयश्च ज्योतिरात्मनि नान्यत्र सर्वभूतेषु न त्समः स्वयं च शक्यते द्रष्टुं सुसमाहितचे
तसा यावात्मनि चेदात्मा नानात्मा परात्मनि यएवं समं तं वेदजनस्थोपि नमुच्यते इत्याद्याः तु कश्रुतौ मोक्षद ३९
शायामपि भेदघटितसाम्यवचनात्स्वरूपभेदोप्यात्मनामस्तीति सिद्धं आवैधर्म्यान्भिदपरत्वं चास्मन्मते विष्णु
रहं शिवोहमित्यादिवाक्यानां मंतव्यं न तु तत्त्वमसि अहं ब्रह्मास्मीत्यादिवाक्यानामपि तत्र साम्यमते प्रलयका

73
1990

ले न स्वप्रणाश्मन एवतरादिपदार्थतयानीत्सश्रुद्धमुक्तत्वमसीत्यादिपथा श्रुतस्य तादृशवाक्यार्थत्वात् यदि तु
स्वर्गादिफलवत्पुरुषोनारायण इत्यादिवत् स्तुत्यर्थः तदा तत्त्वमसीत्यादिवाक्यानामप्यवैधर्म्यात्मकत्वे वास्तु ननु प्रयो
जनाभावान्न भेदपरत्वं श्रुतिनां संभवति निर्विकल्पको भेदोपपादनस्यैव प्रयोजनत्वात् सृष्टिसंहारयोः प्रवाहरू
पेणानुच्छेदात्तस्यैवंविधमोक्षानुपपत्तेः अर्थेन मात्मभेदस्य लोकसिद्धतया न तत्परत्वे च श्रुतिनामर्थ इति मैवं लाघव
तर्केणाकाशवदात्मन्येकत्वस्यानुमानेन प्रसक्तस्य श्रुत्यानिषेधेनात्वपरचैतन्ययोः भेदस्य च प्रसक्तत्वात् देहा
दिष्वेवानुभवात् यएतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीत्यादिभेदनिंदा तु वैधर्म्यविभागान्यतरलक्षण
भेदपरेति न चैवं मुक्तानां प्रतिबिंबावच्छेदश्रुतिनां कागतिरिति चेदुच्यते अनेकतेजोभयादित्यमंडलवत्
अनेकार्थमपि शिरादित्यमंडलमेकरसमविभक्तमेकपिंडीकृतस्य तस्य किरणवत् स्यान्न तेरसंख्यपुरुष
संख्योपाधिषु असंख्यविभाग एव प्रतिबिंबादिदृष्टांते प्रतिपाद्यते विभागस्य लक्षणान्यत्वस्य वाचारंभ
णमात्रत्वं बोधयितुं न पुनरखंडत्वं वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूवेत्यादिदृष्टांतश्रुती
नां न्यायानुग्रहणे बलवत्वादिति तथा च स्मर्यते यस्य सर्वात्मकत्वेऽखिलं रूपते नैकपिंडतेति ब्रह्ममीमांसा
यां तु निखिलभिप्यक्तेः परमेश्वरचैतन्ये अन्येषां लयरूपाविभागनाथ द्वैतमुक्तं अविभागो वचनादिति सूत्रेणे
ति अधिकं ब्रह्ममीमांसाभाष्ये प्रतिपादितमस्माभिरिति दिक् सूत्रस्य द्वितीयव्याख्यायां त्वयं भावः प्रलय
कालेषु पुरुषविजातीयं सर्वमेवास्तत् अर्थक्रियाकारित्वाभावात् सुरूपाणां कुटस्थत्वेनार्थक्रियैव प्रसिद्धेति
अतः सर्वकाल इव प्रलयेपि सत्त्वमतः सदात्मनां विजातीयद्वैतराहित्यं तथा सर्गकालेपि कूटस्थत्वरूपपा
रमार्थिकसत्त्वं नान्यत्रेति विजातीयद्वैतराहित्यात्सर्गकालीनाद्वैतश्रुतयोप्युपपन्ना इति न चात्मनः एकत्वं

वेदेकरूपत्वमपि नानारूपता प्रत्यक्षेण विरुद्धं तत्कथमुक्तं जातिपरत्वादिति तत्राह विदित बंधकारणस्य
दृष्ट्यातद्रूपं विदितस्य बंधकारणमविवेको येन तस्य दृष्ट्या पुरुषे घटाद्युपं रूपभेद इत्यर्थः अतो भ्रांतद
ष्ट्या नरूपभेदसिद्धिरिति ननु तथाप्यनुपलंभेदकरूपताभावः सत्यपि तत्राह नांधादृष्ट्या चक्षुष्मता
मनुपलंभः अनुपलंभ एवासिद्धः अत्रैरदर्शनेपि ज्ञानिभिरेकरूपत्वदर्शनादित्यर्थः अद्वैतश्रुत्युप
पत्तिं समाधायाद्वैतवाक्यस्य कांतरमाह वामदेवादिर्मुक्तो नाद्वैतं १४५ वामदेवादिमुक्तोक्ति त
थापि इदानीं बद्धः स्वस्मिन्ननुभवसिद्धः अतो नाखंडताद्वैतमित्यर्थः सचापि जातस्मरणात्मबोधः तत्रैव
जन्मन्यपवर्गमापेत्यादिवाक्यात विरोधश्चेति विशेषः नचैवं बद्धमोक्षावुपाधेरेवेत्यवगंतव्य श्रुतिस्मृ
स्मृतिविरोधात् दुःखमात्युंजोयेति कामनादर्शनेन पुरुषमोक्षस्यैव मोक्षाख्यपरमपुरुषार्थत्वाच्च उपा
दुःखहानस्यवतो दृष्टार्थं नपरं परस्यैव पुरुषार्थता सुखादिवदिति परव्याख्यानिकैः मायावादिभिरुच्यते दु
तत् श्रुतिविरोधाद्बंधमोक्षस्य सृष्टिसंहारादिश्रुतयो बाध्यत इति तदप्यसत् मोक्षस्य फलस्यापि श्रवण
कालेगत्याभवति श्रवणात्समननादिविधेरनुष्ठानलक्षणाप्रामाण्यप्रसंगात् प्रपंचांतर्गतस्यैव तत
स्याद्वैतश्रुत्याबाधेवेदांतावगतेप्यद्वैते पुनःसंशयापत्तेश्च स्वप्नाकस्य जाग्रति बाधेतद्वाक्यार्थे पुनःसं
शयवत् किंच मिथ्यादृष्टिर्नास्ति कर्तेसनुबासनाख्यमीधर्मादिस्वभावत्व मिथ्यादृष्ट्योबौद्धप्रभेदाः एवं
सांख्यति कृत्स्नेन प्रपंचस्य वियत्कुसुमवत्तेरभ्युपगमादिति दिक् ननु वामदेवादेरपि परममोक्षो नजात ३९
इत्यस्त्युपपन्नमाह अनादावद्ययावदभावाद्भविष्यदप्येवं अनादौ काले अद्ययावन्मोक्षो नजातः कस्या
पित र्हि भविष्यत्कालेप्येवमोक्षस्य एवमसम्यक्साधनानुष्ठानस्यापि शेषादित्यर्थः तत्र प्रयोग

75/1990

मप्याह इदानीमिव सर्वत्रनात्यंतोच्छेदः १४७ सर्वत्र काले बंधस्यात्यंतोच्छेदस्यापि पुंसो नास्ति वर्तमानकालव
दित्यनुमानसंभवादित्यर्थः पुरुषाणां यदेकरूपत्वं एकत्वप्रतिपादकश्रुत्यर्थोवधारितः स किं मोक्षकाले किंवा सर्व
दैवेत्याकांक्षायामाह व्यावृत्तोभयरूपः १४८ सच पुरुषो व्यावृत्तोभयरूपो व्यावृत्तोभयरूपभेदो यथा तथेत्य
र्थः श्रुतिस्मृतिन्यायेभ्यः सदैकत्वरूपतासिद्धेरिति शेषः तदुक्तं बहुरूपइवाभातीति मायया बहुरूपया रममा
णो गुणवत्यस्तांमं माहमिति बुध्यतइति जगदाद्यमहास्वप्नेस्मिन्स्वप्नांतरं अजलरूपं सृजति नो शांत प्रत्यग्
त्वदृष्टत्वमिति चन्नु साक्षित्वस्यानित्यत्वात् पुरुषाणां कथं संदेकरूपत्वं तत्राह साक्षात्संबंधात्साक्षित्वं १४८
पुरुषस्य यत्साक्षित्वमुक्तं तत्साक्षात्संबंधमात्रात् न तु परिणामतः इत्यर्थः साक्षात्संबंधेन बुद्धिमात्रसाक्षितावग
गम्यते साक्षाद्द्रष्टरि संज्ञायामिति साक्षिशब्दव्युत्पादनात् साक्षाद्द्रष्टृत्वं चाव्यवधानेन द्रष्टृत्वं पुरुषे च साक्षात्सं
बंधः स्वबुद्धिरेवेति इत्थंभवति अतो बुद्धेरेव साक्षी पुरुषो अन्येषां तु द्रष्टमात्रमिति शास्त्रीयो विभागः ज्ञान
विषयमकाशार्थाकारतास्थानीयः प्रतिबिंबरूप एव संबंधोपि तु संबंधो न तु संयोगमात्रमतिप्रसंगादित्या
दि सकलं वादरिर्नविशदे सर्वसाक्षित्वं त्विद्रियादिव्यवधानाभावमात्रेण गौणं अक्षसंबंधात् इत्यर्थः उ
भयरूपताभावसिद्ध्यर्थं पुरुषस्यापरो विशेषाद्याह स्वाभ्यां नित्यमुक्तत्वं १४९ सदैव पुरुषस्य दुःखाख्य
बंधशून्यत्वं दुःखादेः बुद्धिपरिणामित्वादित्यर्थः पुरुषार्थश्च दुःखभोगनिवृत्तिः प्रतिबिंबरूपदुःखनिवृ
निर्वेकतमेव औदासीन्यं चेति १५० औदासीन्यमकर्तृत्वं तेन चान्येपि निष्कामत्वादयः उपलक्षणीयाः
कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिर्धीः ह्रीर्भीरित्येतत्सर्वं मनएवेति श्रुतेः इति शब्दः पुरुषधर्मप्र
तिपादनसमाप्तौ ननु एवं प्रकृतिपुरुषयोः अन्योन्यवैधर्म्येण विवेकेसिद्धे पुरुषस्य कर्तृत्वं बुद्धेरपि च ज्ञातृत्वं

मुक्तिस्तु सोऽहमभिमानं कथमुपपद्येयातां तत्राह उपरागात्कर्तृत्वं चित्सान्निध्यात् चित्सान्निध्यात् १६४ अ
प्रयथायोग्यमन्वयः पुरुषस्य कर्तृत्वं तत् बुद्ध्युपरागात् बुद्धेश्च या चित्ता सा पुरुषसान्निध्यात् एतदुभयमपि न
वास्तवमिति सूत्रार्थः यथा स्फटिकयोः परस्परसंयोगविशेषात्परस्परधर्मव्यवहार औपाधिको यथा वा जलसूर्य
योः संयोगात्परस्परधर्मव्यव[blot] औपाधिको यथा वा जलसूर्ययोः संयोगात्परस्परधर्मारोपः तथैव
बुद्धिपुरुषयोः इति भावः यतश्च कारिकयाप्युक्तं तस्मात्संयोगात् अचेतनं चेतनवदिव लिंगं गुणकर्तृत्वे
च तथा कर्तेव भवत्युदासीन इति चित्सान्निध्यादिति द्विपाठो ध्यायसमाप्तिः संक्षिप्तं सांख्यस्य व्याख्या
मर्थस्यात्र प्रपंचनात् शास्त्रयोगवदेतत् सांख्यप्रवचनाभिधं इति श्रीविज्ञानाचार्यनिर्मिते कपिलसां
ख्यप्रवचनभाष्ये विषयाध्यायः प्रथमः

३८

77
1990

अथ सांख्यभाष्यतंत्राध्यायप्रारंभोऽयं वर्तते २६७५

सां० भा० स्रष्टृत्वसिद्धिरितितत्राह प्रकृतिवास्तवेकपुरुषस्याध्यासासिद्धिः प्रकृतौस्रष्टृत्वस्यवस्तुत्वेचसिद्धेपुरुषस्यस्र
१ ष्टृत्वाध्यासः एवंश्रुतिरुपसिध्यतिउपासनायामेवश्रुतेस्तात्पर्यात् अजामेकामित्यादिश्रुत्यंतरेप्रकृतेःस्रष्ट
त्वसिद्धेः पुंसांकूटस्थचिन्मात्रताबोधकश्रुत्यंतरविरोधाच्चेत्यर्थः अयंचाध्यासउपचाररूपोलोकसिद्धए
वास्तियथास्वशक्तिषुयोधेषुवर्तमानौजयपराजयौराज्ञिउपचर्येतेशक्तिशक्तिमदभेदात् तथास्वशक्तौ
प्रकृतौवर्तमानंस्रष्टृत्वादिकंशक्तिमत्सुपुरुषेषूपचर्यतेशक्तिशक्तिमदभेदात् तदुक्तंकौर्मे शक्तिशक्ति
मतोर्भेदंपश्यंतिपरमार्थतः अभेदंचानुपश्यंतियोगिनस्तत्त्वचिंतकाइति भेदंअन्योन्याभावंअभेदं
चाविभागरूपंप्रकृत्यादित्वोपासकाः पश्यंतीत्यर्थः तयोश्चोदाहरणं अथातआदेशोनेतिनेतीत्यादि
श्रुतिः आत्मैवेदंसर्वंब्रह्मैवेदंसर्वंअहमेवेदंसर्वंइत्यादिश्रुतिश्चेतिभावः नन्वेवंप्रकृतावपिस्रष्टृत्ववास्त
वमितिकुतोवधृतंसृष्टिःस्वप्नादितुल्यतायाअपिश्रवणादितितत्राह कार्यतस्तत्सिद्धेः कार्याणामर्थ
क्रियाकारितयावास्तवत्वेनकार्यतएवंधर्मिग्राहकप्रमाणेनप्रकृतेर्वास्तवस्रष्टृत्वसिद्धेरित्यर्थः स्व
प्नादितुल्यताश्रुतयस्तुअनित्यतारूपासत्त्वांशमात्रेपुरुषाध्यस्तत्वांशेवाबोध्याः अन्यथासृष्टिप्रति
पादकश्रुतिविरोधात् स्वप्नपदार्थानामपिमनःपरिणामत्वेनासत्तासत्ताविरहाच्चेतिननुप्रकृतेःस्वार्थ
त्वपक्षेमुक्तपुरुषंप्रत्यपिसाप्रवर्ततेतत्राह चेतनोद्देशान्नियमःकंटकमोक्षवत् चितीसंज्ञानइतिव्युत्पत्त्या
चेतनोत्राभिज्ञः यथैकमेवकंटकंयश्चेतनोभिज्ञस्तस्मादेवमुच्यतेतंप्रत्येवदुःखात्मकंनभवति अन्या
न्प्रतितुभवत्येव तथाप्रकृतिरपिचेतनादभिज्ञात् कृतार्थादेवमुच्यतेतंप्रत्येवदुःखात्मिकानभवतिअन्या
ननभिज्ञान्प्रतितुदुःखात्मिकाभवत्येवेतिनियमोव्यवस्थेत्यर्थः एतेनस्वभावतोबद्धायाअपिप्रकृतेः
स्वमोक्षोघटतेनन्वयुक्तंप्रकृतिसंयोगेनपुरुषस्यापिमहदादिपरिणामौचित्यात्दृष्टोहिपृथिव्यादियोगे १
नकाष्ठादेः पृथिव्यादिसदृशःपरिणामइतितत्राह अन्ययोगेपितत्सिद्धिर्नांजस्येनायोदाहवत् प्रकृ

श्रीगणेशायनमः श्रीसरस्वत्यैनमः शास्त्रस्यविषयोनुरूपितः सांप्रतंपुरुषस्यापरिणामित्वोपपादनायप्रकृति
तः सृष्टिप्रक्रियामातविस्तारेणद्वितीयाध्यायंवक्ष्यति तत्रचप्रधानकार्याणांस्वरूपंचविस्तारतोवक्तव्यंतेभ्यापिपुरु
षस्यस्फुटंविवेकाय अतएवविविक्ताकारंभः प्रकृतिंचैवपुरुषंस्यसनातनं योयथावद्विजानातिसवितृष्णोविमुच्यत
इतिमोक्षधर्मादिबंधसंगइत्याशयेनजगत्सर्जनेप्रयोजनमाह सुत्रत्रयाणामेवंच्यत्वचनात्वत्रचादावचेतना
याः प्रकृतेर्निःप्रयोजनस्रष्टृत्वेमुक्तस्यापिबंधसंगइत्याशयेनजगत्सर्जनेप्रयोजनमाह विमुक्तमोक्षार्थंस्वार्थंवा
प्रधानस्यकर्तृत्वमितिपूर्वाध्यायीयशेषसूत्रात् अनुषज्यतेस्वभावतोदुःखबंधाद्विमुक्तस्यपुरुषस्यप्रातिबिं
बरूपदुःखमोक्षार्थंप्रतिबिंबसंबंधनदुःखमोक्षार्थंवाप्रधानस्यजगत् कर्तृत्वंअथवास्वार्थंस्वस्यपारमार्थि
कदुःखमोक्षार्थमित्यर्थः यद्यपिमोक्षवद्भोगोपिसृष्टेःप्रयोजनंतथापिमुख्यत्वान्मोक्षएवोक्तः ननुमोक्षा
र्थंचेत्सृष्टिस्तर्हिसकृत्सृष्ट्यैवमोक्षसंभवेपुनःपुनःसृष्टिर्नस्यादितितत्राह विरक्तस्यतत्सिद्धेः नैकदा
सृष्टेर्मोक्षः किंतुबहुशोजन्ममरणव्याध्यादिविविधदुःखेनभृशंतप्तस्यततश्चप्रकृतिपुरुषयोर्विवेकख्या
तोत्पन्नपरवैराग्यस्यैवमोक्षात्तन्निसिद्धेरित्यर्थः सकृत्सृष्ट्यावैराग्यसिद्धौहेतुमाह नश्रवणमात्रात्तत्सि
द्धिरनादिवासनायुतत्वात् श्रवणमपिबहुजन्मकृतपुण्येनभवतितत्रापिश्रवणमात्रान्नवैराग्यसिद्धिः
किंतुसाक्षात्कारात्साक्षात्कारश्चझटितिनभवति अनादिमिथ्याज्ञानवासनायाबलवत्वात्योगनिष्पत्त्या
योगश्चप्रतिबंधबाहुल्यमित्यतोबहुजन्मभिरेववैराग्यंमोक्षश्चकदाचित्कस्यचिदेवसिध्यतीत्यर्थः सृष्टि
प्रवाहेहेत्वंतरमाह बहुभृत्यवद्वाप्रत्येकं यथागृहस्थानांप्रत्येकंबहवोभर्तव्याभवंति स्त्रीपुत्रादिभेदेन
एवंसत्वादिगुणानामपिप्रत्येकंअसंख्यपुरुषाभोचनीयाभवंति अतःकियत्पुरुषमोक्षेपिपुरुषांतरमोच
नार्थंसृष्टिप्रवाहोघटतेपुरुषाणामानंत्यादित्यर्थः तथाचयोगसूत्रकृतार्थंप्रतिनष्टमप्यनष्टंतदन्यसाधार
णत्वादिति ननुप्रकृतेरेवस्रष्टृत्वंकथमुच्यतेएतस्मादात्मनआकाशःसंभूतइतिश्रुत्यापुरुषस्यापिस्र

ष्टृत्वश्रवणादितिचेन्नतद्योगेपिपुरुषस्यनस्रष्टृत्वसिद्धिरंजस्येनसाक्षात् तत्रदृष्टांतोयोदाहवत् यथाअयसोनदग्धृत्वंसाक्षादस्तिकिं
तुस्वसंयुक्ताग्निद्वारकमध्यस्तमेवेत्यर्थः उक्तदृष्टांतेतूभयोःपरिणामःप्रत्यक्षसिद्धत्वादिष्यतेसंदिग्धस्थलेत्वेक
स्यैवपरिणामिनेपपत्तावुभयोःपरिणामकल्पनेगौरवंअन्यथाजपासंयोगात्स्फटिकस्यरागपरिणामापत्तेरि
ति सृष्टेः फलंमोक्षइतिप्रागुक्तंइदानींसृष्टेःमुख्यनिमित्तकारणमाह रागविरागयोर्योगःसृष्टिः रागःसृष्टिः
वैराग्येचयोगः स्वरूपावस्थानंमुक्तिरितियावत् अथवाचित्तवृत्तिनिरोधइत्यर्थः तथाचान्वयव्यतिरेकाभ्यां
रागःसृष्टिकारणमित्याशयः तथाचश्रुतिरपिब्रह्मादिरूपांविविधकर्मगतिमुक्त्वाह इतिनुकामयमानोथा
कामयमानोयोकामोनिःकामोनतस्यप्राणाउत्क्रामंतिइतिरागवैराग्येअपिप्रकृतिधर्मावेवनतुपुरुषस्य
इतःपरंसृष्टिप्रक्रियांवक्तुमारभते महदादिक्रमेणपंचभूतानां सृष्टिरितिपूर्वसूत्रादनुवर्तते यद्यपि
एतस्मादात्मनआकाशःसंभूतइत्यादिश्रुतावादावेवपंचभूतसृष्टिःश्रूयतेतथापिमहदादिक्रमेणैवपंचभूतानांसृष्टि
रित्यर्थः तेज आदिसृष्टिश्रुतौगगनवायुसृष्टेरापूर्णवत्उक्तश्रुतावप्यादौमहदादिसृष्टिःपूरणीयेतिभावः अ
त्रचप्रमाणंमहत्सृष्टिवदंतः करणातिरिक्ताखिलसृष्टेरंतःकरणवृत्तिपूर्वकत्वानुमानंकिंचएतस्माज्जायतेप्राणो
मनःसर्वेंद्रियाणिचखंवायुर्ज्योतिरापश्चपृथिवीविश्वस्यधारिणीतिश्रुत्यंतरस्यपाठक्रमानुरोधेन सप्राणाच्छ्र
द्धांखंवायुमित्यादिश्रुत्यंतरेणचपंचभूतसृष्टेःप्राङ्महदादिसृष्टिरवधार्यतइतिप्राणश्चांतःकरणस्यवृत्तिभेद
इतिवक्ष्यतिअतोस्यांश्रुतौप्राणएवमहतत्वमितितथावेदांतसूत्रमपिमहदादिक्रमेणैवसृष्टिंवक्ति अंतराविज्ञा
नमनसीक्रमेणतल्लिंगादितिसदाकाशयोर्मध्येबुद्धिमनसोउत्पद्येतेक्रमेणेत्यर्थः मनसिचाहंकारस्यप्रवेशइति
प्रकृतिरेवस्रष्ट्रत्वंस्वमोक्षार्थंतस्याःनित्यत्वात्महदादीनांतुस्वस्वविकारस्रष्टृत्वंनस्वमोक्षार्थंअनित्यत्वादितिविशे
षमाह आत्मार्थत्वात्सृष्टेर्नैषामात्मार्थआरंभः एषांमहदादीनांस्रष्टृत्वस्यात्मार्थत्वात्पुरुषमोक्षार्थत्वात्पुरुषमो
क्षार्थत्वात् नस्वार्थआरंभःस्रष्टृत्वंविनाशित्वेनमोक्षायोगादित्यर्थः परमोक्षार्थत्वेचावश्यकेपुरुषमोक्षार्थकत्व

मेवयुक्तंनप्रकृतिमोक्षार्थकत्वंतस्याःपुरुषगुणत्वादिति खंडदिक्कालयोःसृष्टिमाहदिक्कालावाकाशादिभ्यः नित्योयो
दिक्कालौतावाकाशप्रकृतिभूतप्रकृतेर्गुणएवविशेषएवअतोदिकालयोर्विभुत्वोपपत्तिःआकाशवत्सर्वगतश्चनित्य
इत्यादिश्रुत्युक्तंविभुत्वंनित्यत्वंचाकाशस्योपपन्नंयोतुखंडदिकालौतौतत्तदुपाधिसंयोगादाकाशादुत्पद्यतेइत्यर्थः
आदिशब्देनोपाधिग्रहणादितियद्यपितत्तदुपाधिविशेषाकाशमेवखंडदिक्कालौतथापिविशिष्टस्यातिरिक्तताभ्यु
पगमवादेनवैशेषिकनयेश्रोत्रस्यकार्यतावत्तत्कार्यमत्रोक्तं इदानींमहदादिक्रमेणतुक्तानूस्वरूपतोधर्मतश्च
क्रमेणदर्शयति अध्यवसायोबुधिः महतत्वस्यपर्यायोबुधिरितिअध्यवसायश्चनिश्चयारव्यतस्यासाधारि
णीवृत्तिरित्यर्थः अभेदनिर्देशस्तुधर्मधर्म्यभेदात् अस्याश्चबुद्धेर्महत्वंस्वेतरसकलकार्यव्यापकत्वात् महैश्व
र्याच्चमंतव्यं सविकारात्प्रधानात्तुमहत्तत्वमजायत महानितियतःख्यातिर्लोकानांजायतेसदाइतिस्मृतेःअ
स्यमहतोभूतस्यनिःश्वसितंएतदृग्वेदइत्यादिश्रुतिस्मृतिषुचहिरण्यगर्भचेतनेपिमहानितिशब्दोबुध्यभिमा
नित्वेनैवयथापृथिव्यभिमानिचेतनेपृथिवीशब्दस्तद्वत् एवमेवरुद्रादिष्वहंकारादिशब्दोपिबोध्यः प्रकृत्यभिमा
निदेवतामारभ्यसर्वेषामेवभूताभिमानिपर्यंतानांदेवानांस्वस्वबुध्धिरूपाश्चप्रतिनियतोपाधयोमहतत्वस्यैवें
शाइति महतत्वस्यापरानपिधर्मानाह तत्कार्यधर्मादि धर्मज्ञानवैराग्यैश्वर्यादयोपितद्युपादानकानिनाहं
काराद्युपादानकानिबुधेरेवनिरतिशयसत्वकार्यत्वादित्यर्थः नन्वेवंकथंनरपश्वादिगतानांबुध्यंशानांअध
र्मप्राबल्यमुपपद्यतांतत्राह महद्द्यरागाद्विपरीतं तदेवमहतत्वंरजस्तमोभ्यामुपरागात् विपरीतंक्षुद्रमध
र्माज्ञानवैराग्यानैश्वर्यमधर्मकमपिभवतीत्यर्थः एतेनसर्वएवपुरुषाईश्वराइतिस्मृतिप्रवादोप्युपपादितः स
र्वेषामीनांस्वाभाविकैश्वर्यस्यरजस्तमोभ्यामेवावरणादितिनन्वेवंधर्माद्यवस्थानर्थंबुधेरपिनित्यत्वात् कथ
कार्यत्वेतिचेतनप्रकृत्यंशरूपेबीजावस्थामहतत्वेसत्वविशेषकमेवासनादीनामवस्थानात् तस्यैवज्ञानकारणा
वस्थायांकुरवत्उत्पत्त्यंगीकारात् यथाकाशवदेवानित्यानित्योभयरूपाबुधिः यथाचकारणावस्थाकाशेप्रकृति २

83
1990

व्यवहारएवनाकाशव्यवहारः आकाशलिंगत्वाभावात् एवंकारणावस्थबुधावपिप्रकृतिव्यवहारएवबुधिलिंगाध्य
वसायाद्यभावादिति महत्तत्वंलक्षयित्वातत्कार्यमहंकारंलक्षयति अभिमानोहंकारः अहंकारोतीत्यहंकारः कुं
भकारवद्कर्तः करणद्रव्यंसचधर्मधर्म्यभेदादभिमानइत्युक्तोसाधारणवृत्तितासूचनाय बुध्यानिश्चितएवार्थेहं
कारममकारौजायेते अतोवृत्त्योः कार्यकारणभावानुसारेणवृत्तिमत्तोरपिकार्यकारणभावउन्नीयतइतिप्रागेवो
क्तं अंतःकरणमेकमेवांबीजांकुरमहावृक्षादिवद्वृत्तित्रयमात्रभेदात् कार्यकारणभावमापद्यतइतिप्रागेवोक्तं
अतएवचवायुमात्स्ययोःमनोमहान्मतिर्ब्रह्मापूर्बुधिःख्यातिरीश्वरइतिमनोबुध्योरेकपर्यायत्वमुक्तमिति क्र
मागतमहंकारस्यकार्यमाह एकादशपंचतन्मात्रतत्कार्यं एकादशेंद्रियाणिशब्दादिपंचतन्मात्रंचाहंकारस्य
कार्यमित्यर्थः मयातेनेंद्रियेणेदंरूपादिकंभोक्तव्यमिदंमेसुखसाधनमित्याद्यभिमानादेवादिसर्गेधींद्रियत
द्विषयोरुत्पत्त्याहंकारइंद्रियादिहेतुःलोकेभोगाभिमानिनैवरागद्वाराभोगोपकरणनिर्माणदर्शनात् रूपरागा
दभूच्चक्षुरित्यादिनामोक्षधर्मेहिरण्यएवादावहंकारादुत्पद्यतेइतिविशेषः तन्मात्रादीनांतत्तत्कार्यत्वादिति अ
त्रापिविशेषमाह सात्विकमेकादशकंप्रवर्ततेवैकृतात्सात्विकाहंकाराज्जायतइत्यर्थः अतश्चेत्यहंत्रिधा अहं
तत्वाद्विकुर्वाणान्मनोवैकारिकादभूत् वैकारिकाश्चयेदेवाअर्थाभिव्यंजनंयतः तैजसादिंद्रियाण्येवज्ञानक
र्माणिच तामसोभूतसूक्ष्मादिर्यतःखंलिंगमात्मनइत्यादिस्मृतिभ्यएवनिर्णयात् अतएवपुराणाद्यनुसारे
णकारिकायामप्येतदुक्तंसात्विकएकादशकःप्रवर्तते वैकृतादहंकारात्भूतादेस्तन्मात्रःसतामसस्तैजसा
दुभयमितितैजसोराजसःउभयंज्ञानकर्मेंद्रियं ननुदेवतात्वयश्रुतिरित्यागामिसूत्रेकरणानांदेवान्वक्ष्यतिव
त्कथंकारिकयापिदेवानांसात्विकाहंकारकार्यत्वंनोक्तमितिउच्यतेसमष्टिचक्षुरादिशरीरिणःसूर्यादिचेतना
एवचक्षुरादिदेवताश्रूयंते अतश्चव्यष्टिकरणानांसमष्टिकरणानिदेवतेत्येवपर्यवस्यतितथाचव्यष्टिसमष्ट्यो
रेकताशयेनात्रशास्त्रदेवाःकरणेभ्योनपृथग्निर्दिश्यंतेअतःसमष्टींद्रियाण्यपिमनोपेक्षया अल्पसत्वेनरा॥

सां॰ भा॰ असाहंकारकार्यत्वेनैवनिर्दिष्टानिस्मृतिषुचव्यष्टींद्रियापेक्षयाअधिकसत्वत्वेनसात्विकाहंकारकारतयोक्तानी
त्यविरोधइतिमंतव्यं तदेवमहंकारस्यत्रैविध्यान्महतोपितत् कारणस्यत्रैविध्यंमंतव्यं सात्विकोराजसश्चैवता
२ मसश्चत्रिधामहानइतिस्मरणात् त्रैविध्यंचानयोर्व्यक्तिभेदादभेदाद्वेत्यन्यदेतत् एकादशेंद्रियाणिदर्शयति
कर्मेंद्रियबुद्धींद्रियैरांतरमेकादशकं कर्मेंद्रियाणिवाक्पाणिपादपायूपस्थाख्यानिपंचज्ञानेंद्रियाणिचचक्षुश्रो
त्रत्वक्रसनघ्राणाख्यानिपंचएतैर्दशभिः सहांतरंमनएकादशकंएकादशेंद्रियमित्यर्थः स्वस्वघातेश्चांतस्यकर
णाभिंद्रियंतथाचाहंकारकार्यत्वेसतिकरणत्वमिंद्रियत्वमिति इंद्रियाणांभौतिकत्वमतंनिराकरोति अहंकारिकत्व
श्रुतेर्नभौतिकानि इतींद्रियाणीशेषः आहंकारिकत्वेचप्रमाणभूताश्रुतिः कालभुधाप्याचार्यवाक्यान्मन्वादिरि
वलस्मृतिभ्यश्चानुमीयतेप्रत्यक्षाश्रुतिरहंबहुस्यामित्यादि नन्वन्नमयंहिसौम्यमनइत्यादिभौतिकत्वेपिश्रुति
रस्तीतिचेत् नप्रकाशत्वसाम्येनांतःकरणोपादानत्वस्यैवोचिततयाहंकारिकत्वश्रुतेरेवमुख्यत्वात् भूतानाम
पिहिरण्यगर्भसंकल्पजन्यतयाजनस्यमनोजन्यत्वाच्चव्यष्टिमननुप्यापिआहंकारिकत्वनिर्णयोनघटतेअस्य
पुरुषस्याग्निंवागप्येतिवातंप्राणश्चक्षुरादित्यमित्यादिश्रुतौदेवतास्विंद्रियाणांलयकथनेनदेवतोपादानकत्व
स्याप्यवगमात् कारणएवहिकार्यस्यलयइत्याशंक्याह देवतालयश्रुतिर्नारंभकस्यादेवतासुयालयश्रुतिःसा
नारंभकस्यनारंभकविषयणीइत्यर्थः अनारंभकेपिभूतलेजलबिंदोर्लयदर्शनादनारंभकेष्वपिभूतेषु आ
त्मनोलयश्रवणाच्चविज्ञानघनएवैतेभ्योभूतेभ्यःसमुत्थायतान्येवानुविनश्यतीत्यादिश्रुतावितिभावः इंद्रि
याणांतर्गतंमनोनित्यमितिकेचित् तत्परिहरति तदुत्पत्तिश्रुतेर्विनाशदर्शनाच्च तेषांसर्वेषामेवेंद्रियाणांउत्प
त्तिरस्ति एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिचेत्यादिश्रुतेः वृक्षाद्यवस्थासुचक्षुरादीनामिवमनसोप्यप २
चयादिनाविनाशनिर्णयाच्चेत्यर्थः तथाचोक्तादशकेननिवर्ततेमनःसर्वेंद्रियाणिचेतिमनसोनित्यत्ववचना
निचप्रकृत्याख्यबीजपराणीति गोलकजातमेवेंद्रियमितिनास्तिकमतमपाकरोति अतींद्रियमिंद्रियंभ्रांता

85
1990

नामधिष्ठाने इंद्रियंसर्वमतींद्रियंनतुप्रत्यक्षंभ्रांतानामेवत्वधिष्ठानेगोलकेतादात्म्येनेंद्रियमित्यर्थः अधिष्ठानमित्ये
ववापाठः एकमेवेंद्रियंशक्तिभेदाद्विलक्षणकार्यकारीतिमतमपाकरोतिशक्तिभेदेपिभेदसिद्धौनैकत्वं एकस्ये
वेंद्रियस्यशक्तिभेदस्वीकारेपिइंद्रियभेदःसिध्यतिशक्तीनामपींद्रियत्वात् अतोनेकत्वंइंद्रियस्येत्यर्थः नन्वेक
स्मादहंकारान्नानाविधेंद्रियोत्पत्तिकल्पनायांन्यायविरोधस्तत्राहनकल्पनाविरोधःप्रमाणदृष्टस्यसुगमं एक
स्यैवमुख्येंद्रियस्यमनसोन्यदशशक्तिभेदादित्याह उभयात्मकंचमनः ज्ञानकर्मोभयेंद्रियात्मकंमनइत्यर्थः उ
भयात्मकमित्यस्यार्थंस्वयंविवृणोति गुणपरिणामभेदान्नानात्वमुभयथवत् यथैकएवनरःसंगवशान्नानात्वं
भजतेकामिनीसंगात्कामुकोविरक्तसंगाद्विरक्तोन्यसंगाच्चान्यएवंमनोपिचक्षुरादिसंगात्चक्षुराद्यैकीभा
वेनदर्शनादिवृत्तिविशिष्टतयानानाभवति तत्रहेतुर्गुणेत्यादिगुणानांसत्वादीनांपरिणामभेदेषुसामर्थ्या
दित्यर्थः एतच्चान्यत्रमनाअभवंनाश्रौषमित्यादिश्रुतिसिद्धात्चक्षुरादीनांमनःसंयोगंविनाव्यापाराक्ष
मत्वादनुमीयते ज्ञानकर्मेंद्रिययोर्विषयमाह रूपादिरसमलांतउभयोः अत्ररसांतांमलःपुरीषादिः तथा
चरूपरसगंधस्पर्शशब्दाःवक्तव्यादातव्यगंतव्यानंदयितव्योत्स्रष्टव्याश्चउभयोर्ज्ञानकर्मेंद्रिययोर्दशवि
षयाइत्यर्थः आनंदयितव्यंचोपस्थस्योपस्थातारं उपस्थस्यत्वकउपस्थातरंविषयइति यस्येंद्रियस्ययोनोप
कारणेतानींद्रियाणीत्युच्यंतेतदुभयमाह द्रष्टृत्वादिरात्मनःकरणत्वमिंद्रियाणां द्रष्टृत्वादिपंचकंवक्तृत्वा
दिपंचकंसंकल्पयितृत्वंचात्मनःपुरुषस्यदर्शनादिवृत्तौकरणत्वमिंद्रियाणामित्यर्थः ननुद्रष्टृत्वश्रोतृत्वादि त
कदाचिदनुभवेपर्यवसानात्पुरुषस्याविकारिणोपिघटतांवशत्वादिकंतुक्रियामात्रंततूकथंकूटस्थस्य
घटतामितिचेन्न अयस्कांतवत्सान्निध्यमात्रेणादर्शनादिवृत्तिकर्तृत्वस्यैवेतिआज्ञामात्रेणप्रेरयितृत्वद्रष्ट
त्वादिशब्दार्थत्वात्यथाहिमहाराजःस्वयमव्याप्रियमाणोपिसैन्येनकरणेनयोद्धाभवति आज्ञामात्रे
णप्रेरकत्वात्तथाकूटस्थोपिपुरुषःचक्षुराद्यखिलकरणेद्रष्टावक्तासंकल्पयिताचेत्येवमादिर्भवतिसंयो
गाख्यसांनिध्यमात्रेणैवतेषांप्रेरकत्वात् अयस्कांतमणिवदितिकर्तृत्वंचात्रकारकचक्रप्रयोक्तृत्वंकरणत्वं

सां॰ भा॰

४

तुक्रियाहेतुव्यापारवत्वंतत्साधकतमत्वंवाकुठारादिवत् यत्तुशास्त्रेषुपुरुषे दर्शनादिकर्तृत्वंनिषिध्यते तदनुकूलकृत्रिम
त्वंतत्क्रियावत्वंवातत्तथाचोक्तं अतआत्मनिकर्तृत्वमकर्तृत्वंचसंस्थितं निरिछत्वादकर्तासः कर्तासंनिधिमात्रतइति
अतएवकारकचक्रप्रयोक्तताशक्तेरात्मस्वरूपतयादृष्टत्वादिकं आत्मनोनित्यमितिश्रूयते नह्रष्टुर्दृष्टेर्विपरिलोपोवि
द्यतेनवक्तुर्वक्तेर्विपरिलोपोविद्यतइत्यादिनेतिननुप्रमाणविभागेप्रत्यक्षादिवृत्तीनामेवकरणत्वमुक्तं अत्रकथमिं
द्रियस्योच्यतइतिचेन्नप्रदर्शनादिरूपासुचक्षुरादिद्वारकबुद्धिवृत्तिष्वेंद्रियाणांकरणत्ववचनात्पुरुषनिष्ठेबोधा
ख्यफलेवृत्तीनांकरणत्वस्योक्तत्वादिति इदानीमंतःकरणत्रयस्यासाधारणवृत्तीराह त्रयाणांस्वालक्षण्यं त्रयाणां
महदहंकारमनसांस्वालक्षण्यंस्वस्वलक्षणमेवलक्षणमसाधारणीवृत्तिर्येषामितिमध्यमपदलोपी विग्रहः तस्य
भावस्तत्वमित्यर्थः लोकेचमहत्वोलक्षणमध्यवसायादिप्रकृष्टगुणवत्वं अहंकृतस्यचात्मन्यविद्यमानगुणारोपःमं
तुश्चइदमस्त्वित्यंगीकरणमितिबुधेर्वृत्तिरध्यवसायोऽभिमानोहंकारस्यसंकल्पविकल्पौमनसइत्यायातिसंक
ल्पश्चिकीर्षासंकल्पःकर्ममानसमित्यनुशासनात् विकल्पश्चसंशयोगोक्तभ्रमविशेषोवानतुविशिष्टज्ञानंतस्य
बुद्धिवृत्तित्वादितित्रयाणांसाधारणींवृत्तिमप्याह सामान्यकरणवृत्तिः प्राणाद्यावायवः पंचप्राणादिरूपापंच
वायुवत्संचारात् वायवोपिप्रसिद्धास्तेसामान्यास्ताधारणीकरणस्यांतःकरणत्रयस्यवृत्तिः परिणामभेदाइत्य
र्थः तदेतत्कारिकयोक्तं स्वालक्षण्यंवृत्तिस्त्रयस्यैषाभवत्यसामान्या सामान्यकरणवृत्तिः प्राणाद्यावयवःपंचेति
अत्रकश्चित् प्राणाद्यावायुविशेषाएवतेचांतःकरणवत्याजीवनयोनिप्रयत्नरूपयाव्याप्रीयंतइतिकत्वाप्राणाद्याः
करणवृत्तिरित्यभेदनिर्देशइत्याह तन्न नवायुक्रियेपृथगुपदेशात् इतिवेदांतसूत्रेणास्यवायुत्ववायुपरिणा
मत्वयोःस्फुटंप्रतिषेधात् अत्रापितदेकवाक्यतौचित्यात्मनोधर्मस्यकामादेः प्राणक्षोभकतायाःसामानाधिक
रण्येनैवौचित्याच्च वायुप्राणयोः पृथगुपदेशश्रुतयस्तुएतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच खंवायुर्ज्योति
रापश्चपृथिवीविश्वस्यधारिणीयोत्याइति अतएवलिंगशरीरमध्येप्राणानामगणनेपिनन्यूनताबुद्धिरेवक्रिया
शक्त्यासूत्रात्मप्राणादिनामकत्वादिति अंतःकरणपरिणामेपिवायुतुल्यसंचारविशेषाद्वायुदेवताधिष्ठितत्वाच्च ४

87/1990

वायुव्यवहारोपपत्तिरितिवैशेषिकाणामिवास्माकंनायंनियमोयदिंद्रियवृत्तिः क्रमेणैवभवतीनेकदेत्याह क्रमशोक्रम
शश्चेंद्रियवृत्तिःसुरामंज्योतिःसांकर्यस्यास्माकमदोषत्वात्सामग्रीसमवधानेसत्यनेकेरपींद्रियैरेकदैकवृत्त्युत्पादने
बाधकंनास्तीतिभावः इंद्रियवृत्तीनांविभागश्चकारिकयाव्याख्यातःशब्दादिषुपंचानामालोचनमात्रमिष्यतेवृत्तिःव
चनादानविहरणोत्सर्गानंदाश्चपंचानामितिआलोचनंचपूर्वाचार्यैर्व्याख्यातंअस्तिह्यालोचनज्ञानंप्रथमंनिर्विक
ल्पकं परंपुनस्तथावस्तुधर्मैर्जात्यादिभिस्तथेति० परंउत्तरकालीनंचवस्तुधर्मैर्द्रव्यरूपधर्मैस्तथाजात्यादिभिश्चज्ञा
नंसविकल्पकंतथाआलोचनाख्यंभवतीत्यर्थः तथाचनिर्विकल्पकज्ञानमेवालोचनमिंद्रियजन्यंचभवतिसविक
ल्पकंतुमनोमात्रजन्यमितिश्लोकार्थमाह तत्रयोगभाष्येव्यासैर्विशिष्टज्ञानस्यापिऐंद्रियकत्वस्यव्यवस्थापितत्वा
त् इंद्रियैर्विशिष्टज्ञानेबाधकाभावाच्चसएवचसूत्रार्थमप्येवंव्याचष्टेबाह्येंद्रियमारभ्यबुद्धिपर्यंतस्यवृत्तिरुऽ
त्पत्तिः क्रमेणभवतिकदाचित्तुव्याघ्रादिदर्शनकालेभयविशेषात् विद्युल्लतेवसर्वकरणेष्वेकदैववृत्तिर्भवतीत्य
र्थइतितदाप्यसत् आस्मिन्सूत्रेइंद्रियवृत्तीनामेवक्रमिकाक्रमिकत्ववचनात्नबुध्यहंकारवृत्त्योःप्रसंगोप्यस्ति
किंत्विएकदानेकेंद्रियवृत्तावेववादिविप्रतिपत्त्यात्तन्निर्णयपरत्वमेकसूत्रस्यौचित्तंमनोगुणत्वप्रतिषेधायनूनु
कारेकेतान्वेषणपरत्वमितिपिंडीकृत्यबुद्धिवृत्तिःसंसारनिदानताप्रतिपादनार्थमादौदर्शयति वृत्तयःपंचतय्यः
क्लिष्टाःक्लिष्टीःक्लिष्टाअक्लिष्टावाभवंतिवृत्तयःपंचतय्यः पंचप्रकाराएवनाधिकाइत्यर्थः क्लिष्टादुःखदासंसारिक
वृत्तयःअक्लिष्टाश्चतद्विपरीतायोगकालीनवृत्तयः वृत्तीनांपंचप्रकारत्वंपातंजलतंत्रेणोक्तं प्रमाणविपर्ययवि
कल्पनिद्रास्मृतयइति तत्रप्रमाणवृत्तिरत्राप्युक्ताविपर्ययस्त्वस्माकंविवेकाग्रहएवअन्यथाख्यातेर्निरस्यत्वात् वि
कल्पस्तुविशेषदर्शनकालेपिराहोःशिरःपुरुषस्यचेतन्यंइत्यादिज्ञानंनिद्राचसुषुप्तिकालीनाबुद्धिवृत्तिःस्मृति
श्चसंस्कारजन्यज्ञानमितिएतत्सर्वंपातंजलेसूत्रितंयाएतावद्धिवृत्तयउक्ताः एतदौपाधिकीचपुरुषस्यान्यरू
पतानस्वतः एतंनिवृत्तौचपुरुषःस्वरूपेवस्थितोभवतीत्यनयापिदिशापुरुषस्यस्वरूपंपरिचाययतितंनिवृत्तावु
पशांतोपरागःस्वस्थः तासांवृत्तीनांविगमदशायांशांतत्वात्निर्विवेकःस्वस्थोभवतिकैवल्यइवान्यदपीत्यर्थः त

सां०भा०
५

तथाचयोगसूत्रत्रयः योगश्चित्तवृत्तिनिरोधः तदाद्रष्टुःस्वरूपेवस्थानं वृत्तिसारूप्यमितरत्रेति इदमेवचपुरुषस्यस्व
स्थत्वंयदुपाधिवृत्तेःप्रतिबिंबस्यनिवृत्तिरितिएतादृशीचावस्थापुरुषस्यवासिष्ठेदृष्टांतेनप्रदर्शितायथा अनाघ्राखि
लशैलादिप्रतिबिंबेहियादृशीस्यादर्पणेदर्पणेताकेवलात्मस्वरूपिणीअहंत्वंजगदित्यादौप्रशांतेदृश्यसंभ्रमेस्यात्ता
दृशीकेवलतास्थितेद्रष्टर्यवीक्षणइति एतदेवदृष्टांतेनविवृणोति कुसुमवच्चमणिः चकारोहेतौकुसुमेनेवमणिरि
त्यर्थः यथाजपाकुसुमेनस्फटिकमणिरक्तोस्वच्छोभवतितन्निवृत्तौरागशून्यःस्वच्छोभवति तद्वदितितदेतदुक्तंकौर्मे
यथासंलक्ष्यतेरक्तःकेवलःस्फटिकोजनैः रंजकाद्युपधानेनतद्वत्परमपुरुषः इति ननुकस्यप्रयत्नेनकरणजातं
प्रवर्ततांपुरुषस्यकूटस्थत्वात् ईश्वरस्यचप्रतिषिद्धत्वादितितत्राह पुरुषार्थंकरणोद्भवोप्यदृष्टोल्लासात् प्रधानप्र
वृत्तिवत् पुरुषार्थःकरणोद्भवः करणानांप्रवृत्तिरपिपुरुषस्यअदृष्टोभिव्यक्तिरेवभवतीत्यर्थः अदृष्टंचोपाधेरे
वपरार्थंस्वतःप्रवृत्तौदृष्टांतमाह धेनुवद्वत्साय यथावत्सार्थंधेनुःस्वयमेवक्षीरंस्रवतिनान्ययत्नमपेक्षतेतथै
वस्वामिनःपुरुषस्यकृतेस्वयमेवकरणानिप्रवर्तंतइत्यर्थः दृश्यतेचसुषुप्त्यात्स्वयमेवबुद्धेरुत्थानमिति एतदेव
कारिकयाप्युक्तंस्वांस्वांप्रतिपद्यतेपरस्पराकूतहेतुकांवृत्तिंपुरुषार्थएवहेतुःकेनचित्कार्यतेकरणमिति स्वांस्वां
मिलित्वाकियंतिकरणानीत्याकांक्षायामाह करणंत्रयोदशविधमवांतरभेदात् अतःकरणत्रयंदशबाह्यकर
णानिमिलित्वात्रयोदशतेषामपिव्यक्तिभेदेनानंत्यंप्रतिपादयितुंविधमित्युक्तंबुद्धिरेवमुख्यकरणमित्याशयेनो
क्तमवांतरभेदादितिएकस्यैवबुद्ध्याख्यकरणस्यकरणानामनेकत्वादित्यर्थः ननुबुद्धिरेवपुरुषेत्यर्थसमर्प
कत्वान्मुख्यंकरणंअन्येषांचकरणत्वंगौणंतत्रकोगुणइत्याकांक्षायामाह इंद्रियेषुसाधकतमत्वागुणयोगात्कुठा
रवत् इंद्रियेषुपुरुषार्थसाधकतमत्वरूपःकरणस्यबुद्धेर्गुणः परंपरयास्तिअतस्त्रयोदशविधंकरणमुपपद्य
तइतिसूत्रेणान्वयःकुठारवदितियथाफलयोगव्यवच्छिन्नतयाप्राहारस्यैवछिदायांमुख्यकरणत्वेपिप्रकृष्टसाध
नत्वगुणयोगात्कुठारस्यापिकरणत्वंतथेत्यर्थः अंतःकरणस्यैकत्वमभिप्रेत्याहंकारस्यगौणकरणत्वमत्रनोक्तं
गौणमुख्यभावव्यवस्थांविशिष्याह द्वयोःप्रधानंमनोलोकवद्भृत्यवर्गेषु द्वयोर्बाह्याभ्यंतरमध्येमनोबुद्धिरेवप्रधानं ५

89/1990

मुख्यंसाक्षात्करणमितियावत्पुरुषेर्थसमर्पकत्वात् यथाभृत्यवर्गेषुमध्येकश्चिदेवलोकोराज्ञःप्रधानोभवतिअन्ये
चतदुपसर्जनीभूतानामाध्यक्षादयस्तद्वदित्यर्थः अत्रमनःशब्दोनतत्तीर्थांतःकरणवाचीवक्ष्यमाणास्याखिलसंस्का
राधारत्वस्यबुध्यतिरिक्तेषसंभवात्संभवेवाबुद्धिकल्पनवैयर्थ्यादितिबुद्धेःप्रधानत्वेहेतूनाहत्रिभिःसूत्रैः अव्यभि
चारात् सर्वकरणव्यापकत्वात्फलाव्यभिचाराद्वेत्यर्थः तथाशेषसंस्काराधारत्वात् बुद्धेरेवाखिलसंस्काराधारता
नतुचक्षुरादेरहंकारमनसोर्वापूर्वदृष्टश्रुतार्थानामंधबधिरादिभिःस्मरणानुपपत्तेः तत्वज्ञानेनाहंकामनसोर्ल
येपिस्मरणदर्शनाच्च अतोशेषसंस्काराधारतयापिबुद्धिरेवसर्वेभ्यःप्रधानमित्यर्थः स्मृत्यानुमानाच्च स्मृत्याचिंत
नरूपयावृत्त्याप्राधान्यानुमानाच्चेत्यर्थः चिंतावृत्तिर्हिध्यानाख्यासर्ववृत्तिभ्यउत्कृष्टातदाश्रयतयाचचिंतापरनाम्नी
बुद्धिरेवश्रेष्ठाअन्यवृत्तिककरणेभ्यइत्यर्थः इत्थंवाव्याख्येयं नन्वेवंबुद्धिरेवकरणमस्तुतत्ववांतरकरणैरित्याशंका
यामाह संभवेन्नस्वतइति चक्षुरादिद्वारतांविनाखिलव्यापारेषुबुद्धेःस्वतःकरणंनसंभवेत् अंधादेरपिरू
पादिदर्शनापत्तेरित्यर्थः नन्वेवंबुद्धेरेवप्राधान्यंकथंमनसउभयात्मकत्वंप्रागुक्तंतत्राह आपेक्षिकोगुणप्रधान
भावःक्रियाविशेषात् क्रियाविशेषंप्रतिकरणानामापेक्षिकोगुणप्रधानभावःचक्षुरादिव्यापारेषुमनःप्रधा
नंमनोव्यापारेचाहंकारःअहंकारव्यापारेचबुद्धिःप्रधानंनन्वस्यपुरुषस्येयंबुद्धिरेवकरणंनबुध्यंतरमित्येवव्यव
स्थाकिंनिमित्तिकेत्याकांक्षायामाह तत्कर्मार्जितत्वात्तदर्थमपिचेष्टालोकवत् तत्पुरुषीयकर्मजत्वात्करणस्यत
त्पुरुषार्थमपिचेष्टासर्वव्यापारोभवतिलोकवत् यथालोकेयेनपुरुषेणक्रियादिकर्मणार्जितोपिकुठारादिःत
त्पुरुषार्थमेवतस्यच्छिदादिव्यापारइत्यर्थः अतःकरणव्यवस्थेतिभावः यद्यपिकूटस्थतयापुरुषस्यकर्मनास्तितथा
पिपुरुषभोगसाधनतयापुरुषस्वामिकत्वेनराज्ञोजयादिवदेवपुरुषस्यकर्मोच्यतेननुकर्मणएवतत्पुरुषीयत्वे
किंनियामकमितिचेत् तथाविधंकर्मांतरमेवअनादित्वाच्चनानवस्थादोषायेति यत्तुकश्चिदविवेकीवदतिबुद्धि
प्रतिबिंबस्यावस्तुत्वेनकर्मतितत्रयोगभाष्येऽस्मदुक्तप्रकारस्यैवयुक्तत्वेनान्यप्रकारस्याप्रमाणिकत्वात् प्रतिबिंबस्याव
स्तुत्वेनकर्माद्यसंभवादन्यथाप्रतिबिंबस्यप्रकटीकर्तुं उपसंहरति समानकर्मयोगेबुद्धेःप्रधान्यंलोकवत् यद्यपिपुरु

सां॰भा॰
६

वार्थत्वेनसमानएवसर्वेषांकरणानांव्यापारस्तथापिबुद्धेरेवप्राधान्यंलोकवत्लोकेहिग्रामाधीकरत्वाविशेषेपितत्राध्य
क्षादिषुमध्येमंत्रिणश्चप्राधान्यमित्यर्थः अतएवबुद्धिरेवमहानितिसर्वशास्त्रेषुगीयतइतिबोध्यम् अध्यायसमाप्तौ लिंगदे
हस्यदृकंपलक्षणशसंख्यकं प्रधानकार्यंतत्सूक्ष्ममंत्राध्यायेनुवर्णितमितिश्रीविज्ञानाचार्यनिर्मितेकापिलसांख्यभा
ष्येप्रधानकार्याध्यायोद्वितीयः॥ इतः परंप्रधानस्यस्थूलकार्यंमहाभूतानिशरीरद्वयंचवक्तव्यंतत्रचविविधयोनिग
त्यादयोज्ञानसाधनानुष्ठानहेतुपरवैराग्यायतत्रचपरवैराग्यायज्ञानसाधनान्याखिलानिवक्तव्यानीतितृतीयार
भः अविशेषाद्विशेषारंभः नास्तिविशेषः शांतघोरमूढत्वादिरूपोयत्रेत्यविशेषोभूतसूक्ष्मंपंचतन्मात्राख्यंत
स्माच्छांतादिरूपविशेषवत्त्वेनविशेषाणांस्थूलानांमहाभूतानामारंभणमित्यर्थः सुखात्मोधोकताहिशांततादिरूपस्थ
लभूतेष्वेवतारतम्यादिभिरभिव्यज्यतेनसूक्ष्मेषुतेषांशांत्यैकरूपतयैवयोगिद्याभिव्यक्तेरिति तदेवंपूर्वाध्यायमा
रभ्यत्रयोविंशतितत्त्वानामुत्पत्तिमुक्त्वाबस्माच्छरीरद्वयोत्पत्तिमाह तस्माच्छरीरस्यतस्मात्त्रयोविंशतितत्वात्समस्त्य
स्तात्स्थूलसूक्ष्मशरीरद्वयस्यारंभइत्यर्थः संप्रतित्रयोविंशतितत्त्वेसंसारान्यथानुपपत्तिंप्रमाणयति तद्बीजात्सं
सृतिः तस्यशरीरबीजात्त्रयोविंशतितत्त्वमयात्सूक्ष्माद्धेतोः पुरुषस्यसंसृतिर्गतागतेभवतः कूटस्थस्यविभुत
यास्वतोगत्याद्यसंभवात्कथंशरीरव्यवहारस्तत्राह तदधिष्ठानाश्रयेदेहतद्वादः तस्यलिंगस्यदधिष्ठानस्यसमाश्र
योवक्ष्यमाणभूतपंचकंतस्याश्रयेषाट्कौशिकदेहेतद्वादोदेहवादस्तद्वादात्तस्याधिष्ठानशब्दोक्तस्यदेहवादादित्य
र्थः लिंगसंबंधादधिष्ठानस्यदेहत्वं अधिष्ठानाश्रयत्वाच्चस्थूलस्यदेहत्वमितिपर्यवसितार्थः अधिष्ठानशरीरंच
सूक्ष्मपंचभूतात्मकंप्रवक्ष्यतेतथाचशरीरत्रयंसिद्धं यत्तुवाहिआतिकएकोस्तिदेहोन्यस्त्वाधिभौतिकः सर्वासां
भूतजातीनांब्रह्मणस्त्वैकवाहिकमितिआदिशास्त्रेषुशरीरद्वयमेवश्रूयते तत्लिंगशरीराधिष्ठानशरीरयोर
न्योन्यनियतत्वेनचैकताभिप्रायादिति ननुषाट्कौशिकातिरिक्तेलिंगशरीराधिष्ठानभूतेशरीरांतरेकिंप्रमाण
मित्याकांक्षायामाह नस्वातंत्र्यात्तदृतेछायावच्चित्रवच्च तल्लिंगशरीरंतदृतेः धिष्ठानंविनास्वातंत्र्यान्नतिष्ठति म
याच्छायानिराधारानतिष्ठतियथावाचित्रमित्यर्थः तथाचस्थूलदेहंत्यक्त्वालोकांतरगमनायलिंगदेहस्याधारभूतंश

91
1990

रीरांतरंसिध्यतइतिभावः तस्यचस्वरूपंकारिकायामुक्तं सूक्ष्मामातापितृजा सहप्रभूतैस्त्रिधाविशेषाःस्युः सूक्ष्मा
स्तेषांनियतामातापितृजानिवर्तन्तइति अत्रतन्मात्रकार्यंमातापितृजशरीरापेक्षयासूक्ष्मंतद्भूतपंचकंपादिभ्योविना
यथाछाया तद्वद्विनाविशेषैर्नतिष्ठतिनिराश्रयंलिंगमितिविशेषैः स्थूलभूतैः सूक्ष्माख्यैः स्थूलावांतरभेदैरितियाव
दस्यांकारिकायांसूक्ष्माख्यायांस्थूलभूतानांलिंगशरीराद्युद्भवगमेनपूर्वोत्पन्नमसक्तंनियतंमहदादिसूक्ष्मपर्यंत
मित्यादिपूर्वोदाहृतकारिकायांसूक्ष्मभूतपर्यंतस्यलिंगत्वंनार्थः किंतुमहदादिरूपंयल्लिंगंतत्वाह्यरूसूक्ष्मपर्य
तंसंसरतितेनसहसंसरतीत्यर्थः नन्वेवंलिंगघटकपदार्थाःकियंतइतिकथमवधार्यमितिचेत्वासनाभूतसू
क्ष्मंचकर्मविद्येतथैवच दशेंद्रियमनोबुद्धिरेतल्लिंगंविदुर्बुधाइतिवासिष्ठादिवाक्येभ्यः अत्रलिंगशरीरप्रतिपा
दनेनंवपूर्वापरकमिपिव्याख्येयमित्याशयेनबुद्धिधर्माणामपिवासनाकर्मविद्यानांपृथगुपन्यासः भूतसूक्ष्मं
वातत्तन्मात्रादशेंद्रियाणिचज्ञानकर्मेंद्रियभेदेनपुरद्वयमित्याशयः यत्तुमायावादिनोलिंगशरीरस्यतन्मात्र
स्थानेप्राणादिपंचकंप्रक्षिप्यपुर्यष्टकंचान्यथाकल्पयंतितदप्रामाणिकमिति ननुमूर्तद्रव्यत्वयावाय्वादिरिवलिं
गस्याकाशमेवसंगेनाधारोस्तुव्यर्थमन्यत्संगिकल्पनामितितत्राह मूर्तत्वेपिचसंघातयोगात्तरणिवत् मूर्तत्वे
पिनस्वातंत्र्यादसंगतयावस्थानंप्रकाशरूपत्वेनसूर्यस्येवसंपातसंगानुमानादित्यर्थः सूर्यादीनिसर्वाणितेजां
सिपार्थिवद्रव्यसंगेनैवावस्थितानिदृश्यंतेलिंगंचसत्वप्रकाशमयमतोभूतसंगतमिति लिंगस्यपरिमाणम
वधारयति अणुपरिमाणंतत्कृतिश्रुतेः तल्लिंगमणुपरिमाणंपरिच्छिन्नत्वंसंतमेवअणुसावयवत्वस्योक्त
त्वात् कुतः कृतिःश्रुतेः क्रियाश्रुतेः विज्ञानंयज्ञंतनुतेकर्माणितनुतेपिचेत्यादिश्रुतिविज्ञानाख्यबुद्धिप्रधान
तयाविज्ञानस्यलिंगस्याखिलकर्मश्रवणादित्यर्थः विभुत्वेसतिक्रियानसंभवतीति तद्कृतिश्रुतेरितिपाठस्तुस
मीचीनः लिंगशरीरस्यचगतिःश्रुतिः तमुत्क्रामंतंप्राणोनुत्क्रामतिप्राणमुत्क्रामंतंसर्वेप्राणाअनुत्क्रामंतिसवि
ज्ञानोभवतिसविज्ञानमेवावक्रामतीतिसविज्ञानोबुद्धिसहितएवजायतेसविज्ञानंयथास्यात्तथासंसरतीत्ये
त्यर्थः परिच्छिन्नत्वयुक्त्यंतरमाह तदन्नमयत्वश्रुतेः तस्यालिंगस्यैकदेशतोन्नमयत्वश्रुतेर्नविभुत्वंसंभवतीति

सां०भा० विभुत्वे सति नित्यतापत्तेरित्यर्थः साच श्रुतिर्हि अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागित्यादिः य
द्यपि मन आदीनि न भौतिकानि तथापि अन्नसंसृष्टसजातीयांशपूरणादन्नमयत्वादिव्यवहारो बोध्यः अचेतना
७ नां लिंगानां किमर्थं संसृतिर्देहांतरसंचार इत्याशंकायामाह पुरुषार्थं संसृतिर्लिंगानां सूपकारवद्राज्ञः यथा राज्ञः
सूपकाराणां पाकशालासु संचारो राजार्थं तथा लिंगशरीराणां संसृतिः पुरुषार्थेत्यर्थः लिंगशरीरमशेषविशे
षितो विचारितमिदानीं स्थूलशरीरमपि तथा विचारयति पांचभौतिको देहः एवंभूतानां मिलितानां परिणा
मो देह इत्यर्थः मतांतरमाह चातुर्भौतिकमित्येके आकाशस्यानारंभकत्वमभिप्रेत्येदं एकभौतिकमित्यपरो
पार्थिवमेव शरीरं अन्यानि च भूतान्युपष्टंभकमात्राणि इति भावः अथवा एकभौतिकमेवैकभौतिकमित्यर्थः
मनुष्यादिशरीरे पार्थिवांशाधिक्येन पार्थिवता सूर्यादिलोकेषु च तेज आधिक्येन तैजसादिना शरीराणां स्फ
वर्णादीनां इवेति इमं च पक्षं पंचमाध्याये पि सिद्धांतयिष्यति देहस्य भौतिकत्वेन यत्सिध्यति तदाह न सांसि
धिकं चैतन्यं प्रत्येकादृष्टेः भूतेषु पृथक्कृतेषु चैतन्यादर्शनाद्भौतिकस्य देहं न स्वाभाविकं चैतन्यं किंतु औपाधिकमि
त्यर्थः बाधकांतरमाह प्रपंचमरणाद्यभावश्च प्रपंच सर्वस्यैव मरणं सुषुप्त्याद्यभावश्च देहस्य स्वाभाविक
चैतन्ये सति स्यादित्यर्थः मरणसुषुप्त्यादिकं हि देहस्याचेतनता सा च स्वाभाविकचैतन्ये सति नोपपद्यते स्व
भावस्य यावद्द्रव्यभावित्वात् इति प्रत्येकादृष्टेरिति यदुक्तं तत्राशंक्य परिहरति मदशक्तिवत्प्रत्येकपरिदृष्टेः
सांहत्ये तदुद्भवः ननु यथा मादकताशक्तिः प्रत्येकद्रव्यावृत्तिरपि मिलितद्रव्ये वर्तते एवं चैतन्यमपि स्यादिति
चेन्न प्रत्येकपरिदृष्टे सति सांहत्ये तदुद्भवः संभवात् प्रकृते तु प्रत्येकपरिदृष्टत्वं नास्ति दृष्टांते प्रत्येकं शा
ल्यादिषु सूक्ष्मतया मादकशक्तिसिद्धेः संहतभावकाले मादकत्वाविर्भावमात्रं सिध्यति दार्ष्टांतिके तु प्र
त्येकं भूतेषु सूक्ष्मतया न केनापि प्रमाणेन चैतन्यं सिद्धमित्यर्थः ननु समुच्चिते चैतन्यदर्शनेन प्रत्येकभू
तेषु सूक्ष्मचैतन्यशक्तिरनुमेयेति चेत् न अनेकभूतेष्वनेकचैतन्यशक्तिकल्पनायां गौरवेण लाघवादेकस्यैव ७
नित्यचित्स्वरूपस्य कल्पनौचित्यात् ननु यथाऽवयवे वर्तमानमपि परिमाणं जलाहरणादिकार्यं घटादौ

93/1990

दृश्यते एवमेव शरीरे चैतन्यं स्यादिति मैवं भूतगतविशेषगुणानां सजातीयकारणजन्यतया कारणे चैतन्यं विना देहे
चैतन्यासंभवादिति पुरुषार्थं संसृतिर्लिंगानामित्युक्तं तत्र लिंगानां स्थूलदेहसंचाराख्यजन्मनो यो यः पुरुषार्थः संसृति
लिंगनयेन व्यापारेणासिध्यति तदाह सूत्राभ्यां ज्ञानान्मुक्तिः लिंगसंसृतितो जन्महारविवेकसाक्षात्कारस्तस्मान्
मुक्तिरूपः पुरुषार्थो भवतीत्यर्थः ज्ञानादिकं च प्रत्ययसंगतया कारिकायां परिभाषितं एषः प्रत्ययसर्ग इति विपर्ययाश
क्तितुष्टिसिध्याख्य इति विपर्ययशक्तितुष्टिसिध्याख्य विपर्ययादयो व्याख्यास्यंते प्रवस एव बुद्धिसर्गः प्रयो
जनयोगेन सूत्रे रुच्यत इति विशेषः बंधो विपर्ययात् विपर्ययात्तु सुखदुःखात्मको बंधरूपः पुरुषार्थो लिंगसंसृ
तितो भवतीत्यर्थः ज्ञानविपर्ययाभ्यां मुक्तिबंधावुक्तौ तत्रादौ ज्ञानाद् मुक्तिं विचारयति नियतकारणत्वान्न स
मुच्चयविकल्पौ यद्यपि विद्यां चाविद्यां च यस्तद्वेदोभयं सहेत्यादिश्रूयते तथापि अविवेकविनिवर्तको लोकसि
द्धतया ज्ञानस्य नियतकारणत्वात् अविद्याख्यकर्मणा सह ज्ञानस्य मोक्षजनने समुच्चयो विकल्पो वा नास्तीत्यर्थः
तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेऽयनाय न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुरित्यादिश्रु
तिभ्योऽपि कर्मणो न साक्षान्मोक्षहेतुत्वं समुच्चयानुष्ठानश्रुतिस्त्वंगांगिभावादिभिरप्युपपद्यत इति समुच्चयविकऽ
ल्पयोरभावे दृष्टांतमाह स्वप्नजागराभ्यामिव मायिकामायिकाभ्यां नोभयोर्मुक्तिः पुरुषस्य यथा मायिकामायिक
योरनुष्ठितज्ञानयोः पुरुषस्य मुक्तिरपि न स्यादित्यर्थः मायिकत्वं चासत्यत्वमस्थिरत्वमिति यावत् तच्च स्वाप्नेष्वस्ति जा
ग्रत्पदार्थस्तु स्वभावापेक्षयासत्य एव कूटस्थपुरुषापेक्षयैवास्थिरत्वेनासत्यत्वात् अतः स्वप्नविलक्षणस्तज्ज्ञानादि कार्य
करः एवं कर्मापि अस्थिरत्वात् प्राकृतिकार्यत्वाच्च मायिकं आत्मा तु स्थिरत्वात् अकार्यत्वान्न मायिकं अतस्तयोरनु
ष्ठितज्ञातयोः समानकर्तृत्वमयौक्तिकमिति विलक्षणमेव कार्यं भुक्तं नन्वेवमप्यात्मोपासनाख्यज्ञानेन सऽ
हतत्वज्ञानस्य समुच्चयविकल्पौ स्यातां उपास्यमायिकत्वादीति तत्राह इतरस्यापि नात्यंतिकं इतरस्याप्युपास्य
स्य नात्यंतिकं मायिकत्वं उपास्यान्यात्मैध्यस्तपदार्थानामपि प्रवेशादित्यर्थः उपासनस्य मायिकत्वं यस्मिं
न्नंशे तदाह संकल्पितेप्येवं मनःकल्पिते ध्येयांशे एवमपि मायिकत्वमपीत्यर्थः सर्वं खल्विदं ब्रह्मेत्यादिश्रु

लुक्तिरूपास्येप्रपंचांशस्यमायिकत्वमेवेति तदुपासनस्यकिंफलमित्याकांक्षायमाह भावनोपंचयाछुधस्यसर्वप्र
कृतिवत् भावनारव्योपासनानिष्पादस्यपुरुषस्यप्रकृतेरिवसर्वमैश्वर्यंभवतीत्यर्थः प्रकृतिर्यथास्थितिसं
हारंकरोति एवंसुध्यानस्यबुधिसत्वमपिप्रकृतिप्रेरणेनसृष्ट्यादिकंभवतीति ज्ञानमेवमोक्षसाधनमिति स्थापित
मिदानीज्ञानान्याह रागोपहतिर्ध्यानं ज्ञानप्रतिबंधकोयोविषयोपरागश्चित्तस्य तदुपघातहेतुर्ध्यानमित्यर्थः उ
पचारेणकार्यकारणयोरभेदनिर्देशः रागक्षयस्यध्यानत्वासंभवात् अत्रध्यानशब्देनधारणाध्यानसमाधयो
योक्तास्त्रयएवग्राह्याः पातंजलेयोगांगानामष्टानामेवविवेकसाक्षात्कारहेतुत्वसूत्रणादिति एतेषांचावांतरा
विशेषास्तंत्रेवद्रष्टव्याः इतराणिपंचांगानिस्वयंवक्ष्यति ध्याननिष्पत्त्येवज्ञानोत्पत्तिर्नारंभमात्रेणेत्याशयेनऽ
ध्याननिष्पत्तेर्लक्षणमाह वृत्तिनिरोधात्तत्सिद्धिः ध्येयातिरिक्तवृत्तिनिरोधरूपेणासंप्रज्ञानयोगेनतत्सिद्धि
ध्यानस्य निष्पत्तिर्ज्ञानारव्यफलोपधानरूपाभवतीत्यर्थः अतस्तावत्पर्यंतंएवध्यानंकर्तव्यमित्याशयः इत
रवृत्तिनिरोधेसत्येवविषयांतरसंचारारव्यप्रतिबंधापगमाध्येयसाक्षात्कारोभवतीतिकृत्वायोगोपिज्ञानकार
णयोगांगध्यानादिवदित्यपिमंतव्यमध्यात्मयोगाधिगमेनदेवंमत्वाधीरोहर्षशोकौजहातीत्यादिश्रुतिस्म
त्वोस्तदंगेवमादितिध्यानस्यापिसाधनान्याह धारणासनस्वकर्मणातत्सिद्धः वक्ष्यमाणेनधारणादित्रयेणाध्या
नंभवतीत्यर्थः धारणादित्रयंक्रमात्सूत्रत्रयेणलक्षयति निरोधश्छर्दिविधारणाभ्यां प्राणस्येतिप्रसिध्यालभ्य
तेप्रछर्दनविधारणाभ्यांचप्राणस्येतियोगसूत्रेभाष्यकारेणप्राणायामस्यव्यारव्यातत्वात् छर्दिश्चवमनंधारणात्मा
गइतियावत् तेनपुनस्कारेणचनयोर्लाभः विधारणंचकुंभकंतथाचप्राणस्यपूरकरेचककुंभकैर्योनिरोधोव
शीकरणंसाधरणेत्यर्थः आसनकर्मणोःस्वशब्देनपश्चाल्लक्षणीयतयात्रसूत्रेपरिशेषतएवधारणायालक्ष्य
त्वलाभाद्धारणापदेनोपात्तचित्तस्यधारणातुसमाधिवत्ध्यानशब्देनैवगृहीतेत्युक्तंक्रमप्राप्तमासनंलक्षय
ति स्थिरसुखमासनं यत्स्थिरंसत्सुखसाधनंभवतिस्वस्तिकादितदासनमित्यर्थः स्वकर्मलक्षयति स्वकर्म
स्वाश्रमविहितकर्मानुष्ठानं सुगमंकर्मेतत्रशब्देनयमनियमयोर्ग्रहणं जितेंद्रियरूपःप्रत्याहारोपिसर्वाश्रम ८

95/1990

साधारणतयाकर्ममध्येप्रवेशनीयः तथाचपातंजलसूत्रेज्ञानसाधनतयाप्रोक्तान्यष्टौयोगांगानिअत्रापिलभ्यानि
तथातत्सूत्रंयमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोष्टावंगानीतितेषांचस्वरूपंतत्रेवद्रष्टव्यं
मुरव्याधिकारिणांनास्तिबहिरंगस्ययमादिपंचकस्यापेक्षाकेवलाध्यानधारणादित्रयरूपात्संयमादेवज्ञानंयो
गश्चभवतीतिपातंजलसिद्धांतः जडभरतादिषुचतथादृष्टत्वात् अतस्तदनुसारेणाचार्योप्याहवैराग्यादभ्यासा
च केवलाभ्यासाध्यानरूपादेववैराग्यसहितात् ज्ञानंतत्साधनयोगश्चभवत्युत्तमाधिकारिणामित्यर्थः तदुक्तंगा
रुडेपि आसनस्थानविधयोनयोगस्यप्रसाधकाः विलंबजननाःसर्वेविस्ताराःपरिकीर्तिताः शिशुपालःसिद्धि
मापस्मरणाभ्यासगौरवादिति अथवावैराग्यध्यानाभ्यासावत्रध्यानस्येवहेतुतयोक्तौचकारश्चधारणासमु
च्चयइति तदेवंज्ञानान्मोक्षोव्यारव्यातः अतःपरंबंधोविपर्ययादितिसूक्तोबंधकारणंविपर्ययोव्यारव्यास्यतेतत्रा
दौविपर्ययस्यस्वरूपमाह विपर्ययभेदाःपंच अविद्यास्मितारागद्वेषाभिनिवेशाः पंचयोगोक्ताबंधहेतुविप
र्ययस्यावांतरभेदाइत्यर्थः तेनशुक्त्यादिज्ञानरूपाणांविपर्ययाणामसंग्रहेपिनक्षतिः तत्राविद्यानित्याशु
चिदुःखानात्मसुनित्यशुचिसुखात्मरव्यातिरितियोगप्रोक्तं एवमास्मितापि आत्मानात्मनोरेकताप्रत्ययः
शरीराद्यतिरिक्तआत्मानास्तीत्येवंरूपःअविद्यातत्वरूपाआत्मनःशरीराशरीरोभयरूपत्वेपिशरीरेहंबुध्युत्प
त्तेःरागद्वेषौतुप्रसिद्धावेव अभिनिवेशश्चमरणादित्रासइतिरागादीनांविपर्ययकार्यतयोविपर्ययत्वं विपर्यय
स्यस्वरूपमुक्तातत्कारणस्याशक्तेरपिस्वरूपमाह अशक्तिरष्टाविंशतिधातुसुगमं एतदपिकारिकयाव्यारव्या
तं एकादशेंद्रियवधाःसहबुद्धिवधैरशक्तिरुद्दिष्टा सप्तदशधाचबुद्धेर्विपर्ययात्तुष्टिसिद्धीनामिति बाधिर्यंकुष्ट
तांधत्वंजडताशीघ्रतातथा मूकताकौण्यपंगुत्वक्लैब्योदावर्तमुग्धताइत्येकादशेंद्रियाणांएकादशाशक्तयः
स्वतश्चबुद्धेःसप्तदशाशक्तयः यथावक्ष्यमाणानांनवतुष्टीनांविघातानवतथावक्ष्यमाणानांअष्टसिद्धीनां
चविघाताअष्टाविंशतिर्मिलित्वाचेमाःस्वतःपरतश्चाष्टाविंशतिबुद्धेरशक्तयइत्यर्थः तुशब्दएषांविशेषप्रसिद्धि
रव्यापनार्थः ययोर्विघातोबुद्धेरशक्तीतितुष्टिसिद्धिसूत्रद्वयेनाह तुष्टिर्नवधा स्वयमेवनवधात्वंवक्ष्यति सि

श्चिरष्टधा एतदपिस्वयंवक्ष्यति उक्तानांविपर्ययाशक्तितुष्टिसिद्धीनांविशेषजिज्ञासायांक्रमेणसूत्रचतुष्टयंप्रवर्त्तते अवांतरभेदाःपूर्ववत् विपर्ययस्यावांतरभेदाः येसामान्यतः पंचोक्तास्तेपूर्ववत्पूर्वाचार्यैर्यथोक्तास्तथैवविशिष्याऽवधार्याः विस्तरभयान्नेहोच्यतइत्यर्थः तेचअविद्यादयोमयापिसामान्यतएवव्याख्याताः पंचेतिविशेषतस्तुद्वाषष्टिभेदाः तदुक्तंकारिकायां भेदस्तमसोऽष्टविधोमोहस्यचदशविधोमहामोहः तामिस्रोष्टादशधातउत्तरोग्रंथः एकोनविंशतिपत्रेनिरंकष्टेप्रथमपंक्तौज्ञेयः त्रयोविंशतितलेवाष्टितोहिपुरुषस्तेनैवोपाधिनापूर्वकृतकर्मभोगार्थं देहाद्देहंसंसरति मानसंमनसैवायमुपभुंक्तेशुभाशुभं वाचावाचाकृतंकर्मकायिकमित्यादिस्मृतिभिः पूर्वसर्गेपिकर्मोपकरणैरेवोत्सर्गतः सर्गाद्यैरुपभोगसिद्धेः अतएवब्रह्मसूत्रमपिरंहतिसंपरिष्वक्तइति संसृतेरवधिमप्याह आविवेकाच्चप्रवर्तनमविशेषाणां ईश्वरानीश्वरत्वादिविशेषरहितानांसर्वेषामेवपुंसांविवेकपर्यंतमेवप्रवर्तनं संसृतिरावश्यकीविवेकोत्तरंचनसाइत्यर्थः तत्रहेतुमाह उपभोगादितरस्य इतरस्याविवेकितएवस्वीयकर्मफलभोगावश्यंभावादित्यर्थः फलसत्वेनपिसंसृतिकालेभोगोनास्तीत्याह सम्प्रतिपरिमुक्तोद्वाभ्यां संप्रतिसंसृतिकालेपुरुषोद्वाभ्यांशीतोष्णसुखदुःखादिद्वंद्वैःपरिमुक्तोभवतीत्यर्थः तदेतत्कारिकयोक्तं संसरतिनिरुपभोगंभावैरधिवासितंलिंगमितिभावाःधर्माधर्मवासनादयः अतःपरंशरीरद्वयंविशिष्यवक्तुमुपक्रमते मातापितृजंस्थूलंप्रायशइतरन्नतथा स्थूलंमातापितृजंप्रायशोबाहुल्येनअयोयोनिजस्यापिस्थूलशरीरस्यश्रवणात् इतरच्चसूक्ष्मशरीरंनतथानमातापितृजंसर्गाद्युत्पन्नत्वादित्यर्थः तदुक्तंकारिकयापूर्वोत्पन्नमसक्तंनियतंमहदादिसूक्ष्मपर्यंतंसंसरतिनिरुपभोगंभावैरधिवासितंलिंगमिति नियतंनित्यंद्विपरार्धस्यापिगौणानित्यंप्रतिशरीरंलिंगोत्पत्तिकल्पनेगौरवात् प्रलयेतुतन्नाशःश्रुतिस्मृतिप्रामाण्यादिष्यतेगतिकालेभोगाभाववचनमुत्सर्गाभिप्रायेणकदाचित्तुवायवीयेशरीरेप्रवेशतोगमनकालेपिभोगोभवति अतोयमभ्रमार्गेदुःखभोगवाक्यामुपपद्यतइति स्थूलसूक्ष्मशरीरमध्येकिमुपाधिकःपुरुषस्यद्वंद्व ९
योगइत्येतदवधारयति पूर्वोत्पत्तेःतत्कार्यत्वंभोगादेकस्यनेतरस्य पूर्वसर्गादावुत्पत्तिर्यस्यलिंगशरीरस्यैव

तत्कार्यत्वंसुखदुःखकार्यत्वंकुतः एकस्यलिंगदेहस्यैवसुखदुःखाख्यभोगात्ननितरस्यस्थूलशरीरस्यमृतशरीरेसुखदुःखाद्यभावस्यसर्वसंमतत्वादित्यर्थः उक्तस्यसूक्ष्मशरीरस्यप्रत्यक्षस्वरूपमाह सप्तदशैकंलिंगं सूक्ष्मशरीरमप्याधाराधेयभावेनद्विविधंभवतितत्रसप्तदशमिलित्वालिंगशरीरंतच्चसर्गादौसमष्टिरूपमेकंभवतीत्यर्थः एकादशेंद्रियाणिपंचतन्मात्राणिबुद्धिश्चेतिसप्तदशाहंकारस्यबुद्धावंतर्भावः चतुर्थसूत्रेवक्ष्यमाणादेतान्येवसप्तदशलिंगंमंतव्यं नतुसप्तदशचएकंचेत्यष्टादशतथाव्याख्येयंउत्तरसूत्रेणव्यक्तिभेदस्योपपाद्यतयात्रलिंगेकत्वएकशब्दतात्पर्यावधारणाच्च कर्मात्मापुरुषोयोसौबंधमोक्षैःसंयुज्यते सप्तदशकेनापिराशिनायुज्यतेचसइतिमोक्षधर्मादौलिंगशरीरस्यसप्तदशत्वसिद्धेश्चसप्तदशाक्षवा अत्रसंतीतिसप्तदशकोराशिःइत्यर्थः राशिशब्देनस्थूलदेहवल्लिंगदेहस्यावयवित्वंनिराकृतंअवयविरूपेणद्रव्यांतरकल्पनायांगौरवात्स्थूलदेहस्यचावयवित्वंएकतादिप्रत्यक्षानुरोधेनकल्प्यतइति अत्रचलिंगदेहेबुद्धिरेवप्रधानेत्याशयेनलिंगदेहस्यभोगःप्रागुक्तः प्राणश्चांतःकरणस्यैववृत्तिभेदअतोलिंगदेहेप्राणपंचकस्याप्यंतर्भावइति अस्यसप्तदशावयवकस्यशरीरत्वंस्वयंवक्ष्यति लिंगशरीरनिमित्तकइतिसनंदनाचार्यइतिसूत्रेणअतोभोगायतनत्वमेवमुख्यंशरीरलक्षणंनदाश्रयतयालन्यत्रशरीरत्वमितिपश्चाद्व्यक्तीभविष्यतिचेष्टेंद्रियाश्रयःशरीरमितितुन्यायेतस्यैवलक्षणंकृतमिति ननुचेदेकंतर्हिकथंपुरुषभेदेनविलक्षणाभोगास्युःस्तत्राह व्यक्तिभेदः कर्मविशेषात् यद्यपिसर्गादौहिरण्यगर्भोपाधिरूपमेकमेवलिंगंतथापितस्यपश्चाद्व्यक्तिभेदोव्यक्तिरूपेणांशतोनानात्वमपिभवति यथेदानीमेकस्यपितृलिंगदेहस्यनानात्वमंशतोभवतिपुत्रकन्यादिलिंगदेहरूपेणतत्रकारणमाह कर्मविशेषामाह जीवांतराणांभोगहेतुकर्मादेरित्यर्थः अत्रविशेषवचनात्समष्टिव्यष्टिजीवानांसाधारणैःकर्मभिर्भवतीत्यायातंअयंचव्यक्तिभेदोमन्वादिष्वप्युक्तः यथामनोसमष्टिपुरुषस्यषडिंद्रियोत्पत्त्यनंतरं। तेषांत्ववयवान्सूक्ष्मान्षण्णामप्यमितौजसांसंनिवेश्यात्ममात्रासुसर्वभूतानिनिर्ममइति षण्णामितिसमस्तलिंगशरीरोपलक्षणंआत्ममात्रासुचिदंशे
न ष्वसंयोज्येत्यर्थः तथाचतत्रैवाक्यांतरंतच्छरीरसमुत्पन्नैःकार्यैस्तैःकरणैःसह क्षेत्रज्ञाःसमजायंतगात्रेष्वस्य

97/1990

धीमतइतिनन्वेवंमोगायनतयालिंगस्येवशरीरत्वेस्थूलेकथं सप्तदशपत्रनिरंकुशएनवमपंक्तिस्थः धातयेत्यादिः धात
याभवत्यधतामिस्रमिति अस्याअयमिथ्यर्थः अष्टसुअव्यक्तमहदहंकारपंचतन्मात्रेषुष्टप्रकृतिष्वनात्मस्वात्मबुद्धि
रविघातमोअष्टधाभवतिकार्यकारणाभेदेनकेवलविकृतिघात्मबुद्धेरप्यत्रांतर्भावः एवमविद्याशाविषयभेदेना
ष्टविधत्वात्तत्समानविषयकस्याभिनारव्यस्यमोहस्याप्यष्टविधत्वं दिव्यादिव्यभेदेनशब्दादीनांविषयाणांदशत्वा
तद्विषयकोरागाख्योमहामोहोदशविधः अविद्यास्मितयोरष्टौयेविषयायेनागस्यदशविषयातद्विघातकेषुअष्टा
दशसुअष्टादशतामिस्राख्योद्वेषः एवंतेषामष्टादशादिदर्शनादष्टादशविधो अंधतामिस्राख्योऽभिनिवेशोभव
यमिति एतेषांचतमआदिपंचकसंज्ञातस्येतुत्वादितिएवमितरस्याः एवंपूर्ववदेवइतरस्याशक्तेरप्यवांतरभेदाथा
विषाविर्विशेषतोऽवगंतव्याइत्यर्थः अशक्तिरष्टाविंशतिधेत्येतस्मिन्नेवसूत्रेष्टाविंशतिध्यात्वमयाव्याख्यातं अध्यात्मि
कादिभेदान्नवधातुष्टिः इदंसूत्रंकारिकयाव्याख्यातंअध्यात्मिकाश्चवस्तः प्रकृत्युपादानकालभाग्याख्याः वाह्याविषयो
परमात्संचनवतुष्टयोभिहिताइति अस्यायमर्थः आत्मानंतुष्टिमूतःसंघातमधिकृत्यवर्तनइत्याध्यात्मिकास्तुष्टयश्च
तस्रः तत्रप्रकृत्याख्यातुष्टिर्यथा साक्षात्कारपर्यंतः परिणामःसर्वोपिप्रकृतेरेवतंचतंचप्रकृतिरेवकरोत्यहंतुकूटस्थः
पूर्णइत्यात्मभावनात्परितोषइयंतुष्टिरंभइत्युच्यते ततश्चप्रव्रज्योपादानेनयातुष्टिःसाउपादानाख्यासलिलमित्यु
च्यते ततश्चप्रव्रज्यापादानेनयातुष्टिर्बहुकालसमाध्यनुष्ठानेनयातुष्टिः साकालाख्याओघइत्युच्यते ततश्चसंप्रज्ञात
परमकाष्ठारूपेधर्ममेघसमाधौसातियातुष्टिः साभाग्याख्यावृष्टिरित्युच्यते इतिचतस्रआध्यात्मिकाः वाह्याश्चतुष्ट
योबाह्यविषयेषुपंचसुशब्दादिषुअर्जनरक्षणक्षयभोगहिंसादिदोषनिमित्तकोपरमाज्जायंते ताश्चतुष्टयोयथा
क्रमेणपारंसुपारंपारपारंअनुत्तमांभइतिपरिभाषिताइतिकश्चिदिमांकारिकांअन्यथा व्याख्यातवान्तद्यथा
विवेकसाक्षात्कारोपिपरिणामएवेतिध्यानाभ्यासेनेत्येवंदृष्ट्याध्यानादिनिवृत्तौतुष्टिः साप्रकृत्याख्याप्रव्रज्यो
पादानेनैवमोक्षोभविष्यतिकिंध्यानादिनेतियातुष्टिःसाउपादानाख्याकृतसन्यासस्यापिकालेनैवमोक्षोभवि १०
ष्यतिअलमुद्वेगेनेतियातुष्टिःसाकालाख्याभाग्यादेवमोक्षोभविष्यतिनमोक्षशास्त्रोक्तसाधनैरेवकुतर्कया

तुष्टिः साभाग्याख्येत्यादिरर्थइतितत्रतद्व्याख्यानंतुष्टीनामभावस्यज्ञानाद्यनुकूलत्वेनाशक्तिपरिभाषानौचित्यादिति
उहादिभिःसिद्धिः उहादिभेदैःसिद्धिरष्टधाभवतीत्यर्थः इदमपिसूत्रंकारिकायाव्याख्यातंउहशब्दोध्ययनंदुःखविघा
तास्त्रयःसुहृत्प्राप्तिः दानंचसिद्धयोष्टौसिद्धेः पूर्वोंकुशस्त्रिविधइति अस्यायमर्थः अत्रअध्यात्मिकादिदुःखत्रयप्रति
घातिकत्वात्त्रयोदुःखविघातामुख्यसिद्धयइतरस्तत्साधनत्वाद्गौण्यःसिद्धयः तत्रउहोयथाउपदेशादिकंविनैवप्रा
विद्याभ्यासवशात्तत्वस्यस्वयमूहनमितिशब्दस्तुयथा न्यदीयपाठमाकर्ण्यस्वयंवाशास्त्रमाकलय्ययज्ज्ञानंजायतेतदि
ति अध्ययनंचयथाशिष्याचार्यभावेनशास्त्राध्ययनाज्ज्ञानमितिसुहृत्प्राप्तिर्यथास्वयमुपदेशार्थंगच्छतात्परमका
रुणिकाज्ज्ञानलाभइति दानंचयथाधनादिदानेनपरितोषिताज्ज्ञानलाभइति एवंपूर्वस्त्रिविधउहशब्दाध्ययनरू
पोमुख्यासिद्धेरंकुशः आकर्षकः सुहृत्प्राप्तिदानयोरूहादित्रयापेक्षयामंदसाधनत्वप्रतिपादनायेदमूक्तंकश्चि
त्तुएतासामष्टसिद्धीनांअंकुशोनिवारकः पूर्वस्त्रिविधोविपर्ययाशक्तितुष्टिरूपोभवतिबंधकत्वादितिव्याचष्टेत
न्नतुष्ट्यभावस्याशक्ततयाबाधिर्यादिवत्सिद्धिविरोधित्वलाभेनतुष्ट्यातुष्ट्योरुभयोःसिद्धिविरोधित्वासंभवात्
ननूहादिभिरेवकथंसिद्धिरुच्यतेमंत्रतपः समाध्यादिभिरप्यणिमाद्यष्टसिद्धेःसर्वशास्त्रसिद्धत्वादितितत्राह
तेनराद्धितरहानेनविना इतरहानादिपंचकभिन्नात्तपआदेस्तात्त्विकीसिद्धिः कुतइतरहानेनविनायतःसासिद्धि
रितरस्यविपर्ययस्यहानंविनैवभवति अतःसंसारापरिपंथित्वात्सासिध्याभासएवनतुतात्त्विकीसिद्धिरित्यर्थः
तथाचोक्तंयोगसूत्रेणतेसमाधावुपसर्गाव्युत्थानेसिद्धयइति तदेवंज्ञानान्मुक्तिरित्यारभ्यविस्तरतोबुद्धिगुणरूपः
प्रत्ययसर्गः स्वकार्यबंधमोक्षरूपपुरुषार्थेनसहोक्तः एतौचबुद्धितद्गुणरूपौसंगोप्रवाहरूपेणान्योन्यंहेतुर्बी
जांकुरवत्तथाचकारिकानविनाभावैर्लिंगंनविनाभावेनलिंगनिर्वृत्तिः लिंगाख्योभावाख्यश्चतस्माद्द्विविधःप्र
वर्ततेसर्गइतिभावावासनारूपीबुद्धेर्ज्ञानादिगुणा लिंगंमहत्तत्वंबुद्धिरितिसमष्टिसर्गःप्रत्ययसर्गश्चसमाप्तः
सांप्रतंव्यक्तिभेदः कर्मविशेषादितिसंक्षेपाद्व्यक्त्याव्यष्टिसृष्टिर्विस्तरतःप्रतिपाद्यते दैवादिप्रभेदात्दैवादिःप्र
भेदोवांतरभेदोयस्याःसातथासृष्टिरितिशेषः तदेतत्कारिकयाव्याख्यातं अष्टविकल्पोदैवस्तैर्यग्योनश्चपंचधा

भवति मानुष्यश्चैकविधः समासतो भौतिकसर्ग इति ब्राह्मप्राजापत्यैन्द्रगान्धर्वयक्षराक्षसपैशाचाइति अष्टविधो दैवसर्गः पशु
मृगपक्षिसरीसृपस्थावराइति तैर्यग्योनवः पंचविधः मानुष्यसर्गश्चैकप्रकार इति भौतिको भूतानां व्यष्टिप्राणिनां विराजः स
काशात्संग इत्यर्थः अवांतरसृष्टिमुक्त्वा तस्याः पुरुषार्थत्वमाह आब्रह्मस्तंबपर्यंतं तत्कृते सृष्टिराविवेकात् चतुर्मुखमारभ्य
स्थावरांतानां व्यष्टिरपि विराट्सृष्टिवदेव पुरुषार्था भवति तत्तत्पुरुषाणां विवेकख्यातिपर्यंतमित्यर्थः व्यष्टिसृष्टावपि विभा
गमाह सूत्रत्रयेण ऊर्ध्वं सत्त्वविशाला ऊर्ध्वं भूर्लोकादुपरि सृष्टिः सत्त्वाधिका भवतीत्यर्थः तमोविशाला मूलतः मूलतो भू
लोकादध इत्यर्थः मध्ये रजोविशाला मध्ये भूर्लोके इत्यर्थः नन्वेकस्या एव प्रकृतेः केन निमित्तेन सत्त्वविशालतया विचित्राः
सृष्टय इत्याकांक्षायामाह कर्मवैचित्र्यात्प्रधानचेष्टा गर्भदासवत् विचित्रकर्मनिमित्तादेव यथोक्ता प्रधानस्य चेष्टाका
र्यवैचित्र्यरूपा भवति वैचित्र्ये दृष्टांतो गर्भदासवदिति यथा गर्भावस्थामारभ्य यो दासस्तस्य भृत्यवासनापाटवेन ना
नाप्रकारा चेष्टा परिचर्या स्वाम्यर्थे भवति तद्वदित्यर्थः ननु चेदूर्ध्वं सत्त्वविशाला सृष्टिरस्ति तर्हि तत एव कृतार्थत्वात्पुरुषस्य
किं मोक्षेणेति तत्राह आवृत्तिस्तत्राप्युत्तरोत्तरयोनियोगाद्धेयः तत्रापि ऊर्ध्वतायामपि सत्त्वामावृत्तिरस्ति अत उत्त
रोत्तरयोनियोगात् अधोऽधस्तात्सोऽपि लोको हेय इत्यर्थः किंच समानं जरामरणादिजं दुःखं ऊर्ध्वाधोगतानां ब्रह्मादि
स्थावरांतानां सर्वेषामेव जरामरणादिजं दुःखं साधारणमतोऽपि हेय इत्यर्थः किं बहुना कारणलयादपि न कृतकृत्यते
त्याह न कारणलयात्कृतकृत्यता मग्नवदुत्थानात् विवेकज्ञानाभावे यदा महदादिषु वैराग्यं प्रकृत्युपासनया भवति त
दा प्रकृतौ लयो भवति वैराग्यात्प्रकृतिलय इति वचनात् तस्मात्कारणादपि न कृतकृत्यतास्ति मग्नवदुत्थानात् यथा
जले शय्यायां वा मग्नः पुनरुत्तिष्ठति एवमेव प्रकृतिलीनाः पुरुषा ईश्वरभावेन पुनराविर्भवंति संस्कारादृक्षयेण पुनः
रागाभिव्यक्तेर्विवेकख्यातिं विना दोषदाहानुपपत्तेरित्यर्थः ननु कारणं केनापि न कार्यते अतः स्वतंत्रा कथं स्वोपासकस्य
दुःखनिदानमुत्थानं पुनः करोति तत्राह अकार्यत्वेऽपि तद्योगः पारवश्यात् प्रकृतेरकार्यत्वेऽप्रेर्यत्वेऽपि अन्येच्छानधी
नत्वेऽपि तद्योगः पुनरुत्थानोचितत्वं तल्लीनस्य कुतः पारवश्यात् पुरुषार्थतंत्रत्वात् विवेकख्यातिरूपपुरुषार्थवशेन प्रकृत्या
पुनरुत्थाप्यते स्वलीन इत्यर्थः पुरुषार्थादयश्च प्रकृतेर्न प्रेरकाः किंतु प्रवृत्तिस्वभावायाः प्रवृत्तिप्रतिबंधकनिवृत्तौ नि ११

101/1990

मित्तानीति न स्वातंत्र्यक्षतिः तथा च सूत्रं योगे निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवदिति वरणभे
दः प्रतिबंधनिवृत्तिः प्रकृतिलयात्पुरुषस्योत्थाने प्रमाणमप्याह सहि सर्ववित्सर्वकर्ता सहि पूर्वसर्गे कारणलीनः
सर्गांतरे सर्ववित्सर्वकर्तेश्वरः आदिपुरुषो भवति प्रकृतिजयेन तस्यैव प्रकृतिपदप्राप्तेरौचित्यात् तदेव सक्तः सह
कर्मणेति लिंगं मनो यत्र निषिक्तमस्येत्यादिश्रुतेरित्यर्थः नन्वेवमीश्वरप्रतिषेधानुपपत्तिस्तत्राह ईदृशेश्वरसिद्धिः सि
द्धा प्रकृतिलीनस्य जन्येश्वरस्य सिद्धिः यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तप इत्यादिश्रुतिभ्यः सर्वसंमतैव नित्येश्वर
स्यैव विवादास्पदत्वादित्यर्थः अथवा सहीत्यादिसूत्रद्वयमेवं व्याख्येयं पारावश्यं प्रतिपादयति सूत्रेण सहि परः पु
रुषस्य सामान्यं सर्वज्ञानशक्तिमत्सर्वकर्तृता शक्तिमच्च अयस्कांतवत्संनिधिमात्रेण प्रेरकत्वादित्यर्थः तथा च स
माप्तार्थपुरुषसांनिध्यात्तदर्थमन्येच्छानधीनाया अपि प्रकृतेः प्रवृत्तिरावश्यकीति न चैवमीश्वरप्रतिषेधविरोध
स्तत्राह ईदृशेश्वरसिद्धिः सिद्धा सांनिध्यमात्रेणेश्वरस्य सिद्धिस्तत्र श्रुतिस्मृतिषु सर्वसंमतेत्यर्थः अंगुष्ठमात्रः पुरु
षो मध्य आत्मनि तिष्ठति ईशानो भूतभव्यस्य न ततो विजुगुप्सते सृजते च गुणान् स लक्षेत्रज्ञस्तत्रानुपश्यति गु
णान्विक्रियः सर्वानुदासीनवदीश्वर इत्यादिश्रुतिस्मृतयश्चैनादृशेश्वरे प्रमाणमिति द्वितीयाध्यायादिमार
भ्य एतावत्पर्यंतं सूत्रव्यूहैः प्रधानसृष्टिः समापिता इतः परं मोक्षोपपत्त्यर्थं प्रधानसृष्टेर्ज्ञानि पुरुषं प्रत्यत्यंतनिवृत्तिरत्यं
तत्वाख्यावक्तव्या तदुपपत्त्यर्थं मा भूदस्य भोगापवर्गयोः प्रधानसृष्टेः प्रयोजनं द्वितीयाध्यायस्यादिसूत्रेणोक्तं विस्तारतः प्रति
पादयति प्रधानसृष्टिः परार्थं स्वतोऽप्यभोक्तृत्वादुष्ट्रकुंकुमवहनवत् प्रधानस्य स्वत एव सृष्टिर्यद्यपि परार्थमन्यस्य
भोगापवर्गार्थं यथा उष्ट्रस्य कुंकुमवहनं स्वाम्यर्थं कुतः अभोक्तृत्वात् अचेतनत्वेन भोगापवर्गासंभवादित्यर्थः ननु
विमुक्तमोक्षार्थं स्वार्थं चेत्यनेन स्वार्थापि सृष्टिरुक्तेति चेत्सत्यं तथापि पुरुषार्थतां विना स्वार्थतापि न सिध्यति स्वार्थो
हि प्रधानस्य कृतभोगापवर्गात्पुरुषाद्धात्मविमोक्षणमिति ननु तुल्यमस्तु चेत्प्रकृतिस्तर्हि कथं स्वामिनो दुःखा
र्थमपि प्रवर्तत इति चेत्स्वार्थप्रवृत्त्यैव नांतरीयकदुःखसंभवात् उष्ट्रस्य तुल्यत्वादिति ननु प्रधानस्याचेतनस्य
स्वतः स्रष्टृत्वमेव नोपपद्यते रथादेः परप्रयत्नेनैव प्रवृत्तिदर्शनादिति तत्राह अचेतनत्वेऽपि क्षीरवच्चेष्टितं प्रधानस्य

सां० भा०
१२

यथाक्षीरं पुरुषप्रयत्ननैरपेक्ष्येण स्वयमेव दधिरूपेण परिणमते एवमचेतनत्वेपि परप्रयत्नं विनापि महदादिरूपेण
परिणामः प्रधानस्य भवतीत्यर्थः धेनुवद्वत्सायेत्यनेन सूत्रेणास्यन पौनरुक्त्यं तत्र करणप्रवृत्तेरेवाविचारितत्वात्
धेनूनां चेतनत्वाच्चेति दृष्टांतांतरप्रदर्शनपूर्वकमुक्तार्थे हेतुमाह कर्मवद्दृष्टेर्वाकालादेः कालादेर्यथा कर्मव्यापारः
स्वत एव भवतीति दृष्टमेवं प्रधानस्यापि चेष्टास्यात् दृष्टत्वात्कल्पनायाः दृष्टानुसारित्वादिति ननु तथापि ममेदं
भोगादि साधनमिति प्रतिसंधानाभावान्मूढायाः प्रकृतेः कदाचिन्नप्रवृत्तिरपि न स्यात् विपरीता च प्रवृत्तिः स्या
त्तत्राह स्वभावाच्चेष्टितमनतिसंधानाद्भृत्यवत् यथा प्रकृष्टभृत्यस्य स्वभावात्संस्कारादेव प्रातिनियतावश्यकी च स्वा
मिसेवा प्रवर्त्तते न तु भोगाभिप्रायेण तथैव प्रकृतेश्चेष्टितं संस्कारादेवेत्यर्थः कर्माकृष्टेर्वाप्यनादितः वाशब्दोत्र समुच्च
येयतः कर्मानादि अतः कर्मभिराकर्षणादपि प्रधानस्यावश्यकी व्यवस्थिता च प्रवृत्तिरित्यर्थः तदेव प्रधानस्य परार्थ
स्वतः सृष्टित्वसिद्धे प्रयोजनसमाप्तौ स्वत एव प्रधाननिवृत्त्या मोक्षः सिध्यतीत्याह प्रधानसृष्टेः विविक्तबोधात्सृष्टिनिवृ
त्तिः प्रधानस्य सूदवत्पाके विविक्तपुरुषज्ञानात्परवैराग्येण पुरुषार्थसमाप्तौ प्रधानस्य सृष्टिर्निवर्त्तते यथा पाके
निष्पन्ने पाचकस्य व्यापारो निवर्त्तत इत्यर्थः इयमेवात्यंतिकप्रलय उच्यते तथा च श्रुतिस्तस्याभिध्यानात् योजना
त्तत्त्वभावाद्भूयश्चांते विश्वमायानिवृत्तिरिति नन्वेवमेकपुरुषस्योपाधौ विवेकज्ञानोत्पत्त्या प्रकृतेः सृष्टिनिवृत्तौ
सर्वमुक्तिप्रसंग इति तत्राह इतर इतरवत्तद्दोषात् इतरस्त्वविविक्तबोधरहित इतरवद्बद्धवत् प्रकृत्या विश्यति
कुतः तद्दोषात्तस्य दोषात्तस्यैव पुरुषार्थासमापनाख्यदोषादित्यर्थः तदुक्तं योगसूत्रे कृतार्थं प्रति नष्टमप्यनष्टं तद
न्यपुरुषसाधारणत्वादिति तथा च पूर्वसूत्रे या प्रधाननिवृत्तिरुक्ता सा विविक्तबोधपुरुषं प्रत्येवेति भावः विश्व
मायाश्रुतिरपि ज्ञानिनं प्रत्येव मंतव्या अजामिति श्रुत्यैकवाक्यत्वादिति सृष्टिनिवृत्तेः फलमाह द्वयोरेकतरस्य वा
औदासीन्यमपवर्गः द्वयोः प्रधानपुरुषयोरेव औदासीन्यमेकाकिता परस्परवियोग इति यावत्सोपवर्गः कैवल्यं
अथवा पुरुषस्यैव कैवल्यं अहं मुक्तः स्यामित्येव पुरुषार्थत्वादर्शनादित्यर्थः एकपुरुषं निवृत्तापि प्रकृतिः पुरुषां
तरं प्रति प्रवर्तत इत्यत्र दृष्टांतं दर्शयति अन्यसृष्टुपरागेपि न विरमते प्रबुद्धरज्जुतत्त्वस्यैवोरगः यथा ज्ञानिनं प्रति १२

103/1990

निवृत्तोप्यहिरप्रबुद्धरज्जुतत्त्वस्य भयादिसृष्ट्युपरागान्न विरतो भवति तथैव ज्ञानिपुरुषं प्रति निवृत्तापि प्रकृतिरन्यस्याज्ञस्य
दुःखादिसृष्ट्युपरागान्न विरता भवतीत्यर्थः विरज्यत इति पाठेपि विरागः पराङ्मुखता उरगतुल्यत्वं च प्रधानस्य रज्जुतु
ल्ये पुरुषे समारोपणादिति एवंविधं रज्जुसर्पादिदृष्टांतानामाशयं अज्ञात्वैवाबुधाः प्रकृतेरत्यंततुच्छत्वं मनोमात्रत्वं वा
कल्पयंति त एतेन प्रकृतिसत्यत्ववादिसांख्योक्तदृष्टांतेन श्रुतिस्मृत्यर्थं बोधनीयाः न केवलं दृष्टांतबलेनायमर्थः
सिध्यति किंतु कर्मनिमित्तयोगाच्च सृष्टौ निमित्तं यत्कर्म तस्य संबंधादपि अन्यपुरुषार्थं सृजतीत्यर्थः ननु सर्वे
षां पुरुषाणां अन्यार्थकतया निरपेक्ष्याविशेषेपि कंचित्प्रत्येव प्रधानं प्रवर्तते कंचित्प्रति च निवर्तत इत्यत्र किं निया
मकं न च कर्मनियामकं स्यात् पुरुषस्य किं कर्मेत्यत्रापि नियामकाभावादिति तत्राह नैरपेक्ष्येपि प्रकृत्युपकारे विवेको निमि
त्तं पुरुषाणां नैरपेक्ष्येपि अयं मे स्वामी अयमेवाहमित्यविवेकादेव प्रकृतिः सृष्ट्यादिभिः पुरुषानुपकरोतीत्यर्थः त
था च यस्मै पुरुषाय आत्मानमविविच्य दर्शयितुं वासना वर्तते तं प्रत्येव प्रवर्तत इत्येव नियामकमिति भावः प्रवृत्तिस्वभा
वत्वात्कथं विवेकेपि निवृत्तिरुपपद्यतां तत्राह नर्तकीवत्प्रवृत्तस्यापि निवृत्तिश्चारितार्थ्यात् पुरुषार्थमेव प्रधानस्य प्र
वृत्तिः स्वभावो न तु सामान्येन अतः प्रवृत्तस्यापि प्रधानस्य पुरुषार्थसमाप्तिरूपे चरितार्थत्वे सति निवृत्तिर्युक्ता यथा परि
षद्भ्यो नृत्यदर्शनार्थं प्रवृत्ताया नर्तक्यास्तत्सिद्धौ निवृत्तिरित्यर्थः निवृत्तौ हेत्वंतरमाह दोषबोधेपि नोपसर्पणं प्रधा
नस्य कुलवधूवत् पुरुषेण प्रकृतेः परिणामित्वदुःखात्मकत्वादिदोषदर्शनादपि लज्जितायाः प्रकृतेः पुनर्न पुरुषं प्र
त्युपसर्पणं कुलवधूवत् यथा स्वामिना मे दोषा दृष्टा इत्यवधारणेन लज्जिता कुलवधूर्न स्वामिनमुपसर्पति तद्वदित्यर्थः
तदुक्तं नारदीये सविकारापि मौढ्येन चिरं भुक्ता गुणात्मना प्रकृतिर्ज्ञातदोषेयं लज्जयेव निवर्तत इति एतदेवोक्तं
कारिकयापि प्रकृतेः सुकुमारतरं न किंचिदस्तीति मे मतिर्भवतीति या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्येति
ननु पुरुषार्थं चेत् प्रधानप्रवृत्तिः तर्हि बंधमोक्षाभ्यां पुरुषस्य परिणामापत्तिरिति तत्राह नैकांततो बंधमोक्षौ पु
रुषस्याविवेकादृते दुःखयोगवियोगरूपौ बंधमोक्षौ पुरुषस्य नैकांततस्तत्त्वतः किंतु चतुर्थसूत्रे वक्ष्यमाणप्रकारे
णापि चेत्यर्थः परमार्थतस्तु यथोक्तौ बंधमोक्षौ प्रकृतेरेवेत्यर्थः प्रकृतेरांजस्यात्ससंगत्वात्पशुवत् प्रकृतेरेवआं

सां०भा०

१२ आस्येनतत्त्वतोदुःखेनबंधमोक्षौ सुसंगत्वाद्दुःखसाधनैर्धर्मादिभिःलयत्वाद्दुष्टवत्यथापशुरज्ज्वालिप्तवयाबंधमोक्षभा
गीतद्दित्यर्थः एतदप्युक्तंकारिकयातस्मान्नबध्यतेनापिमुच्यतेनापिसंसरतिपुरुषः संसरतिबध्यतेमुच्यतेचनानाश्र
याप्रकृतिरिति द्वयोरेकतरस्यवाऔदासीन्यपवर्गइतियःपुरुषस्याप्यपवर्गउक्तः सप्रतिबिंबरूपस्यमिथ्यादुःखस्य
वियोगइति बुद्धेर्यभावाष्टकरूपागुणास्तत्रकेबंधःकेमुक्तइत्याकांक्षायामाह रूपैःसप्तभिरात्मानंबध्नातिप्रधानं
कोशकारवद्विमोचयत्येकरूपेण धर्मवैराग्यैश्वर्याधर्माज्ञानावैराग्यानैश्वर्यैःसप्तभिरूपैःस्वधर्मैर्दुःखहेतुभिःप्रकृ
तिरात्मानंदुःखेनबध्नातिकोशकारवत्कोशकारःकृमिर्यथास्वनिर्मितावासेनात्मानंबध्नातितद्वत्सैवच
प्रकृतिरेकरूपेणज्ञानेनचात्मानंदुःखान्मोचयतीत्यर्थः ननुनैकांततोबंधमोक्षौपुरुषस्याविवेकादतइतियउक्तं
तत्रसुउक्तंअविवेकादेरहेयानुपादेयत्वात्लोकेदुःखस्यतदभावसुखयोरेवंचस्वतोहेयोपादेयत्वात् अन्यथादृ
ष्टहानिरित्याशंक्यचतुर्थसूत्रोक्तंस्वयंविवृणोति। निमित्तत्वमविवेकस्यनदृष्टहानिः अविवेकस्यपुरुषबंधमोक्ष
निमित्तत्वमेवपुरोक्तंनत्वविवेक एवतावतिनातोदृष्टहानिरित्यर्थः एवंप्रथमाध्यायसूत्रेषुस्पष्टंमयोदितं अवि
वेकनिमित्तात्प्रकृतिपुरुषयोःसंयोगस्तस्माच्चसंयोगादुत्पद्यमानस्यप्राकृतदुःखस्यपुरुषेयःप्रतिबिंबःस
एवदुःखबंधस्तन्निवृत्तिरेवचमोक्षःपुरुषार्थइति तदेवंआदिसर्गमारभ्याप्रलयपर्यंतोऽखिलपरिणामः
प्रधानतद्विकारणामेवपुरुषस्तुकूटस्थपूर्णचिन्मात्रस्तुबुधिवृत्तिसाक्षीसदैकरूपएवेत्यध्यायद्वयेनविस्तरतोविवे
चितंतस्यविवेकस्यनिष्पत्त्युपायेषुसारभूतमभ्यासमाह तत्त्वाभ्यासान्नेतिनेतीतित्यागाद्विवेकसिद्धिः प्रकृतिपर्यं
तेषुजडेषुनेतिनेतीत्यभिमानत्यागरूपात्तत्त्वाभ्यासाद्विवेकनिष्पत्तिर्भवति इतरत्सर्वमभ्यासस्यांगमात्रमित्यर्थः
तथाचश्रुतिः अथातआदेशोनेतिनह्येतस्मादितिनेत्यन्यत्परमस्तिसएषआत्मेतिअन्यादिति अव्यक्ताद्येविशेषांते
वैविकारेऽस्मिन्वर्णितोः चेतनाचेतनत्वज्ञानेनज्ञानमुच्यतइतितथाऽस्थिरक्तमस्नायुयुतंमांसशोणितलेपनं चर्माव
रुद्धंदुर्गंधिपूर्णंमूत्रपुरीषयोः जराशोकसमाविष्टंरोगायतनमातुरं रजस्वलमसत्क्लिष्टंभूतावासमिमंत्यजेत्
नदीकूलंयथावृक्षोवृक्षंवाशकुनिर्यथा तथात्यजेदिमंदेहंकृच्छ्राद्ग्राहाद्विमुच्यतइतिएतदेवकारिकयाप्युक्तं एवं १२

105/1990

तत्त्वाभ्यासान्नास्मिन्मेनाहमित्यपरिशेषं अविपर्ययाद्विशुद्धंकेवलमुत्पद्यतेज्ञानमिति नास्मीत्यात्मनःकर्तृत्वनिषेध
नमेइतिसंगनिषेधः नाहमितितादात्म्यनिषेधः केवलमित्यस्यविवरणं अविपर्ययाद्विशुद्धमिति अंतरांतराविपर्यये
णाविच्छिन्नमित्यर्थः इदमेवकेवलत्वमिश्रिशब्देनसूत्रेप्रोक्तंविवेकख्यातिरविप्लवाहानोपायइतियोगसूत्रेणतादृशज्ञा
नस्यैवमोक्षहेतुत्वसिद्धेरिति अधिकारिभेदान्ननियमः मंदाद्यधिकारिभेदसत्त्वात् अभ्यासःक्रियमाणोऽपितस्मिन्नेवज
न्मनिनिष्पन्नोभवतीतिनियमोनास्तीत्यर्थः अतोयमनियमादिभिरुत्तमाधिकारमभ्यासपारवायात्मनःसंपादयेदि
तिभावः ननुयाविवेकनिष्पत्तिरनंतरक्षणएवमोक्षोऽथयाकदाचित्कियान्विलंबोऽप्यस्तीतितत्राह बाधितानुवृत्त्या
मध्यविवेकतोऽप्युपभोगः असंप्रज्ञातयोगाख्यसाक्षात्कारोत्तरंमध्यविवेकेमध्यविवेकावस्थेऽपिसतिपुरुषेबाधितानां
मपिदुःखादीनांप्रारब्धवशात्प्रतिबिंबरूपेणपुरुषेऽनुवृत्त्याभोगोभवत्येवेत्यर्थः उत्तमविवेकश्चापुनरुत्थानासंप्रज्ञातस्य
जननादेवभवतीत्यतस्तस्मिन्सतिनुभोगोऽस्तीतिप्रतिपादयितुंमध्यमविवेकतइत्युक्तं मंदविवेकस्तुसाक्षात्कारात्पूर्वं
श्रवणमननध्यानमात्ररूपइतिविभागः जीवन्मुक्तश्च जीवन्मुक्तोऽपिमध्यविवेककालएवभवतीत्यर्थः जीवन्मुक्तेःप्र
माणमाह उपदेश्योपदेष्टृत्वात्तत्सिद्धिः शास्त्रेषुविवेकविषयेगुरुशिष्यभावश्रवणाज्जीवन्मुक्तिसिद्धिरित्यर्थः जीवन्
मुक्तस्यैवोपदेष्टृत्वसंभवादिति श्रुतिश्च श्रुतिरपिजीवन्मुक्तेऽस्तिदीक्षइयदेशोनयेचतरोमुच्योतिष्टेन्मुक्तोऽपिविग्रहे
कुलालचक्रमध्यस्थोविच्छिन्नोऽपिभ्रमेद्घटः ब्रह्मैवसन्ब्रह्माप्येतीत्यादिरितीर्थं नारदीयस्मृतिश्च पूर्वाभ्यासबलात् कार्यं
नलोकोनचवैदिकः अपुण्यपापःसर्वात्माजीवन्मुक्तःसउच्यतइति ननुश्रवणमात्रेऽप्युपदेष्टृत्वेऽधपरंपरापत्तिरित्यर्थः सा
मर्थ्येणात्मतत्त्वमज्ञात्वाचेदुपदिशेत् कश्चिद्दंशोऽस्वभ्रमेणाशिष्यमपिभ्रांतंकुर्यात्सोऽप्यन्यमित्येवमंधपरंपरेतिननुज्ञा
नेनकर्मक्षयेसतिकथंजीवनंस्यात्तत्राह चक्रभ्रमणवद्धृतशरीरः कुलालकर्मनिवृत्तावपिपूर्वकर्मवेगाद्यथास्वयमेव
चक्रंभ्रमतिएवंज्ञानोत्तरंकर्मानुत्पत्तावपिप्रारब्धकर्मवेगेष्टमोनेचेनंशरीरंधृत्वाजीवन्मुक्तःतिष्ठतीत्यर्थः ननुज्ञा
नहेतुसंप्रज्ञातयोगेनभोगादिवासनाभिभवेकथंशरीरधारणंस्यादन्यथायोगस्यसंस्काराभिभावकत्वेकिंप्रमाणमिति
वाच्यं व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौनिरोधपरिणामइतियोगसूत्रतस्तत्सिद्धेः चिरकालीनस्यविषयात

सां॰प्रा॰
१४

रावेशस्यविषयांतरसंस्काराभिभावकत्वेकिंप्रमाणतायालोकेप्यनुभवाच्चेतितत्राह संस्कारलेशतस्तत्सिद्धिः शरीरधा
रणहेतवोयेविषयसंस्कारास्तेषामल्पावशेषात्तस्यशरीरधारणस्यविषयसिद्धिरित्यर्थः अत्रचाविद्यासंस्कारस्यसत्वाः
नापेक्षतेअविद्यायाजन्मादिरूपकर्मविपाकारंभमात्रहेतुत्वात् योगभाष्येव्यासैस्तथाव्याख्यातत्वात् वीतरागजन्मा
दर्शनादितिन्यायाच्चनतुप्रारब्धफलककर्मभोगेपीतियत्रचनियमेनाविद्यापेक्ष्यतेसप्रयासविशेषरूपोभोगोमूढे
ष्वास्तिजीवन्मुक्तानांतुभोगाभावएवेतिप्रागुक्तं मनुकश्चिद्देहीतिबुधोविद्यासंस्कारलेशसत्ताकल्पनेप्रयोजनाभा
वाच्चएतच्चब्रह्ममीमांसाभाष्येप्रपंचितमिति शास्त्रार्थमुपसंहरतिविवेकान्निःशेषदुःखनिवृत्तौकृतकृत्योनेतरान्ने
तरात् उक्तायाःविवेकसिद्धितःपरवैराग्येसतिदेहयात्रानंतरंयदानिःशेषंबाधिताबाधितसाधारण्येनस्थूलसूक्ष्माखि
लदुःखंनिवर्ततेतदेवपुरुषःकृतकृत्योभवतितेनराज्जीवन्मुक्तादेरपीत्यर्थः तेनरादितिवीप्साध्यायसमाप्तौअत्यंतलयप
र्यंतंकार्याण्यन्यस्यनात्मनः प्रोक्तएवंविवेकोत्रपरवैराग्यसाधनं इतिश्रीविज्ञानाचार्यविरचितेकापिलसांख्यप्रवचन
स्यभाष्येवैराग्याध्यायस्तृतीयः हरिः शास्त्रसिद्धाख्यायिकाजातमुख्येनेदानींविवेकज्ञानसाधनानिप्रदर्शनीयानीत्ये
तदर्थंचतुर्थाध्यायआरभ्यते राजपुत्रवत्तत्वोपदेशात् पूर्वाध्यायशेषसूत्रस्थविवेकोनुवर्तते राजपुत्रस्येवतत्वोपदेशात्
विवेकोजायतइत्यर्थः अत्रेयमाख्यायिकाकश्चिद्राजपुत्रोगंडर्क्षजन्मापुरान्निःसारितःशबरेणकेनचित्पोषितोहंशबर
इत्यभिमन्यमानः तद्बीजंतंज्ञात्वाकश्चिदमात्यःप्रबोधयतिनशबरोपितुराजपुत्रस्तथाराजासीतिसच्चइत्यटित्येवचांडा
लाभिमानंत्यक्त्वातात्विकंराजभावमेवावलंबतेराजाहमस्मीति एवमेवादिपुरुषात्परिपूर्णचिन्मात्रत्वेनाभिव्यक्तादुत्प
नस्त्वंतस्यांशइतिलमपितथेत्येवंविधुरसीत्यातिश्रुत्युपदेशात् जीवःप्रकृत्यभिमानंत्यक्त्वानित्यशुद्धादिरूपब्रह्मभाव
मेवावलंबतेब्रह्माहमस्मीति तथाचोक्तंगारुडे यथैकहेमभाणिनासर्वंहेममयंभवेत् तथैवज्ञानमीशेनज्ञातेनाप्यखिलं
जगत् ग्रहाविष्टोद्विजः कश्चिच्छूद्रोहमितिमन्यतेग्रहनाशात्पुनः स्वीयंब्राह्मण्यंमन्यतेतथामायाविष्टस्तथाजीवोदेहो
हमितिमन्यते मायानाशात्पुनःस्वीयंरूपंब्रह्मास्मिमन्यतइति स्त्रीशूद्रादयोपिब्राह्मणस्योपदेशेनकृतार्थास्युरित्येत
दर्थमाख्यायिकांतरंदर्शयति पिशाचवदन्यार्थोपदेशेपि अर्जुनार्थंश्रीकृष्णेनतत्वोपदेशेक्रियमाणेपिसमीपस्थस्य

तो

१४

पिशाचस्यविवेकज्ञानंजातमेवमन्येषामपिभवेदित्यर्थः यदिचसकृदुपदेशाज्ज्ञानंजायतेतदाउपदेशावृत्तिरपिक
र्तव्येतीतिहासांतरमाह आवृत्तिरसकृदुपदेशात् उपदेशावृत्तिरपिकर्तव्याछांदोग्येश्वेतकेत्वादिकंप्रत्यारुणिप्रभृती
नांअसकृदुपदेशइतिहासादित्यर्थः वैराग्यार्थंनिदर्शनपूर्वकमात्मसंघातस्यभंगुरत्वादिकंप्रतिपादयति पितापुत्रव
दुभयोर्दृष्टत्वात् तस्यपितापुत्रयोरिवात्मनोपिमरणोत्पत्योर्दृष्टत्वादनुमितत्वाद्वैराग्येणविवेकोभवतीत्यर्थः तदुक्तं
आत्मनः पितृपुत्राभ्यामनुमेयौभवाप्ययाविति इतः परमुत्पन्नज्ञानस्यविरक्तस्यज्ञाननिष्ठत्वंमान्याख्यायिकाक
दृष्टांतादर्शयति श्येनवत्सुखदुःखीत्यागवियोगाभ्यांपरिग्रहोनकर्तव्यः यतोद्रव्याणांत्यागेनलोकःसुखीवि
योगेनदुःखीभवतिश्येनवदित्यर्थः श्येनोहिसामिषःकेनाप्युपहत्यामिषाद्वियोज्यतेदुःखीक्रियतेस्वयं
चेत्यजतितदादुःखाद्विमुच्यते तदुक्तंसामिषंकुररंजघ्नुर्बलिनोयेनिरामिषाः तदामिषंपरित्यज्यससुखंस
मविंदतेतितथामुनिनाप्युक्तंनदीकूलंयथावृक्षोवृक्षंवाशकुनिर्यथा तथात्यजन्निमंदेहंकृच्छ्राद्ग्राहाद्विमुच्य
तइति आहिनिर्ल्वयिनीवत् यथाहिजीर्णांत्वचंपरित्यजत्यनायासेनहेयबुध्यातथैवमुमुक्षुः प्रकृतिंबहु
कालोपभुक्तांजीर्णांहेयबुध्यात्यजेदित्यर्थः तदुक्तंजीर्णांत्वचमिवोरगइति त्यक्तंचप्रकृत्यादिकंपुनर्नस्वीकु
र्यादित्यत्राह छिन्नहस्तवद्वा यथाछिन्नंहस्तंपुनःकोपिनादत्तेतथैवत्यक्तंपुनर्नाभिमन्यतेत्यर्थः वाशब्दोस
र्थे असाधनानुचिंतनंबंधायभरतवत् विवेकस्यदंतरंगसाधनंनभवतिस्तच्चेधर्मोपिस्यात्तथापितदनुचिं
तनंतदनुष्ठानेचित्तस्यनात्पर्यंनकर्तव्यंयतस्तद्बंधायभवतिविवेकविस्मारकतयाभरतवत् यथाभरतस्यरा
जर्षेर्धर्म्यमपिदीनानाथहरिणशावकस्यपोषणमित्यर्थः तथाचजडभरतंप्रकृत्यविष्णुपुराणेचपलंचपलेत
स्मिन्हरिणेदूरगामिनि असीच्चेतःसमासक्तंतस्मिन्हरिणपोतकइतिबहुभिर्योगेविरोधोरागादिभिःकु
मारीशंखवत् बहुभिःसंगोनकार्यः बहुभिःसंगेहिरागाद्यभिव्यक्त्याकलहोभवतियोगभ्रंशकः यथाकुमारीहस्तशंखानाम
न्योन्यसंगेनझणत्कारोभवतीत्यर्थः तदुक्तंवासेबहूनांकलहोभवेद्वार्तोद्वयोरपि एकएवचरेत्तस्मात्कुमार्याइवकंकणइति
आशाकेवेश्याविरसेचित्तेसंतोषवर्जिते म्लानेवक्त्रेभिवादर्शेनज्ञानंप्रतिबिंबतीतिवचनान्निराशतायोगिनानुष्ठेयेत्याह

107/1990

निराशः सुखीपिंगलावत् आशांत्यक्त्वापुरुषः संतोषाख्यसुखवानभूत् पिंगलावत् पिंगलानामवेश्याकांतार्थिनीकांतम
लब्ध्वानिराशीसतीविहायाशांसुखिनीबभूवतद्वदित्यर्थः तदुक्तं आशाहिपरमंदुःखंनैराश्यंपरमंसुखं यथासंछिद्यकां
ताशांसुखंसुष्वापपिंगलेतिनन्वाशानिरत्याद्दुःखनिवृत्तिःस्यात् सुखंतुकुतः साधनाभावादितिउच्यतेचित्तस्यसत्व
प्रधानान्यनस्वाभाविकंयत्सुखमाशयापिहितंतिष्ठतितदेवाशाविमलेलब्धवृत्तिकंभवतितेजः प्रतिबद्धजलशैत्यव
दितिनवत्रसाधनापेक्षाएतदेवचात्मसुखमित्युच्यतइतियोगप्रतिबंधकत्वादारंभोपिभोगार्थंनकर्तव्यंअन्यथैवतदुप
पत्तेरित्याह अनारंभेपिपरगृहेसुखीसर्पवत् सुखीभवेदितिशेषः शेषंसुगमं तदुक्तंगृहारंभोहिदुःखायनसुखायक
थंचन सर्पःपरकृतंवेश्मप्रविश्यसुखमेधतइति शास्त्रेभ्योगुरुभ्यश्चसारएवग्राह्योऽन्यथाभ्युपगमवादिभिरुक्तेऽसा
रभागेऽन्योन्यविरोधेनार्थबाहुल्येनचैकाग्रतायाअसंभवादित्याह बहुशास्त्रगुरूपासनेपिसारादानंषट्पदवदिति मार्कं
डेयपुराणेच सारभूतमुपासीनज्ञानंयत्स्वार्थसाधकं ज्ञानानांबहुतायेषायोगविघ्नकरीहिसा इदंज्ञातमिदंज्ञेयमितिय
स्तृषितश्चरेत् आसंकल्पसहस्रेषुनैवज्ञेयमवाप्नुयादिति साधनांतरंयथातथाभवतुएकाग्रतयैवसमाधिपालनद्वारा
विवेकसाक्षात्कारोतिनिष्पादनीयइत्याह इषुकारवन्नैकचित्तस्यसमाधिहानिः यथाशरनिर्माणायैकचित्तस्येषुकारस्यपा
र्श्वेराज्ञोगमनेनापिनिवृत्त्यंतरनिरोधोहीयतएवमेकाग्रचित्तस्यसर्वथापिनसमाधिहानिर्वृत्त्यंतरनिरोधक्षतिर्भवति
ततश्चविषयांतरसंचारबाधेध्येयसाक्षात्कारोप्यवश्यंभवतीत्यैकाग्रतांकुर्यादित्यर्थः तदुक्तं तदेवमात्मन्यवरुद्धचित्तो
नवेदकिंचिद्बहिरंतरंवा यथेषुकारोन्रपतिंव्रजंतमिषौगतात्मानददर्शपार्श्वइति सत्यांशक्तौज्ञानबलावतःशास्त्रकृत
नियमोवृथालंघ्यतेतदाज्ञानानिष्पत्त्यानर्थक्यंज्ञानसाधनानांभवतीत्याह कृतनियमलंघनादानर्थक्यंलोकवत् यः
शास्त्रैःकृतोवर्णाश्रमाद्याचारनियमस्तस्योल्लंघनेज्ञानानिष्पत्त्यास्वार्थोनभवतिलोकवत् यथालोकेभेषज्यादौविहितप
थ्यादीनांलंघनेतत्तत्सिद्धिर्नभवतीतद्वदित्यर्थः अशक्त्याज्ञानरक्षार्थंवालंघनेतुनज्ञानप्रतिबंधः अपेतव्रतकर्मातुकेव
लंब्रह्मणिस्थितः ब्रह्मभूतश्चरंल्लोकेब्रह्मचारीतिकथ्यते नपपाठगुरुप्रोक्तांकृतोपनयनःश्रुतिं नददर्शचकर्माणिशास्त्रा १५
णिजगृहेनचेत्यादिअनुगीतादिवाक्येभ्यः एतएवपुराणेविष्णुदौरथ्याकर्मत्यागिनएवपाषंडितायानिंदितापुंसांज

109
1990

साधारणमोढ्यमहतांवर्थैवमोघाशिनामखिलशौचबहिःकृतानां पिंडप्रदानपितृतोयविवर्जितानांसंभाषणादपिन
राणांनरकंप्रयांतीत्यादिनेतिनियमलंघनेस्मरणेप्यानर्थक्यमाह तद्विस्मरणेपिभेकीवत् सुगमंभेक्याश्चेयमाख्यायिकाइ
क्ष्वाकुराजामृगयांगतोविपिनेसुंदरींकन्यांददर्शसाचराज्ञाभार्याभावायप्रार्थितानियमंचक्रेयदामह्यंत्वयाजलंप्रद
र्श्यतेतदामयागंतव्यामितिएकदातुक्रीडयापरिश्रांताराजानंपप्रच्छकुत्रजलमितिराजापिसमयंविस्मृत्यजलमदर्शि
यत्ततःसाभेकराजदुहिताकामरूपिणीभेकीभूत्वाजलंविवेशततश्चराजाजालादिभिरन्विष्यापिनतांअविंददिति श्र
वणादुरुवाक्यमीमांसायाअप्यावश्यकत्वेइतिहासमाह नोपदेशश्रवणेपिकृतकृत्यतापरामर्शादतेविरोचनवत् परा
मर्शोगुरुवाक्यतात्पर्यनिर्णायकोविचारस्तंविनाउपदेशवाक्यश्रवणेपितत्त्वज्ञाननियमोनास्ति प्रजापतेरुपदेशश्रव
णेपींद्रविरोचनयोर्मध्येविरोचनस्यपरामर्शाभावेनविवेकाभावश्रुतेरित्यर्थः अतोगुरूपदिष्टस्यमननमपिकार्य
मितिदृश्यतेचेदानीमप्येकस्येवतत्त्वमस्युपदेशस्यनानारूपेरर्थैःसंभावना अखंडत्वमवैधर्म्यलक्षणाभेदोऽविभा
गादिरितिचेत् अतएवचपरामर्शोदृश्यतइत्याह दृष्टस्तयोरिंद्रस्य तच्छब्देनोच्यमानयोःपरामर्शस्तयोरिंद्रविरोच
नयोर्मध्येपरामर्शइंद्रस्यदृष्टश्चेत्यर्थः कृतकृत्यतामपींद्रस्यदृष्टांतविधयाप्रदर्शयन् सम्यग्ज्ञानार्थिनागुरुसेवाच
बहुकालंकर्तव्येत्याह प्रणतिब्रह्मचर्योपसर्पणानिकृत्वासिद्धिर्बहुकालात्तद्वत् तद्वदिंद्रस्येवान्यस्यापिगुरोःप्रणति
वेदाध्ययनसेवादीन्कृत्वैवसिद्धिःतत्त्वार्थस्फूर्तिर्भवतिनान्यथेत्यर्थः तथाचश्रुतिः यस्यदेवेपराभक्तिर्यथादेवे
तथागुरौ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइति नकालनियमोवामदेववत् ऐंद्रियकसाधनादेवभवती
त्यादिज्ञानोदयेकालनियमोनास्तिवामदेववत् वामदेवस्यजन्मांतरीयसाधनेभ्योगर्भेपियथाज्ञानोदयस्तथा
न्यस्यापीत्यर्थः तथाचश्रुतिः संदेतत्पश्यन्नृषिर्वामदेवःप्रतिपेदेहंमनुरभवंसूर्यश्चेतितदिदमप्येतर्हियएवंवे
दाहंब्रह्मास्मीतिसइदंसर्वंभवतीत्यादिशितअहंमनुरभवमित्यादिकुमंवैधर्म्यलक्षणाभेदपरंसर्वव्यापकताख्य
ब्रह्मतापरंवासर्वंसमाभाषितनासिसर्वइत्यादिस्मरणात् सइदंसर्वंभवतीतिऔपाधिकपरिच्छेदस्यात्यंतोच्छेद
परमिति ननुसगुणोपासनायामपिज्ञानहेतुत्वश्रवणात्तत एवज्ञानंभविष्यतिकिमर्थंदुष्करसूक्ष्मयोगचर्येतित

तत्राह अध्यस्तरूपोपासनात्पारंपर्येणयज्ञोपासनोकोभिवासिद्धिरित्यनुषज्यते अध्यस्तरूपैः पुरुषाणांब्रह्मविष्णुहरादी
नामुपासनात्पारंपर्येणब्रह्मादिलोकप्राप्तिक्रमेणसत्वशुद्धिद्वाराचज्ञाननिष्पत्तिर्नसाक्षात् यथायाज्ञिकानामित्यर्थः ब्र
ह्मादिलोकपरंपरयापि ज्ञाननिष्पत्तौनास्तिनियमइत्याह इतरलाभेप्यावृत्तिः पंचाग्नियोगतोजन्मश्रुतेः निर्गुणा
त्मनइतरस्यअध्यस्तरूपस्यब्रह्मलोकपर्यंतेषुलाभेप्यावृत्तिरस्तिकुतः ब्रह्मलोकंगतस्यापिद्युपर्जन्यधरानर्स्त्री
षिभ्र्त्याग्निपंचकेपंचाहुतितोजन्मश्रवणात्छंदोग्यपंचमप्रपाठके असौवावलोकोगौतमाग्निरित्यादिनेत्य
र्थः यच्चब्रह्मलोकानावृत्तिवाक्यंतत्तत्रैवप्रायिणोत्पन्नज्ञानपुरुषविषयकमिति ज्ञाननिष्पत्तिर्विरक्तस्यैवेतत्र
निदर्शनमाह विरक्तस्यहेयहानमुपादेयोपादानंहंसक्षीरवत् विरक्तस्यैवहेयादीनांहानमुपादेयस्यचात्मनउ
पादानंभवति यथादुग्धजलयोरेकीभावापन्नयोर्मध्येऽसारजलत्यागेनसारभूतक्षीरोपादानंहंसस्यैवनतुका
कादेरित्यर्थः सिद्धपुरुषसंगाद्प्येतदुभयंभवतीत्याह लब्धातिशययोगाद्वाहंसवत् लब्धोतिशयोज्ञानकाष्ठा
येनतत्संगाद्वत्युक्तंभवतिहंसवदेवेत्यर्थः यथालर्कस्यदत्तात्रेयसंगमात्रादेवस्वयंविवेकः प्रादुरभूदिति रागिसंगोनका
र्यइत्याह नकामचारित्वंरागोपहतेशुकवत् रागोपहतेपुरुषेकामतःसंगोनकर्तव्यः यथाशुकःपक्षीप्रकृष्टरूपइति
कृत्वाकामचारंनकरोतिरूपलोलुपैर्बंधनभयात्तद्वदित्यर्थः रागिसंगेतुदोषमाह गुणयोगाद्बद्धःशुकवत् तेषांसंगे
तुगुणयोगात्तेषांरागादियोगाद्बंधःस्यात्शुकवदेवयथाशुकपक्षीव्याधस्यगुणैरज्जुर्बद्धोभवतितद्वदित्यर्थः अ
थवागुणितयागुणलोलुपैर्बद्धोभवतिशुकवदित्यर्थः अत्रैवार्थेसौभरिणा समेसमाधिर्जलेवासमेवमत्स्यस्यसं
गात्महंसेवनष्टःपरिग्रहःसंगकृतोममायंपरिग्रहोत्साश्चमहाविधित्साइति वैराग्यस्याप्युपायमवधारयतिद्वाभ्यां
नभोगाद्रागशांतिर्मुनिवत् यथामुनेःसौभरेर्भोगान्नरागशांतिरभूत्एवमन्येषामपिनभवतीत्यर्थः तदुक्तं सौभ
रिणैवआमृत्युतोनैवमनोरथानामंतोस्तिविज्ञातमिदंमयाद्यमनोरथासक्तिपरस्यचित्तंनजायतेवैपरमार्थसंगीति अ
पितु दोषदर्शनादुभयोः उभयोःप्रकृतितत्कार्ययोःपरिणामित्वदुःखात्मकत्वादिदोषदर्शनादेवरागशांतिर्भवतिमुनि १६
वदेवेत्यर्थः सौभरिर्हि संगदोषदर्शदेवपश्चाद्वैराग्यंश्रूयतेदुःखंयदेवैकशरीरजन्मशतार्धसंख्यंतदिदंप्रसूतं परिग्रहे

111/1990

णाक्षितथात्मजानांसुतेरनेकैर्बहुलीकृतंतदित्यादिनेति रागादिदोषोपहतस्योपदेशग्रहणेप्यनधिकारमाह नमलिनचेत
ज स्युपदेशबीजप्ररोहोऽजवत् उपदेशरूपस्यतत्त्वज्ञानवृक्षस्यबीजंतस्याकरोपिरागादिमलिनचित्तेनोत्पद्यतेऽजवत् यथा
जनास्तिनृपस्यापिशोकमलिनचित्तेवसिष्ठेनोक्तस्याप्युपदेशस्यनांकुरउत्पन्नइत्यर्थः किंबहुनाभासमानमपिमलि
नदर्पणवत् आयातज्ञानमपिमलिनचेतस्युपदेशानजायतेविषयांतरसंचारादिप्रतिबंधात् यथामलेःप्रतिबंधान्म
लिनदर्पणेऽर्थानप्रतिबिंबतितद्वदित्यर्थः तदुक्तंयाज्ञवल्क्येनमलिनोहियथादर्शोरूपालोकस्यनक्षमः तथापिपऽ
पक्वाकरणआत्मज्ञानस्यनक्षमइति यदिवायथाकथंचित् ज्ञानंजायेततथापिउपदेशानुरूपंनभवेदित्याह नतज्ज्ञ
स्यापितद्रूपतापंकजवत् तस्मादुपदेशाज्ज्ञातिस्यापिज्ञानस्योपदेशानुरूपतानभवतिसामग्र्येणानवबोधात् यथा
बीजस्यापिमलोपसंकदोषाद्बीजानुरूपतापंकजस्यनभवतितद्वदित्यर्थः पंकस्थानीयंशिष्यचित्तं उक्तेषुज्ञानसाधनेष्वि
यमाशंका ननुब्रह्मलोकादिश्वैश्वर्येणैवपुरुषार्थसिध्याकिमर्थमेतावतायासेनमोक्षायज्ञाननिष्पादनंतत्राह नभूत
योगेपिकृतकृत्यताउपास्यसिद्धिवत् उपास्यसिद्धिवत् ऐश्वर्ययोगेपिकृतार्थतानास्तिक्षयातिशयदुःखैरनुगमात्
उपास्यसिद्धिवत् यथाउपास्यानांब्रह्मादीनांसिद्धियोगेपिनकृतकृत्यताब्रह्मणोपिभयंमत्तोद्विपरार्धपरायुषः इति
स्मृतेदुःखनिवृत्त्यर्थंतेषामपियोगनिद्रादौयोगाभ्यासश्रवणात् तथैवतदुपासनयाप्राप्तत्तदैश्वर्यस्यापीत्यर्थः तथा
चश्रुतिः जीविष्यामोयावदीशिष्यसित्वंवरस्तुमेवरणीयःसएवेत्यादिउपास्यसिद्धिवदिति विद्याध्यायसमाप्तौअध्या
यार्थंतयोक्तस्याविवेकस्यासरंगिकं आख्यायिकाभिःसंप्रोक्तमत्राध्यायेसमासतः इतिश्रीविज्ञानाचार्यनिर्मितकापि
लसांख्यप्रवचनस्यभाष्येआख्यायिकाध्यायश्चतुर्थः स्वशास्त्रसिद्धांतःपर्याप्तः इतःपरंस्वशास्त्रेपरेषांपूर्वपक्षान्
पाकर्तुंपंचमाध्यायआरभ्यते तत्रादावादिसूत्रेऽथशब्देनयन्मंगलंकृतंतच्छास्त्रमित्यार्थेयंसमाधत्ते मंगलाचरणंशि
ष्टाचारात्फलदर्शनात्श्रुतितश्चेति मंगलाचरणंयत्कृतंतद्दोतैःप्रमाणैःकर्तव्यतासिद्धिरित्यर्थइतिशब्दोहेत्वंतरा
कांक्षानिरासार्थः मंगलंचविघ्ननिवर्तकलमतोथशब्दोच्चारणस्यफलमुक्तं ईश्वरासिद्धेरितियदुक्तंतन्नोपपद्यते क
र्मफलदातृतयातत्सिद्धिरितियेपूर्वपक्षाः तान्निराकरोति नेश्वराधिष्ठितेफलनिष्पत्तिः कर्मणातत्सिद्धेः ईश्वराधि
ष्ठितेकारणेकर्मफलरूपपरिणामस्यनिष्पत्तिर्नयुक्ता आवश्यकेनकर्मणैवफलनिष्पत्तिसंभवात्इत्यर्थः ईश्वरस्यफल

सां० भा०

१७ रात्वंनघटतेपीत्याहसंत्रेः स्वोपकाराददधिष्ठानंलोकवत् ईश्वरस्याधिष्ठातृत्वेस्वोपकारार्थमेवलोकवदधिष्ठानस्यादि
त्यर्थः भवत्वीश्वरस्याप्युपकारःकाक्षतिरित्याशंक्याह लौकिकेश्वरवदितरथा ईश्वरस्याप्युपकारस्वीकारेलौकिके
श्वरवदेवसोपिसंसारीस्यात् अपूर्णकामतयादुःखादिप्रसंगादित्यर्थः तर्थेवमस्तुत्वित्याशंक्याह पारिभाषिकोवा सं
सारसत्वेपिचेदीश्वरस्तर्हि सर्गाद्युत्पन्नपुरुषेपरिभाषामात्रमस्माकमिवतेषामपिस्यात्संसारित्वाप्रतिहतेच्छत्वयोर्वि
रोधान्नित्यैश्वर्यानुपपत्तेरित्यर्थः ईश्वरस्याधिष्ठातृत्वेबाधकांतरमाह नरागादृतेतत्सिद्धिः प्रतिनियतकारणत्वात्
किंचरागंविनानाधिष्ठातृत्वंसिध्यतिप्रवृत्तौरागस्यप्रातिनियतकारणत्वादित्यर्थः नन्वेवमस्तुरागोपीश्वरेतत्राह
तद्योगेपिननित्यमुक्तः रागयोगेपिस्वीक्रियमाणेसनित्यमुक्तोनततश्चतेसिद्धांतहानिरित्यर्थः किंचप्रकृतिप्र
वृत्त्यैश्वर्यंप्रकृतिपरिणामभूतेच्छादिनानसंभवतिअन्योन्याश्रयात् इच्छोत्पत्त्यनंतरंप्रकृतिप्रवर्तनंप्रवृत्त्यनंतरंचेच्छा
दिरिति नित्येच्छादिकंचप्रकृतेनयुक्तंश्रुतिस्मृतिसिद्धसाम्यावस्थानुपपत्तेः प्रकारद्वयमवशिष्यतेतद्यथाऐश्वर्यंकिं
प्रधानधर्मत्वेनास्मदभिमतानामिच्छादीनांसाक्षादेवचेतनसंबंधात् किंवाअयस्कांतमणिवत्सांनिध्यसत्तामात्रेणप्रे
रकत्वादितितत्राद्यपक्षंदूषयति प्रधानशक्तियोगाच्चेत्संगापत्तिः प्रधानशक्तेरिच्छादेःपुरुषेयोगात्पुरुषस्यापिधर्म
संगापत्तिः तथाचसाक्षीचेताकेवलोनिर्गुणश्चसयत्तत्रपश्यत्यनन्वागतस्तेनभवतिअसंगोह्ययंपुरुषइत्यादिश्रु
तिविरोधइत्यर्थः अंत्यंत्वाह सत्तामात्राच्चेत्सर्वैश्वर्यं अयस्कांतवत्सांनिध्यसत्तामात्रेणचेदैश्वर्यंतर्हिसर्वेषामेवत
त्सर्गेषुभोक्तॄणांपुंसामविशेषेणैश्वर्यमस्मदभिप्रेतमेवसिद्धं तदुक्तंमोक्षधर्मेअभिद्रवत्ययस्कांतमयोनिश्चेतनं
यथा अचेतनमूर्त्तयस्तुःकारणादभिसंहताइति आखिलमोक्षसंयोगादेवप्रधानेनमहदादिसर्जनादिति ततश्चे
कएवंविधसत्कर्तृसहस्रैः प्रधानमपिबाधितुंशक्यतइत्यतआह प्रमाणाभावान्नतत्सिद्धिः तत्सिद्धिर्नित्येश्वरसिद्धि
ईश्वरेतावत्प्रत्यक्षंनास्तीत्यनुमानशब्दावेवप्रमाणेवक्तव्येतेचनसंभवतइत्यर्थः असंभवमेवप्रतिपादयतिसूत्रा
भ्यांसंबंधाभावान्नानुमानं संबंधोव्याप्तिः अभावोसिद्धिः तथाचमहदादिकंसकर्तृकंकार्यत्वादित्याद्यनुमानेषुप्र १७
योजकत्वेनव्याप्यत्वासिध्यानेश्वरेनुमानमित्यर्थः नापिशब्दइत्याह श्रुतिरपिप्रधानकार्यत्वस्यप्रपंचेप्रधानकार्यत्वस्ये

113/1990

श्रुतिरस्तिनचेतनकारणत्वेयथाअजामेकांलोहितशुक्लकृष्णांबह्वीःप्रजाःसृजमानांसरूपाः तद्धेदंतर्ह्यव्याकृतमासीत
नामरूपाभ्यांव्याक्रियतेइत्यर्थः याचतदैक्षतबहुस्यामित्यादिश्चेतनकारणताश्रुतिः सासर्गादावुत्पन्नमहत्त्वलो
पाधिकस्यमहापुरुषस्यजन्यज्ञानपराकिंवाबहुभवनानुरोधात् प्रधानएवकूलंपिपतिषतीतिवद्गौणी अन्यथासा
क्षीचेताकेवलोनिर्गुणश्चेत्यादिश्रुत्यापरिणामित्वस्यपुरुषेऽनुपपत्तेरिति अयंचेश्वरप्रतिषेधःप्रतिसर्वाश्रुतिप्र
धानपरतयोपपादनेचऐश्वर्यवैराग्यार्थमीश्वरज्ञानंविनापिमोक्षप्रतिपादनार्थंचप्रौढिवादमात्रमितिप्रागेवव्या
ख्यातं अन्यथाजीवव्यावृत्तस्येश्वरनित्यत्वादेःश्रुतीनांगौणत्वकल्पनागौरवंऔपाधिकनित्यज्ञानेच्छादीनांमहदा
दिरूपपरिणामानांत्वंगीकारेणकोदृश्याद्युपपत्तिरित्यादिकंब्रह्ममीमांसायांद्रष्टव्यमिति आत्माश्रिताज्ञानकल्प
नयैवस्वमतत् सर्वव्यवहारोपपत्तेःप्रधानकल्पनाव्यर्थेतियथास्तिकेनापिकेनचदाक्षिप्येतदूषयति नाविद्या
शक्तियोगोनिःसंगस्य परंप्राडुःप्रधानंनास्तिकिंतुज्ञाननाश्या अनाद्यविद्याख्याशक्तिश्चेतनेतिष्ठतितत एवचेत
नस्यबंधस्तन्नाशेनमोक्षइतिएतदेवचवेदांतेषुपूर्वपक्षमाधुनिकामायावादिनःसिद्धांतत्वेनकल्पयंतितत्रेदमु
च्यतेनिःसंगतयाचेतनस्याविद्याशक्तियोगःसाक्षान्नसंभवतीतिअविद्याख्यस्मिंस्तदाकारतातच्छक्तिश्चतद्वा
सनासाचसंगंविनानसंभवतीत्यर्थः ननुअविद्यावशाद्विद्यायोगोवक्तव्यः तथाचापारमार्थिकत्वान्नतयासं
गइतितत्राह तद्योगेतत्सिद्धावन्योन्याश्रयत्वं अविद्यायोगादविद्यासिद्धौचान्योन्याश्रयत्वमनवस्थाचेतिशेषः
ननुबीजांकुरवदनवस्थानदोषायेत्याशंक्याह नबीजांकुरवत्सादिसंसारश्रुतेः बीजांकुरवदनवस्थानसंभवतिप्रकृतेसं
सारस्यानादित्वश्रवणेपिपुरुषाणांसंसारस्याविद्याद्यखिलानर्थरूपस्यसादित्वश्रुतेः प्रलयसुषुप्त्यादौअभावश्रवणा
दित्यर्थः ब्रह्मवाइदमग्रआसीत्विज्ञानघनएवेतेभ्योभूतेभ्यः समुत्थायतान्येवानुविनश्यतीत्यादिश्रुतिभिर्हिप्रलयादौ
बुधिवत्स्वभावेनतदौपाधिकाविद्याविद्याद्यखिलसंसारशून्यचिन्मात्रत्वंपुरुषाणांसिद्धमिति तस्मादविद्याप्याविद्यकी
तिवाज्यात्रं ननुअस्माकं अविद्यापारिभाषिकीनतुयोगोक्ताअनात्मन्यात्मबुध्यादिरूपातथाचभवतांप्रधानवदेवास्माक
मपितस्याअखंडानादितयाशुक्त्याद्यज्ञानवत्स्वाश्रयावलेपकतयाचपुरुषनिष्ठाविनाशंताहानिरित्याशंकायांपरिकल्पित

सां० भा०
१८

मविद्याशब्दार्थविकल्पं दूषयति विद्यातोऽन्यत्वे ब्रह्मबाधप्रसक्तेः यदि विद्यान्यत्वमेवाविद्याशब्दार्थस्तर्हि तस्य ज्ञाननाश्य
त्वाभ्युपगमे ब्रह्मण आत्मनोऽपि बाधो नाशः प्रसज्येत विद्याभिन्नत्वादित्यर्थः अबाधे नैष्फल्यं यदि चाविद्यारूपमपि
विद्यया न बाध्यते तर्हि विद्याविकल्पं अविद्यानिवर्तकत्वाभावादित्यर्थः पक्षांतरं दूषयति विद्याबाध्यत्वे जगतोऽप्येवं
यदि चेत्तेन धर्मिणि बाध्यत्वमेवाविद्यात्वमुच्यते तथा सति जगतः प्रकृतिमहदाद्यखिलप्रपंचस्याप्येवमविद्यात्वं स्या
त् अथात आदेशो नेत्यस्थूलमनण्वित्यादिश्रुतिभिर्मिथ्याज्ञानस्यैव प्रकृत्यादेरप्यात्मनि बाधितत्वादित्यर्थः तथा चा
खिलप्रपंचस्यैवाविद्यात्वे सत्येकस्य ज्ञानेनाविद्यानाशादन्यैरपि प्रपंचो न दृश्येतेति भावः विद्यानाश्यत्वं चाविद्यात्वं वक्तु
न शक्यं तेन विद्यानाश्यत्वेन विद्यानाश्यत्वं प्रहासंभवात् आत्माश्रयात् एकस्य मुक्तावन्यैः कार्यदर्शनेन जगत्कारणस्य ज्ञा
ननाश्यत्वासंभवाच्च तस्माज्ज्ञाननाश्यतया जगत्कारणस्याविद्यात्वं न मुख्यं संभवति किं त्वविद्यामूलत्वात् द्विषयत्वादिना गौ
णमिति तद्रूपत्वे सादित्वं संभवतु वाक्यया कथंचिद्विद्याबाध्यत्वमेवाविद्यात्वं तथापि तादृशवस्तुनः सादित्वमेव पुरु
षेषु न त्वनादित्वं संभवति विज्ञानघन एवेत्याद्युक्तश्रुतिभिः प्रलयादौ पुरुषस्य चिन्मात्रत्वसिद्धेरित्यर्थः अस्मन्मते
च प्रलये पुरुषस्यासंसारित्वेऽपि स्वतंत्रविल्प्रधानसंयोगात्पुनर्बंध उपपादितः तथा प्रधानसंयोगेऽपि प्रागभावी
या विवेकवासनादृष्टानीदृशभिन्नाभिमत्युक्तं तस्माद्योगदर्शनोक्तादन्या नास्त्यविद्या ज्ञाननाश्या सा च बुद्धिधर्म ए
व न पुरुषधर्म इति सिद्धं अत्रेनाध्याये यदुक्तं कर्मनिमित्ता प्रधानप्रवृत्तिरिति तत्र परपूर्वपक्षं समादत्ते प्रघट्टके
न न धर्मापलापः प्रकृतिकार्यवैचित्र्यात् अप्रत्यक्षतया धर्मापलापो न संभवति प्रकृतिकार्येषु वैचित्र्यात्तथानुप
पत्त्या तदनुमानादित्यर्थः प्रमाणांतरमप्यस्तीत्याह श्रुतिलिंगादिभिस्तत्सिद्धिः पुण्यो वै पुण्येन भवति पापः पापे
नेत्यादिश्रुतेः स्वर्गकामोऽश्वमेधेन यजेतेति विद्यादिरूपलिंगाद्योगिप्रत्यक्षादिभ्यश्च तत्सिद्धिरित्यर्थः प्रत्यक्षा
भावे धर्मासिद्धिरिति परस्य हेतुमाभासीकरोति न नियमः प्रमाणांतरावकाशात् लौकिकप्रत्यक्षाभावाधेत्वभा
व इति नियमो नास्ति प्रमाणांतरेणापि वस्तुनो विषयीकरणादित्यर्थः धर्मवदधर्मं शोधयति उभयत्राप्येवं १८
धर्मवदधर्मेप्येवं प्रमाणमित्यर्थः अर्थात्सिद्धिश्चेत्समानमुभयोः ननु विध्यन्यथानुपपत्तिरूपयाऽर्थापत्त्या धर्म

115/1990

सिद्धिः सा च नास्त्यधर्म इति कथं श्रोतलिंगादेशोऽधर्म इति चेत्तन्न यतः समानमुभयोर्धर्माधर्मयोरर्थापत्तिरूपं प्रमाणम
स्ति परिहारान्न गतिरिति निषेधविध्यन्यथानुपपत्तेरित्यर्थः ननु धर्मादिकं चेत्त्वत्स्वीकृतं तर्हि पुरुषाणां धर्मादिमत्त्वेन परि
णामाद्यापत्तिरित्याशंक्य परिहरति अंतःकरणधर्मत्वं धर्मादीनां आदिशब्देन वैशेषिकशास्त्रोक्ताः सर्व आत्मविशेषगु
णा गृह्यंते न चैवं प्रलये अंतःकरणाभावाद्धर्मादिकं क्व तिष्ठत्विति वाच्यं आकाशवदंतःकरणस्यात्यंतविनाशाभावात्
अंतःकरणं हि कार्यकारणोभयरूपमिति प्रागेव व्याख्यातं अंतःकरणावस्थप्रकृत्यंशसत्त्वविशेषतः करणो धर्माधर्मसंस्का
रादिकं जायं तं प्रलये चातिष्ठत स्यादेतत् प्रकृतिकार्यवैचित्र्यात् श्रुत्यादिभिश्च धर्मादिसिद्धिरिति यदुक्तं तदयुक्तं त्रिगु
णात्मकप्रकृतेस्तत्कार्याणां च भवता श्रुत्यैव बाधात् साक्षी चेता केवलो निर्गुणश्च अथात आदेशो नेति नेति अशब्दमस्पर्शम
रूपमव्ययं तथारसं नित्यमगंधवच्च यत् इत्यादिना नानिरोधो न चोत्पत्तिः वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्या
दिना चेति तत्परिहरति गुणादीनां च नात्यंतबाधः गुणानां सत्त्वादीनां तद्धर्माणां च सुखादीनां तत्कार्याणामपि महदा
दीनां स्वरूपतो नास्ति बाधः किंतु संसर्गत एव चेतनेन बाधोऽयस्यौष्ण्यबाधवत् तथा कालत एवावस्थादिभिर्बाधोऽखिलप
रिणामिन इत्यर्थः कुतः पुनः स्वरूपत एव बाधो न भवति स्वप्नमनोरथादिपदार्थवदित्याकांक्षायामाह पंचावयवयोगा
त्सुखसंवित्तिः अत्र विशिष्य पक्षीकरणाद्यविवादविषयीकदेशस्य मुख्यमात्रस्य ग्रहणं सर्वविषयोपलक्षकं सुखा
दिसंवित्तिरिति पाठस्तु समीचीनः पंचावयवाश्च न्यायस्य प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि तेषां योगान्मेलना
त्सुखाद्यखिलपदार्थसिद्धिरित्यर्थः प्रयोगश्चायं सुखं सत् अर्थक्रियाकारित्वाद्यदर्थक्रियाकारि तत्सत् यथा चेतनाः
पुलकादिरूपार्थक्रियाकारि च सुखं तस्मात्सदिति चेतनानां चाविकारित्वेऽपि विषयप्रकाश एवार्थक्रियेति नास्ति
कं प्रति च व्यतिरेकानुमानं कर्तव्यं तत्र च शशशृंगादिर्दृष्टांत इति ननु प्रत्यक्षातिरिक्तं प्रमाणमेव न भवा व्याप्यत्वाद्यसिद्धेरिति
चार्वाकास्त्र प्रत्यवतिष्ठते न सकृद्ग्रहणात्संबंधसिद्धिः सकृत्सहचारग्रहात्संबंधो व्याप्तिर्न सिध्यति भूयस्त्वं चानुगतं भवो
व्याप्तित्वासंभवान्नानुमानेनार्थसिद्धिरित्यर्थः उभयोरिति समव्याप्तिपक्षे प्रोक्तं नियमश्च क्षमाधत्ते नियतधर्मसाहित्य
मुभयोरेकतरस्य वा व्याप्तिः धर्मसाहित्यं धर्मतायां साहित्यं सहचार इति यावत् तथा च उभयोः साध्यसाधनतयोरेकतरस्य

साधनमात्रस्यचानियतोव्यभिचरितोयः सहचारः सव्याप्तिरित्यर्थः उभयोरितिसमव्याप्तिपक्षेप्रोक्तंनियमश्चानुकू
लतर्केणग्राह्यइतिनव्याप्तिग्रहासंभवइतिभावः व्याप्तिर्वक्ष्यमाणशक्त्यादिरूपंपदार्थांतरंनभववीत्याह नतत्वांतरव
स्तुकल्पनाप्रसक्तेः नियतधर्मसाहित्यातिरिक्तंवस्तुव्याप्तिर्नभवतिव्याप्तित्वाश्रेयस्यवस्तुनोपिकल्पनाप्रसंगात् अस्मा
भिस्तुसिद्धवस्तुन एवव्याप्तित्वमात्रंकल्प्यतइत्यर्थः तत्वांतरमेवदर्शयति निजशक्त्युद्भवमित्याचार्याः अपरेत्वाचा
र्याः व्याप्यस्यशक्तिजन्यशक्तिविशेषरूपंतत्वांतरमेवव्याप्तिरित्याहुः निजशक्तिमात्रंतुयावद्द्रव्यस्थायितयानव्याप्तिः
देशांतरगतस्यवन्ह्यव्याप्यत्वात् देशांतरगमनेनचसाशक्तिर्नाश्यतइतिनोक्तलक्षणातिव्याप्तिः स्वयंमतेतुउत्पत्तिकाला
वछिंनत्वेनधूमोविशेषणीयइतिभावः आधेयशक्तियोगइतिपंचशिखः उत्पत्तिकालावछिंनत्वेनधूमोविशेषणीय
इतिभावः आधेयशक्तिर्मातुध्यादिषुप्रकृत्यादिव्याप्यताव्यवहारादाधारताशक्तिमत्वंचव्याप्यत्वमितिपंचशिखइत्य
र्थः नन्वाधेयशक्तिः किमर्थंकल्प्यतेव्याप्यस्यवस्तुनः स्वरूपशक्तिरेवव्याप्तिरस्तुतत्राह नस्वरूपशक्तिनियमःपु
नर्वादप्रसक्तेः स्वरूपशक्तिनियमोव्याप्तिर्नभवतिपौनरुक्त्यप्रसंगात् घटःकलशइतिवद्वृक्षिर्व्याप्येत्यत्राप्यर्था
भेदेनेत्यर्थः शक्तिपदोपादानंव्याप्तेर्व्याप्यधर्मतोपपादनायस्वरूपशक्तिश्चवृक्षत्वादिकमेवअतोवृक्षत्ववतीइ
त्यर्थापत्त्यापौनरुक्त्यइतीमं पौनरुक्त्यस्यदूषकताबीजमाह विशेषणानर्थक्यप्रसक्तेः पूर्वसूत्रएवव्याख्यात
मिदं ननुवृक्षत्ववतीत्यत्रवृक्षितत्वांशस्याधिकस्याप्रकारत्वानवैयर्थ्यमित्याशयेनदूषणांतरमाह पल्लवादिष्वनु
पपत्तेश्च पल्लवादिषुवृक्षादिव्याप्यत्वमस्तिस्वरूपशक्तिमात्रंतुतस्यलक्षणंनसंभवतिछिन्नपल्लवेपिस्वरूपशक्तेरनपा
येनतदानीमपिव्याप्यतापत्तिरित्यर्थः आधेयशक्तिस्तुछेदकालेविनश्यतिनतदानीव्याप्तिरितिभावः ननुकिंपंचशि
खेननिजशक्त्युद्भवाव्याप्तिरेवबोध्यतेतर्हिगंधादेः पृथिवीत्वाद्याधेयत्वाभावात् पृथिवीत्वाद्यव्याप्यतापत्तिरितिरिति
तत्राह आधेयशक्तिसिद्धौनिजशक्तियोगःसमानन्यायात् आधेयशक्तेर्व्याप्तित्वसिद्धौनिजशक्त्युद्भवाव्याप्तिरि
नसिद्धएवसमानन्यायात् युक्तिसाम्यादित्यर्थः व्याप्तिशब्दार्थाननुगमास्तुनानार्थवन्नदोषायनचैवमप्यनुमि
ति हेतुत्वेव्याप्तीनामननुगमःस्यादितिवाच्यंतृणारणिमण्यादितत्कार्यगतवैजात्याद्युपपत्तेः अन्यथासर्वेषामेवम १९

117/1990

त्रसचशब्दविशेषः यदाख्योर्थस्फुटीकरणात्स्फोटइत्युच्यतेसशब्दोऽप्रामाणिकःकुतः प्रतीत्यप्रतीतिभ्यांसशब्दःऽ
किंप्रतीयतेनवाआद्येयेनवर्णसमुदायेनानुपूर्वीविशेषविशिष्टेनसोभिव्यज्यतेतस्यैवार्थप्रत्यायकत्वमस्तुकिमंतर्गु
डुनातेनअंत्येनअज्ञातस्फोटस्यनास्त्यर्थप्रत्यायनशक्तिरितिव्यर्थास्फोटकल्पनेत्यर्थः कथाकथंचिदकृताप्रत्यय
स्यार्थसाधकत्वेवचनादेरपिप्रत्येकवृक्षादिभ्योतिरेकापत्तेः एकंवचनमित्याद्यनुभवसाम्यादिति पूर्वंवेदानांनित्यत्वंप्र
तिषिद्धमिदानींवर्णनित्यत्वमपिप्रतिषेधति नशब्दनित्यत्वंकार्यताप्रतीतेः सएवायंगकारइत्यादिप्रत्यभिज्ञाबलाद्वर्ण
नित्यत्वंयुक्तंसउन्नोगकारइत्यादिप्रत्ययेनानित्यत्वासिद्धेरित्यर्थः प्रत्यभिज्ञाचतज्जातीयताविषयिणीअन्यथाघटा
देरपिप्रत्यभिज्ञयानित्यत्वापत्तेरिति शंकतेपूर्वसिद्धसत्वस्याभिव्यक्तिर्दीपेनेवघटस्यनतुपूर्वसिद्धसत्ताकस्यैवशब्द
स्यध्वन्यादिभिर्व्याभिव्यक्तिस्तन्मात्रमुत्पत्तिप्रतीतेर्विषयः अभिव्यक्तौदृष्टांतोदीपेनेवघटस्येति परिहरति सत्का
र्यसिद्धांतश्चेत्तत्सिद्धसाधनं अभिव्यक्तिर्यद्यनागतावस्थात्यागेनवर्तमानावस्थालाभइत्युच्यतेतदासत्कार्यसिद्धां
तः तादृशनित्यत्वंचसर्वकार्याणामेवेतिसिद्धसाधनमित्यर्थः यदिचवर्तमानतयासतएवज्ञानमात्रमपिअभिव्य
क्तिरुच्यतेतदाघटादिनामपिनित्यत्वापत्तिः शब्देष्विवघटादिष्वपिकारणव्यापारेणज्ञानस्यैवोत्पत्तिःप्रतीतिविष
यत्वोचित्यादितिभावः आत्माद्वैतेपूर्वानुक्तमपिबाधकमुपन्यसनीयमित्येतदर्थमात्माद्वैतनिरासःपुनरारभ्य
ते नाद्वैतमात्मनालिंगात्तद्भेदप्रतीतेः यद्यप्यात्मनामन्योन्यभेदवाक्यवदभेदवाक्यान्यपिसंतितथातभेदतानि
पिनाद्वैतंनान्यंतमभेदःअजादिवाक्यस्थैःप्रकृतित्यागात्यागादिलिंगैर्भेदस्यैवसिद्धेरित्यर्थः नह्यत्यंतभेदेताऽ
निलिंगान्युपपद्यंते औपाधिकभेदेनतादृशवाक्योपपत्तेरसंभवस्योक्तत्वात् अभेदवाक्यानितुसाम्यादिकुम
स्यापिश्रुत्येकवाक्यतयाविधर्म्यादिलक्षणाभेदपरतयोपपद्यंतेअभिमानादिनिवृत्त्यन्यथानुपपत्त्यात्परत्वा
वधारणाच्चेति आत्मनामतभेदलिंगबाधकमुक्तंआत्मैवेदंसर्वंसर्वमितिश्रुतेरात्मनानात्माभिः साहंचर्यप्रत्य
क्षमपिबाधकमस्तीत्याह नात्मनापिप्रत्यक्षबाधात् अनात्मनापिभोग्यप्रपंचेनात्मनोनाद्वैतंप्रत्यक्षेणापि
बाधात् आत्मनःसर्वभोग्याभेदेघटपटयोरप्यभेदःस्यात् घटादेःघटाद्यभिन्नात्माभेदात्सचभेदग्राहकप्र

सां॰भा॰

२२

त्मस्वबाधितः तथाअथातआदेशोनेतिनेतीतिअस्थूलमनण्वित्यादि प्रत्यक्षश्रुतिबाधितोप्यात्मप्रपंचयोरभेदइत्यर्थः
शिष्यबुद्धिवैशारद्यायप्राप्तमपिअर्थंविशदयतिनोभाभ्यांतेनैव उभाभ्यांसमुच्चिताभ्यामप्यात्मानात्मभ्यांनात्यंतम
भेदस्तेनैवहेतुद्वयेनेत्यर्थः नन्वेवमात्मेवेदमित्यादिश्रुतीनांकागतिरितितत्राह अन्यपरत्वमविवेकानांतत्र अविवे
कानांअविवेकपुरुषान्प्रतितत्राद्वैतेन्यपरत्वमुपासनार्थकानुवादइत्यर्थः लोकेहिशरीरशरीरिणोर्भोग्यभोक्त्रोश्चा
विवेकेनाभेदोव्यवह्रियतेऽहंगौरोममात्माभद्रसेनइत्यादिः अतस्तमेवव्यवहारमनूद्यतानेवंप्रतितथोपासनाश्रु
तिर्विदधातिसत्वशुध्याद्यर्थमितिअतएवपरमार्थदशायामुपास्यानामात्मत्वंप्रतिषेधतिश्रुतिः यन्मनसानमनुते
येनाहुर्मनोमतंतदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासतइत्यादिनेतिअद्वैतवादिनांजगदुपादानकारणमपिनेसंभव
तीत्याहनात्मानाद्यविद्यानोभयंजगदुपादानकारणंनिःसंगत्वात् केवलआत्मा आत्माश्रितावाविद्यासमुच्चितंवा
कपालद्वयंतदुभयंनजगदुपादानंसंभवति आत्मनअसंगत्वात्संगाख्योहियः संयोगविशेषस्तेनचद्रव्याणां
विकारोभवति अतोसंगत्वात्केवलस्यात्मनोद्वितीयस्यनोपादानत्वंनाप्यविद्याद्वारापिसंभवतिअसंगत्वेनावि
द्यायोगस्यप्रागेवनिरस्तत्वात् अविद्याया अद्रव्यत्वेनद्रव्योपादानत्वायोगाच्चद्रव्यत्वेतयैवद्वैतप्रसंगाच्च किंचा
विद्यायाःउपादानत्वंक्वाप्यदृष्टंशुक्तिरजतादिस्थलेस्वाविद्यानिमित्तत्वमिष्यते मनएवोपादानंतद्धेतोः संस्कारस्यमनो
धर्मत्वादितिप्रत्येकोपादानत्ववदेवोभयोपादानत्वमप्यसंगत्वादेवसंभवतीत्यर्थः ब्रह्ममीमांसायांत्वविद्याद्व्यरूपापुरु
षाश्रितागगनेवायुवदिष्यते नादृशाविद्याद्वाराच्चब्रह्मणोधिष्ठानकरणत्वमेवास्माकमस्माभिरप्यनुमन्यतेअस्मदुक्तप्र
कृतेरेवतैरविद्यात्वेनपरिभाषणात् आत्मार्थतयाप्रपंचस्यात्मन्येवाधिष्ठानेप्रकृत्युपादानकत्वस्वीकारसाम्याच्च
विशेषस्त्वयमेवयत्ते ःसंकल्पपूर्विकाप्रकृतेरपिप्रवृत्तिरिष्यतेअस्माभिस्तुनेति तैश्चोक्तमविभागेनाद्वैतमस्मा
कमपीष्टमेवसदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमित्यादिश्रुत्यापिचाविभागरूपमेवाद्वैतंप्रतिपाद्यतेन
तुनद्वितीयमस्तिततोन्यद्विभक्तंयत्पश्येदितिश्रुत्यंतरात्तथाचोक्तं आसीत् ज्ञानमनर्थाय एकमेवाविकल्पितं त
योरेकतयोद्युर्यः प्रकृतिश्चोभयात्मिका ज्ञानंतन्यत्तमोभावः पुरुषः सोभिधीयतइतिअविकल्पितमविभक्तं त २२

स्मादिदंतानामखंडाद्वैतंनार्थः नापिसाक्षादेवब्रह्मणउपादानत्वंतथाप्याधुनिकावेदांतिनामत्रत्यपूर्वपक्षाजातमेवब्रह्म
मीमांसासिद्धांतयाकल्पयंतिब्रह्मसूत्रानुक्तत्वेनप्रत्युक्तंतद्विरोधनचास्माभिस्तत्रैवनिराकृतमिति अत्रचब्रह्ममीमां
सासिद्धांतीनइष्यतेअपितुवेदांतिषापातत्तः संभावितोर्थएवनिराक्रियतइतिस्मर्तव्यंएवमुत्तरसूत्रेष्वपिप्रकाशस्वरूप
आत्मातिस्वयंसिद्धांतितं तत्रविज्ञानमानंदंब्रह्मेतिश्रुतेरानंदोप्यात्मनः स्वरूपमितिपूर्वपक्षंनिराकरोति नैकस्यानंद
चिद्रूपत्वेद्वयोर्भेदात् एकधर्मिणिआनंदचैतन्योभयस्वरूपत्वंनभवतिदुःखज्ञानकालेसुखाननुभवेनसुखज्ञानयोर्भेदा
दित्यर्थः नचज्ञानविशेषः सुखमितिवक्तुंशक्यते आत्मत्वरूपज्ञानस्याखंडत्वात् अतएवचैतन्यानुभवकालेसु
खस्यावरणमपिवक्तुंनशक्यते अखंडकत्वेनानंदावरणेदुःखज्ञानामीत्यननुभावानुपपत्तेः नह्यात्मनोंशभेदोस्ति
येनानंदांशावरणेपिचैतन्यांशाभयादितिनचस्रक्चंदनाद्याकारबुद्धिवृत्त्यभिव्यक्तंचैतन्यमेवसुखमितिवाच्यं
शीताद्यातीनामपितत्रसुखत्वप्रसंगात् मोक्षेसुखाभ्युपगमविरोधाच्चकिंचैवंक्षुत्पिपासाद्याकारवृत्त्यभिव्यक्तचै
तन्यस्यैवदुःखत्वापत्त्यादुःखस्वरूपत्वमप्यात्मनःप्रसज्येतयुक्तिसाम्यादित्यादीन्यत्रदूषणानिस्वयमूहनीयानि
पदापिकश्चिदाह चैतन्यग्रहकालेसुखमपिनियमेनगृह्यतएवसुखज्ञानत्वविधया आरेतंतदप्यसत् ज्ञानेच्छाकृ
त्यादीनां अज्ञातसत्वस्यक्वाप्यदर्शनेनादृष्टकल्पनापत्तेः आनंदंब्रह्मणोविद्यान्नबिभेतिकुतश्चनेत्यादिश्रुत्युक्ता
नांआनंदज्ञानफलानांसर्वेषुपुरुषेषुसदैवप्रसंगाच्चसंस्काराद्यज्ञानेपिसंस्कारादिफलवत्स्वकार्येस्वगोचरज्ञानस्य
प्रतिबंधकताया क्वाप्यदृष्टत्वादित्यप्यत्रदूषणानि नचश्रुतिबलेनैतेसत्तद्दोष इतिवाच्यंनानंदंननिरानंदमित्यादिश्रु
त्याऽदुःखमसुखंब्रह्मभूतभव्यभवात्मकमित्यादिस्मृत्याचानंदाभावस्यापिप्रतिपादितत्वेनतस्यैवात्रादरणीयत्वा
त् निषेधश्रुतेरेवबलवत्त्वश्रुत्यर्थोक्तत्वाच्चअन्यथासत्यसंकल्पत्वादिश्रुतिभिरात्मनइच्छादिधर्माणामपिप्रसंगादि
ति नन्वेवमानंदरूपताश्रुतेः कागतिस्तत्राह दुःखनिवृत्तेर्गौणः दुःखनिवृत्त्यात्मनिश्रौतआनंदशब्दोगौणइत्यर्थः
गुणश्चात्रपरमप्रियत्वंतथाप्रियःपुत्रादिश्रुतियुक्त्यनुभवैरात्मनः परमप्रियत्वसिद्धेरितिभावः तदुक्तं सुखदुःखसु
खात्ययइतिननिरानंदनामितिश्रुतिस्त्वौपाधिकानंदपरासत्यसंकल्पत्वादिश्रुतिवत् आनंदात्मनोःस्वस्वामिभाव

119
1990

सां०भा०
२३

संबंधपरावाननिर्धनइतिवद्दितियत्तुनिरुपाधिप्रियत्वेनात्मनःसुखरूपत्वानुमानंकश्चिदाहतत्रदुःखारूपेप्रभोविता
याअपिप्रेमोपपत्तेःसुखत्वादिवदात्मत्वस्यापिप्रेमप्रयोजकत्वाच्च अन्यथापरमसुखेपिप्रेमापत्तेरिति गौणप्रयो
गेबीजमाह विमुक्तिप्रशंसामंदानां मंदानांज्ञानंप्रतिदुःखनिवृत्तिरूपामात्मस्वरूपमुक्तिंसुखत्वेनश्रुतिस्तौतिप्र
रोचनार्थमित्यर्थः अंतःकरणोत्पत्तेःपूर्वोक्ताया आजस्यनोपपत्तये मनोवैभवपूर्वपक्षमपाकरोति नव्यापकत्वं
मनसःकरणत्वादिंद्रियत्वाद्वा मनसोंतःकरणसामान्यस्यनविभुत्वंकरणत्वाद्वास्यादिवत् वाशब्दोव्यवस्थितवि
कल्पइंद्रियत्वाद्यंतःकरणस्यविशेषस्यतृतीयस्यनविभुत्वमित्यर्थः देहव्यापिज्ञानादिकंतुमध्यमपरिमाणे
नैवोपपद्यतइति अत्राप्रयोजकत्वशंकायामनुकूलतर्कमाह सक्रियत्वइतिश्रुतेः आत्मनोलोकांतरगमनश्र
वणेनतदुपाधिभूतस्यांतःकरणस्यसक्रियत्वेसिद्धेनविभुत्वंसंभवतीत्यर्थः कार्यत्वोपपत्तयेमनसोनिरवयवत्वम
पिनिराकरोति ननिर्भागत्वंतद्योगात्घटवत् तच्छब्दःपूर्वसूत्रस्थेंद्रियंपरामृशतिमनसोननिरवयवत्वंमनेकेंद्रि
यैकदायोगात् किंतुघटवन्मध्यमपरिमाणंसावयवमित्यर्थः कारणावस्थांतःकरणमण्वेवेतिबोध्यं मनः
कालानांनित्यत्वंप्रतिषेधति प्रकृतिपुरुषयोरन्यत्सर्वमनित्यं सुगमंकरणावस्थांतःकरणाकाशादिकंप्रकृति
रेवोच्यतेनबुध्यादिकंव्यवसायाद्यसाधारणधर्माभावात् ननुमायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरं अस्यावय
वभूतैस्तुव्याप्तंसर्वमिदंजगदित्यादिश्रुतिभिः पुंप्रकृत्योरपिसावयवत्वादनित्यत्वमितितत्राह नभागलाभोभागि
नोनिर्भागत्वश्रुतेः प्रकृतिपुरुषविषयेभागिनोभागलाभोवयवावयविभावोनयुज्यतेनिरवयवत्वश्रुतेर्निष्कलं
निष्क्रियंशांतंनिरवद्यंनिरवयवंनिरंजनमित्यादिनेत्यर्थः उक्तश्रुतिश्चाकाशजलयोरिवपितापुत्रस्ययोरिवच
विभागमात्रेणांशांशिभावंनिरंजनमित्यादिबोधयतीति दुःखनिवृत्तिर्मोक्षइत्युक्तंतदवधारणायतत्रमोक्षेप
रेषांमतानिनिराकरोति नानंदाभिव्यक्तिर्मुक्तिर्निर्धर्मत्वात् आत्मनिआनंदरूपोऽभिव्यक्तिरूपश्चधर्मोना २३
स्तिस्वरूपंचनित्यमेवेतिनसाधनसाध्यमतोनानंदाभिव्यक्तिर्मोक्षइत्यर्थः आनंदाभिव्यक्तिश्चब्रह्मलोकादौगो
णीमुक्तिरेवेतिभावः अन्यथाविद्वान्हर्षशोकौजहातीतिश्रुतिविरोधात् किंचाभिव्यक्तेरात्मधर्मत्वेपिसाकिंनि

121
1990

वेनानाविधसहचाराणांव्याप्तिग्रहेनानुगमदोषःसमानएव पंचावयवयोगात्सुखादिसिद्धिरिति यदुक्तं तदुपपा
दनायव्याप्तिनिर्वचनेनानुमानप्रामाण्यबाधकमपास्तमिदानींपंचावयवरूपशब्दस्यज्ञानजनकत्वोपपत्तयेशब्द
शक्त्यादिनिर्वचनेनतदनुपपत्तिरूपंशब्दप्रमाण्येपरेषांबाधकमपास्तंवाच्यवाचकभावःसंबंधःशब्दार्थयोः
अर्थेवाच्यताख्याशक्तिरस्तिसैवतयोःसंबंधोनुयोगितावत् तज्ज्ञानाच्छब्देनार्थोपस्थितिरित्यर्थः शक्तिग्राहकार
ण्याह त्रिभिःसंबंधसिद्धिः आप्तोपदेशोवृद्धव्यवहारः प्रसिद्धपदसामानाधिकरण्यमित्येतैस्त्रिभिरुक्तसंबंधोग
ह्यतइत्यर्थः नकार्येनियमःउभययादर्शनात् सचशक्तिग्रहःकार्यएवभवतीतिनियमोनास्तिलोकेकार्यवदकार्येपि
वृद्धव्यवहारादिदर्शनादित्यर्थः यथाहिगामानयेत्यादिकार्यपरवाक्याद्वृद्धस्यगवानयनादिव्यवहारोदृश्यतेएवमेवपुत्र
जातइत्यादिसिद्धपरवाक्यादपिपुलकादिव्यवहारोदृश्यतइति सिद्धार्थेशब्दप्रमाण्यासिद्धौविवेकेवेदांतप्रामाण्यं
सिद्धमित्याशयः ननुभवतुलोकेसिद्धेशक्तिग्रहःअर्थप्रत्यक्षादिदर्शनात् वेदेतुकथंभवितिथंअकार्यबोधनवैयर्थ्या
दितितत्राह लोकेव्युत्पन्नस्यवेदार्थप्रतीतेः लोकेशब्दशक्तिव्युत्पन्नस्यपुरुषस्यतदनुसारेणैववेदार्थप्रतीतितः
नहिलोकेशक्तिभिन्नावेदेचभिन्नायएवलौकिकास्तएववैदिकाइतिन्यायात् अतोलोकेसिध्यार्थपरत्वसिद्धौवेदे
पितत्सिध्यतीत्यर्थः सिद्धविवेकप्रतिपादनस्यचाविद्यानिवृत्तिद्वारामोक्षःफलंयथालोकेपुत्रस्तेजातइत्यादि
प्रतिपादनस्यहर्षादिःफलमितिनतद्वैयर्थ्यं अत्रशंकते नत्रिभिरपौरुषेयत्वाद्वेदस्यतदर्थस्यातींद्रियत्वात् ननु
त्रिभिराप्तोपदेशादिभिर्वेदशब्देनशक्तिग्रहःसंभवतिवेदस्यापौरुषेयत्वेनतदर्थेह्याप्तोपदेशाभावात् तथावेदा
र्थस्यातींद्रियतयातत्रवृद्धव्यवहारस्यप्रसिद्धपदसामानाधिकरण्यस्यचगृहीतुमशक्यत्वादित्यः तत्रातींद्रियार्थ
त्वमादौनिराकरोति नयज्ञादेःस्वरूपतोधर्मत्वंवैशिष्ट्यात् यदुक्तंतत्रयत्नोदेवतोद्देश्यकद्रव्यत्यागादिरूपस्यय
ज्ञदानादेःस्वरूपतएवधर्मत्वंवेदविहितत्ववैशिष्ट्यादलौकिकफलकत्वात् यज्ञादिकंचेष्टादिरूपत्वान्नातींद्रियंन
तुयज्ञादिविषयकापूर्वस्यधर्मत्वंयेनवेदविहितस्यातींद्रियतास्यादित्यर्थः ननुदेवतायातींद्रियार्थघटितत्व
मस्तीतिकेचित् नअतींद्रियेष्वपिपदार्थतावच्छेदकेनसामान्यरूपेणप्रतीतेर्वक्ष्यमाणत्वादितियच्चोक्तमपौरुषे

सां० प्रा०
२०

यत्वानाप्तोपदेशाभावइतिनदपिनिराकरोति निजशक्त्यभिव्यक्त्यावच्छिद्यते अपौरुषेयत्वेपिवेदानांस्वाभाविकीयार्थेषु
शक्तिरस्तिशीवांते:वृद्धपरंपराभिस्तुतस्याअस्यशब्दस्यामर्थइत्येवंरूपयाव्यवच्छिद्यतेशिष्येभ्योर्थांतराद्यावृत्त्योपदि
श्यतेनत्वाधुनिकशब्दवत्स्वयंसंकेत्यतेयेनपौरुषेयत्वापेक्षास्यादित्यर्थः ननुतथाप्यतीन्द्रियदेवताफलादिषुकथंश
क्तिग्रहोवैदिकादीनांस्यात्तत्राह योग्यायोग्येषुप्रतीतिजनकत्वास्यानुमासिद्धत्वात् विशेषस्त्वतीन्द्रियोपूर्वएवरव्या
र्थानचतस्यग्रहणंप्रागपेक्ष्यतइत्यर्थः शब्दप्रमाण्यप्रसंगेनैवशब्दगतंविशेषमवधारयति ननित्यत्वंवेदानांका
र्यत्वश्रुतेः सतपोतप्यततस्मात्तपस्तेपानात्त्रयोवेदाअजायंतेत्यादिश्रुतेर्वेदानामनित्यत्वमित्यर्थः वेदनित्यता
वाक्यानिचसजातीयानुपूर्वीप्रवाहानुच्छेदपराणितर्हिकिंपौरुषेयावेदानेत्याह नपौरुषेयत्वंतत्कर्तुःपुरुषस्याभावा
तईश्वरप्रतिषेधा सुगमं अपरःकर्ताभवत्वित्याकांक्षायामाह मुक्तामुक्तयोग्यत्वात् जीवन्मुक्तधुरीणोविष्णुर्विशुद्ध
सत्वतयानिरतिशयसर्वज्ञोपिवीतरागत्वात्सहस्रशाखवेदनिर्माणायोग्यः अमुक्तस्त्वसर्वज्ञत्वदेवायोग्यइत्यर्थः
नचासंख्यप्राणिपालनादिव्यापारवदेवासंख्यवेदनिर्माणमप्युपपद्यतामितिवाच्यंस्वयंस्फुरद्वेदेभ्योऽर्थप्रतीत्यैव
पालनादिषुप्रवृत्तेः नन्वेवमपौरुषेयत्वान्नित्यत्वमेवागतंतत्राह नापौरुषेयत्वान्नित्यत्वमंकुरादिवत् स्वयं
नन्वंकुरादिष्वपिकार्यत्वेनघटादिवत्पौरुषेयत्वमनुमेयंतत्राह तेषामपितद्योगेदृष्टबाधादिप्रसक्तिः यत्पौरुषे
यंतच्छरीरजन्यमितिव्याप्तिर्लोकेदृष्टातस्याबाधादिदेवंसतिस्यादित्यर्थः मन्वादिपुरुषोच्चरितत्वाद्वेदाअपिपौरुषे
याएवेत्यतआह यस्मिन्नदृष्टेपिकृतबुद्धिरुपजायतेतत्पौरुषेयं दृष्टइवादृष्टेपियस्मिन्वस्तुनिकृतबुद्धिर्बुद्धिपूर्व
कत्वबुद्धिर्जायतेतदेवपौरुषेयमितिव्यवह्रियतइत्यर्थः एतदुक्तंभवतिनपुरुषोच्चरितत्वमात्रेणपौरुषेयत्वंश्वा
सप्रश्वासयोः सुषुप्तिकालीनयोःपौरुषेयत्वव्यवहाराभावात् किंतुबुद्धिपूर्वकत्वेनवेदास्तुनिश्वासवददृष्टव
शात्अबुद्धिपूर्वकाएवस्वयंभोःसकाशात्स्वयंभवंति अतोनपौरुषेयातथाचश्रुतिः तस्यैतस्यमहतोभूतस्यनिः
श्वसितमेतद्यदृग्वेदइत्यादिरिति नन्वेवंयथार्थवाक्यार्थज्ञानापूर्वकत्वात्शुकवाक्यस्येववेदानामपिप्रामाण्यंनस्या
त्तत्राह निजशक्त्यभिव्यक्तेःस्वतःप्रामाण्यं वेदानांनिजास्वाभाविकीयायथार्थज्ञानजननशक्तिः तस्यामंत्रायुर्वेद २०

123/1990

दाभिव्यक्तेरुपलंभादखिलवेदानामेवस्वतएवप्रामाण्यंसिध्यतिनवक्तृयथार्थज्ञानमूलकत्वादिनेत्यर्थः अथाचस्याय
सूत्रं मंत्रायुर्वेदवद्प्रामाण्यंनचतत्प्रमाण्यमिति गुणादीनांचनात्यंतबाधइतिप्रतिज्ञायांन्यायेनसुखादिसिद्धेरिस्य
कोहेतुरुपन्यस्तःप्रपंचतश्चसांप्रतंतस्यामेवहेत्वंतरमाह नासतःख्यानंनृशृंगवत् आस्तांतावत्संचावयवेनसुखा
दिसिद्धिः ज्ञानमात्रादपितत्सिद्धिः अत्यंतासत्वेसुखादीनांज्ञानमेवनोपपद्यतेनृशृंगादीनामभावादित्यर्थः
तथाचब्रह्मसूत्रंनाभावउपलब्धेरितिजगत्नाभावोनासत् उपलब्धेरितितस्यार्थः शुक्तिरजतस्वप्नमनोरथादे
श्चमनः परिणामरूपएवार्थः प्रतीयते नात्यंतासंनितिवक्ष्यते नन्वेवंगुणादिरत्यंतसन्नेवभवतुतथाचनात्यंत
बाधइत्यत्रात्यंतपदवैयर्थ्यमितितत्राह नसतोबाधदर्शनात् अत्यंतस्यसतोपिगुणादेःख्यानंभानंनयुक्तंपरि
णामितयापूर्वपूर्वधर्मैःप्रतिक्षणंबाधदर्शनात् चैतन्यभासमानस्यजगतश्चैतन्यएवबाधदर्शनाच्चवाचारंभ
णंविकारोनामधेयंमृत्तिकेत्येवसत्यं अथातआदेशोनेतिनेतिनेहनानास्तिकिंचनयत्रदेवानदेवाऽमातानमेत्या
दिश्रुतिभिन्यायेत्यर्थः नन्वेवमपिसदसद्भ्यांभिन्नमेवजगत्भवतुतथाप्यत्यंतबाधप्रतिषेधानुपपत्तिरितित
त्राह नानिर्वचनीयस्यतदभावात् सत्वेनासत्वेनचानिर्वचनीयस्यापिभानंनघटतेतदभावात्सदसद्भिन्नवऽ
स्त्वप्रसिद्धेरित्यर्थः दृष्टानुसारेणवकल्पनौचित्यादितिभावः यातुनासद्रूपानसद्रूपामायानैवोभयात्मिकासद
सद्भ्यामनिर्वाच्यामिथ्याभूतवासनावनीतिस्मृतिः तस्याअयमर्थः मायाप्रकृतिःसकार्यासत्त्रयनिरस्तप्रकारत्र
यरूपानभवति किंतुसदसद्भ्यामनिर्वाच्याअनिर्धार्यासदेवेत्यसदेतिवैवानिर्धार्यावक्तुमशक्यायतोमिथ्याभू
ताप्रतिक्षणमन्यथात्वंगच्छति अथचसनातनीस्वरूपतोनित्यासदसद्रूपेतियावदितिदृश्यमेवप्रधानस्यसत्कार्य
स्यनिःसतासत्वंयोगभाष्येप्रोक्तमितिनन्वेवंकिमन्यथाख्यातिरेवेष्टानेत्याह नान्यथाख्यातिः स्ववचोव्याघातात्
अन्यद्वस्तुवस्त्वंतररूपेणभासतेनपुनरसतोभानमित्यपिनयुक्तंस्ववचोव्याघातात् असंनभासतेसन्निकर्षाद्यभा
वादितिस्वसिद्धांतव्याघात् असतःसंबंधस्यभानाप्युपगमादित्यर्थः यदिचसंबंधोप्यन्यत्रसन्नेवभासतइत्युच्य
तेतथापिविशेष्यविशेषणानुयोगिकत्वयोः ग्रहेसतव्याप्तिःतदग्रहे चशुक्तिरजतत्वसमवायानांशृंखलानामेवभा

नापत्यास्मदभिप्रेतविवेकाग्रह एवपर्यवसानमित्यन्यथाख्यातिवचोव्याघातएवविशिष्टभ्रमस्यैवान्यथाख्यातिशब्दार्थ
त्वादिति अपिचज्ञानस्यार्थव्यभिचारित्वेज्ञानेनार्थसिद्धिर्नस्यात्स्ववचोपिव्याहन्येत तदुक्तं ज्ञानस्यव्यभिचारित्वेविश्वा
सः किंनिबंधनइतिएतदुपपद्यर्थंकल्पनासहस्रेतुकल्पनागौरवेणलाघवात्संसर्गाग्रहएवोभयसिद्धोव्यवहारहेतुतया
कल्पयितुंयुक्तइतिकिंचज्ञानत्वाविशेषेणज्ञानयोर्बाध्यबाधकभावेनियामकाधर्मावश्चेतिदिक् नात्यंतबाधइतिपूर्वो
क्तंविवरण्वानएवस्वसिद्धांतमुपहरति सदसत्ख्यातिरेवसर्वेषांगुणादीनांकुतः बाधाबाधात्तत्रस्वरूपेणाबाधसर्व
वस्तूनांनित्यत्वात्संसर्गतस्तुबाधः सर्ववस्तूनांचैतन्येस्तियथाशुक्त्यादौबुद्धिस्थरजतादेः स्फटिकादिषुवालोहि
त्यादेस्तद्वत्तथाअवस्थाभिरपिबाधोखिलपरिणामिनोप्रकृतिकालादिष्वित्यर्थः बाधश्चप्रतिपन्नधर्मिणिनि
षेधबुद्धिविषयत्वं असत्वंतुत्तुच्छाभावःसोप्यधिकरणस्वरूपइतिनचसदसत्वयोर्विरोधइतिवाच्यंप्रकारभेदेनाविरो
धात् यथाहिलौहित्यंबिंबरूपेणसत्स्फटिकगतंप्रतिबिंबरूपेणाचासदितिदृष्टंयथावारजतंवणिग्वीथीस्थरूपे
णसत्शुक्त्याध्यस्तरूपेणाचासत्तथैवसर्वंजगत्स्वरूपतः सत्चैतन्यादावध्यस्तरूपेणचासदितितदुक्तं अर्थेह्य
विद्यमानेपिसंसृतिर्नविनिवर्तते ध्यायतोविषयानस्यस्वप्नेनर्थागमोयथेति एवमेवावस्थाभेदेनापिसदसत्वमविरु
द्धंयथाहिघटकादिः प्ररूढाद्यवस्थाभिः सत्ताकालेप्यंकुराद्यवस्थाभिरसन्भवतितथैवप्रकृत्यादिकंसदसदात्मकमि
तितदुक्तंनित्यदाह्यंगभूतानिभवंतिनभवंतिचकालेनालक्ष्यवेगेनसूक्ष्मत्वान्नतद्दृश्यतइतिएतत्सूत्रोक्तंचप्रपंच
स्यसदसत्वंस्मर्यते अव्यक्तंकारणंयत्तन्नित्यंसदसदात्मकं प्रधानंप्रकृतिश्चेतिमदाहुस्तत्वचिंतकाइतिएतद्वास्मा
भिर्ब्रह्ममीमांसाभाष्येयोगवार्तिकेचप्रपंचितमितिदिक् अनेनचसूत्रेणासंसर्गाग्रहेविशेषोनोक्तः असंसर्गा
ग्रहविषयस्यरजतादेः सदसद्रूपत्वमेवासिद्धांतितमितिमंतव्यं अर्थविचारः पर्यसइदानींशब्दविचारप्रसंगाग
तमन्यदागंतुकतयाअंतेप्रस्तूयते प्रतीत्यप्रतीतिभ्यांनस्फोटात्मकःशब्दः प्रत्येकवर्णेभ्योतिरिक्तंकलशइत्या
दिरूपमखंडमेकंपदंस्फोटइतियोगैरभ्युपगम्यतेकंबुग्रीवाद्यवयवेभ्योऽतिरिक्तोघटाद्यवयवीवएकोघट २१
इतिवत्एकंपदमित्यनुभवात्वर्णानामाशुविनाशितयामेलनाभावेनार्थप्रत्यायनशक्तिरितिव्यर्थकत्वासंभवा

125/1990

त्वाअनित्यावाआद्येसिद्धत्वेनापुरुषार्थत्वं अंत्येजन्यभावस्यविनाशितयामोक्षस्यनाशापत्तिस्तस्मादानंदाभिव्यक्तिर्मुख्य
मोक्षइतिनवीनवेदांतिभ्रमेणापिसिद्धांतएवेतिदिक् नविशेषगुणोच्छित्तिरपिनमुक्तिस्तद्वत्तन्निधर्मत्वादेवेत्यर्थः ननुतर्हि
प्रधानगुणोदुःखनिवृत्तिरेवकथंमोक्षउक्तः दुःखस्यापिधर्मत्वादितिचेत् नअस्माभिर्भोग्यतासंबंधेनैवदुःखाभा
वस्यपुरुषार्थतावगमादिति नविशेषगतिर्निष्क्रियस्य अत्लोकगतिरपिनमोक्षआत्मनोनिष्क्रियत्वेनगत्यभावा
त्लिंगशरीराभ्युपगमेचनमोक्षोघटतइत्यर्थः नाकारोपरागोच्छित्तिः क्षणिकत्वादिदोषात् क्षणिकज्ञानमेवात्मात
स्यविषयाकारतावंधस्तद्वासनास्योपरागस्यनाशोमोक्षइतियन्नास्तिकमतंतदपिनक्षणिकत्वादिदोषेणआकारो
च्छित्तिकालेआकारिणोप्युच्छेदादित्यर्थः नास्तिकस्यैवमुक्त्यंतरंदूषयति नसर्वोच्छित्तिरपुरुषार्थत्वादिदोषात् ज्ञान
रूपस्यात्मनः सामग्र्येणोच्छित्तिरपिनमोक्षः आत्मनाशस्यलोकेपुरुषार्थत्वादर्शनादिभ्यइत्यर्थः एवंह्यन्यमपि ज्ञा
नज्ञेयात्मकाखिलप्रपंचनाशोप्येवमात्मनाशेनापुरुषार्थत्वान्नमोक्षइत्यर्थः संयोगाश्चवियोगांताइतिनदेशादिलाभो
पिप्रकृष्टदेशधनांगनादिस्वाम्यमपिनमोक्षोयतः संयोगाश्चवियोगांतामरणांतंचजीवनमितिश्रूयतइत्यर्थः तथच
विनाशित्वात्स्वाम्यंनमुक्तिरिति नभागियोगोभागस्य भागस्यांशस्यजीवस्यभागिन्यंशिनिपरमात्मनिलयोनमोक्षः
संयोगाहिवियोगांताइत्युक्तहेतोरीश्वरानभ्युपगमाच्चतथात्वयत्वस्यापुरुषार्थत्वाच्चसुखदुःखाभावयोरेवस्वतः
पुरुषार्थत्वादित्यर्थः नाणिमादियोगोप्यवश्यंभावित्वात्तदुच्छित्तेरितरयोगवत् अणिमाद्यैश्वर्यसंबंधोपिनमुक्तिः
ऐश्वर्यांतरसंबंधवदेवतस्याप्युच्छेदनियमादित्यर्थः इतरवियोगवदितिपाठेतूच्छित्तावयंदृष्टांतः नेंद्रादिपदयोगोपित
द्वत् इंद्राद्यैश्वर्यलाभोपिनमुक्तिरितरैश्वर्यवत् क्षयिष्णुत्वादित्यर्थः इंद्रियाणामाहंकारिकत्वंयदुक्तंतत्रपरविप्रति
पत्तिंनिराकरोति नभूतप्रकृतित्वमिंद्रियाणामहंकारिकत्वश्रुतेः सुगमंयोजनापूर्वंचैतद्व्याख्यातंपूर्वं स्वसिद्धांतो
पपत्तेः अस्मिंश्चाध्यायेपरपक्षोनिराक्रियतइत्यपौनरुक्त्यंशक्त्यादिकमपितत्वमस्तीत्याशयेनपरेषांपदार्थप्रतिनि
यमंतन्मात्रज्ञानान्मुक्तिंचनिराकरोति नषट्पदार्थनियमस्तद्बोधान्मुक्तिः प्रकाश्येयादृशंरूपंप्रकाशस्यामलंभ
वेत् त्रिजगत्वमहंचेतिदृश्येसत्तामुपागते दृष्टुःस्यात्केवलीभावस्तादृशोविमलात्मनइति स्फाटिकस्यत्वमिव

सुषुप्तिसुषुप्तिवृत्तिसंबंधकालेतुपरिछिन्नचिद्रूपत्वेनाभिव्यक्तस्यापरिछेदाभिमानः तथावृत्तिप्रतिबिंबवशाद्दुःखादिमालि
न्यमिवभवतीतितस्मर्वमौपाधिकमेवउपाध्योरव्यानिभित्तान्वयव्यतिरेकानुविधानात् स्फटिकलौहित्यवदितिभावः त
थाचयोगसूत्रंवृत्तिसारूप्यमितरत्रेतिअस्मच्छास्त्रेचब्रह्मशब्दऔपाधिकपरिछेदमालिन्यादिराहितःपूर्णचेतनसामा
न्यवाचीनतुब्रह्ममीमांसायामिवैश्वर्योपलक्षितपुरुषविशेषमात्रवाचीतिविवेक्तव्यंअत्रेतश्लोकाःशिष्यस्युत्पत्त्यर्थमुच्य
तेचिदाकाशानभिव्यक्तनानाकारैरितस्ततः धीरदंतीसहव्यक्तैरटंतीदर्शयेक्षितिं वस्त्वकवस्तुसदापूर्णमेकरूपंचविन्न
मः वृत्तिशून्यप्रदेशेषुदृश्याभावान्नपश्यति चक्षुषारूपवर्त्मसौदृश्याशक्तिर्हिनेतरत् समाध्यादौचसानास्तीत्यतःपू
र्णः पुमांस्तदेतिमोक्षादिकालीनंचपुरुषस्वरूपंवाशिष्ठेप्रदर्शितं असंभवतिसर्वत्रादिकंभूस्याकाशरूपिणी प्रकाश्य
यादृशंरूपंप्रकाशस्यामलंभवेत् त्रिजगत्त्वमहंचेतिदृश्येसत्तामुपागते द्रष्टुस्यात्केवलीभावस्तादृशोविमलात्मनइ
ति तर्हिकःसुषुप्तिसमाधिभ्यांमोक्षस्यविशेषस्तत्राह द्वयोःसबीजमन्यत्रतन्निवृत्तिः द्वयोःसमाधिसुषुप्त्योःसबी
जत्वंबंधबीजवासनादिसहितंब्रह्मत्वंअन्यत्रमोक्षेबीजस्याभावइतिविशेषइत्यर्थः ननुचेत्समाध्यादौबंधबीजमस्ति
तर्हितत्रैवपरिछेदात्कथंब्रह्मत्वमितिचेन्नबंधबीजस्यवासनाकर्मादेस्तदानीमुपाधावेवावस्थानात् नतुचेतनेपुरु
षएवतेषामप्रतिबिंबनादिति जाग्रदाद्यवस्थायांतुबुद्धिवृत्तिप्रतिबिंबवशादौपाधिकबंधइतिचेन्नपूर्वासंप्रज्ञातेक्र
मेणबीजस्तयोभवतीत्याशयेनैवतत्रनिर्बीजउक्तः अत्रकथंसबीजत्ववचनात्चरमात्तंप्रज्ञातस्यैवतुमुख्यानिर्बीजत्वा
त् अन्यथासर्वासामेवासंप्रज्ञातव्यक्तीनांनिर्विजत्वेव्युत्थानानुपपत्तेरिति ननुसमाधिसुषुप्त्यौदृष्टेस्तःमोक्षेतुकिंप्रमा
णमितिनास्तिकाक्षेपंपरिहरति द्वयोरिवत्रयस्यापिदृष्टत्वान्नतुद्वौ समाधिसुषुप्तिदृष्टांतेनमोक्षस्यापिदृष्टत्वादनु
मितत्वान्नतुद्वौसुषुप्तिसमाधीएवकिंतुमोक्षोप्यस्तीत्यर्थः अनुमानंचेत्थंसुषुप्त्यादौयोब्रह्मभावस्तत्त्यागश्चित्तग
ताद्रागादिदोषादेवभवतिसचेद्दोषोज्ञानेनवा शितस्तर्हिसुषुप्त्यादिदृश्येवानस्थाश्चिराभवतिसैवमोक्षइति ननुवा
सनाख्यबीजसत्वेपिवैराग्यादिनावासनाकोंछादृर्थाकारवृत्तिः समाधौमाभवतुसुषुप्तौतुवासनाप्रावल्यादर्थज्ञा
नंभविष्यत्येवेतिनसुषुप्तेब्रह्मरूपतायुक्तेतितत्राह वासनयानस्वार्थख्यापनंदोषयोगेपिनिमित्तस्यप्रधानबाधत्वं २४

यथावैराग्येतथानिद्रादोषयोगेपिसतिवासनयानस्वार्थख्यापनंतन्नभवतीत्यर्थः संस्कारलेशतोजीवन्मुक्तस्यशरीरधा
रणमितितृतीयाध्यायेप्रोक्तंतत्रायमाक्षेपः नस्वविषयस्मरणंभवतिप्रत्येतानिमित्तस्यगुणीभूतस्यसंस्कारस्यबलवत्त्व
रनिद्रादोषबाधकत्वंसंभवतीत्यर्थः बलवत्तरएवहिदोषोवासनादुर्बलांस्वकार्यकुंठांकरोतीतिभावः वासनयेतिपाठ
वासनयाप्यल्परूपस्यस्वार्थख्यापनंतन्नभवतीत्यर्थः स्वसंस्कारलेशतोजीवन्मुक्तस्यशरीरधारणमितितृतीयाध्याये
प्रोक्तंतत्रायमाक्षेपः जीवन्मुक्तस्यशश्वदेकस्मिन्नप्यर्थेऽस्मदादीनामिवभोगोदृश्यतेसोनुपपन्नः प्रथमभोगमुत्पा
द्येनपूर्वसंस्कारनाशात् आत्मज्ञानेनसर्वत्रोपेक्षयाचसंस्कारोत्पत्त्यसंभवात् गच्छतस्तृणस्पर्शवद्वात्मासक्तस्य
विषयभोगादितितत्राह एकःसंस्कारःक्रियानिवर्तकोनतुप्रतिक्रियासंस्कारभेदः बहुकल्पनाप्रसक्तेः येनसं
स्कारेणदेवादिशरीरभोगआरब्धःसएकएवसंस्कारस्तच्छरीरसाध्यस्यप्रारब्धभोगस्यसमापकः सतुकर्मवद्
भोगसमाप्तिनाश्यःनतुप्रतिक्रियंप्रतिभोगव्यक्तिसंस्कारनानात्वंबहुव्यक्तिकल्पनागौरवप्रसंगादित्यर्थः
कुलालचक्रभ्रमणस्थलेप्येवंवेगाख्यःसंस्कारएकएवभ्रमणसमाप्तिपर्यंतस्थायीबोध्यः उद्भिज्जशरीरमस्तीत्यु
क्तंतत्रबाह्यबुध्यभावाच्छरीरत्वंनास्तीतिनास्तिकाक्षेपमपाकरोति नबाह्यबुद्धिनियमोवृक्षगुल्मलतौषधिवन
स्पतितृणवीरुधादीनामपिभोक्तृभोगायतनत्वरूपं शरीरत्वंमंतव्यंयतःपूर्ववत्पूर्वोक्तोयोभोक्त्रधिष्ठानंविना
मनुष्यादिशरीरस्यपूतिभावः तद्वदेववृक्षादिशरीरेष्वपिशुष्कतादिकमित्यर्थः तथाचश्रुतिः अस्याशाखांजीवो
जहात्यथसाशुष्यतीत्यादिरितिनबाह्यबुद्धिनियमइत्यंशस्यपृथक्सूत्रत्वपक्षेपिसूत्रद्वयमेकीकृत्यैक्षमेवव्या
ख्येयंसूत्रभेदस्तुदैर्घ्यभयादितिबोध्यं स्मृतेश्च शरीरजैः कर्मदोषैर्यातिस्थावरतांनरः वाचिकैः पक्षिमृगतां
मानसैरंत्यजातितामित्यादिस्मृतेरपि वृक्षादिषुभोक्तृभोगायतनत्वमित्यर्थः ननुवृक्षादिष्वप्येवंचेतनत्वेनध
र्माधर्मोत्पत्तिप्रसंगस्तत्राह नदेहमात्रतःकर्माधिकारित्वंवैशिष्ट्यश्रुतेः नदेहमात्रेणधर्माधर्मोत्पत्तियोग्यत्वं
जीवस्यकुतः वैशिष्ट्यश्रुतेः ब्राह्मण्यादिविशिष्टत्वेनवाधिकारश्रवणादित्यर्थः देहभेदेनैवकर्माधिकारंदर्शयन्
देहत्रैविध्यमाह त्रिधात्रयाणांव्यवस्थाकर्मदेहभोगदेहोभयदेहाः त्रयाणामुत्तमअधममध्यमानांसर्वप्राणिनांत्रि

127/1990

सां०भा०
२५

प्रकारोदेहविभागः कर्मदेहभोगदेहोभयदेहाइत्यर्थः तत्रकर्मदेहः पुरुषार्णाभोगदेहइंद्रादीनांस्थावरादीनांचउभयदेहो
राजर्षीणामितिअत्रप्राधान्येनत्रिधाविभागः अन्यथासर्वस्यैवभोगदेहत्वापत्तेः चतुर्थमपिशरीरमाह नकिंचिदप्य
नुशयिनः विधादनुशयंद्वेधापश्चात्तापानुत्तापयोरितिवाक्यादनुशयोत्रवैराग्यंविरक्तानांशरीरमेतत्त्रयेणनकिंचिदपि
एतत्त्रयाविलक्षणमित्यर्थः यथादत्तात्रेयजडभरतादीनांतेषांज्ञानमात्रप्रधानदेहत्वादिति उक्तस्येश्वराभावस्यस्थापना
यपराभ्युपगतंज्ञानेच्छाकृत्यादिनित्यत्वंप्रतिषेधति नबुध्यादिनित्यत्वमाश्रयविशेषेपिवन्हिवत् बुधिरत्राध्यवसाया
ख्यावृत्तिः तथाचज्ञानेच्छाकृत्यादीनांनित्यत्वमाश्रयविशेषपरेश्वरोपाधितयाभ्युपगतेपिनास्तिअस्मदादिबुधिदृष्टांते
नसर्वेषामेवबुध्यादीनामनित्यत्वानुमानात् यथालौकिकवन्हिदृष्टांतेनावरणतेजसोप्यनित्यत्वानुमानमित्यर्थः आ
स्तांतावत्ज्ञानेच्छादिनित्यत्वंतदाश्रयईश्वरोपाधिरेवासिध्धईश्वरस्यासिधेरित्याह आश्रयासिध्धेश्च सुगमंनचैवं
ब्रह्मांडादिसर्जनसार्वज्ञादिकंकथंजन्यंसंभाव्यतामपिलोकेतप आदिभिरेवमैश्वर्यादिदर्शनादितितत्राह योगसिध्ध
योप्यौषधादिसिध्धिवन्नापलपनीयाः औषधादिसिध्धिदृष्टांतेनयोगजाप्यणिमादिसिध्धयः सृष्ट्याद्युपयोगिनः
सिध्यंतीत्यर्थः पुरुषसिध्धिप्रतिकूलतयाभूतचैतन्यवादिनंप्रत्याचष्टे नभूतचैतन्यंप्रत्येकादृष्टेःस्वसांहत्येपिस्वसां
हत्येपिच संहतभावावस्थायामपिपंचभूतेषुचैतन्यंनास्तिविभागकालेप्रत्येकंचैतन्यादृष्टेरित्यर्थः ततीयाध्या
येचेदंस्वसिध्धांतविधयोक्तं अत्रचपरमतनिराकरणायेति नपौनरुक्त्यदोषायेति वीप्साचाध्यायसमा
प्तौ स्वसिध्धांतविरुध्धार्थभाषिणोयेनवादिनः पंचमेतान्निराकृत्यस्वसिध्धांतोदृढीकृतः इतिश्रीविज्ञानाचार्य
निर्मितेकापिलसांख्यप्रवचनस्यभाष्येपरपक्षनिर्जयाध्यायः पंचमः अध्यायचतुष्केनसमस्तशास्त्रार्थंप्र
तिपाद्यपंचमाध्यायेपरपक्षनिराकरणेनप्रसाध्येदानींतमेवसारभूतंशास्त्रार्थंषष्ठाध्यायेनसंक्षेपतउपसंह
रतिउक्तार्थानांहिपुनस्तंत्राख्येविस्तारेकृतेशिष्याणामसंदिग्धाविपर्यस्तोदृढतराबोधउत्पद्यतइतिअतः सू
णानिखननन्यायादनुक्तसुक्त्याद्युपन्यासाच्चनात्रपौनरुक्त्यदोषाय अस्त्यात्मानास्तित्वसाधनाभावात् आत्मा
स्तीत्येवंप्रतीयमानतयापुरुषः सामान्यतःसिध्धएवास्तिबाधप्रमाणाभावात् अतस्तद्विवेकमात्रंकर्तव्यमित्य २५

मित्यर्थः तत्रविवेकंहेतुद्वयेनसाधयति देहादिव्यतिरिक्तोसौवैचित्र्यात् आत्माद्रष्टादेहादिप्रकृत्यंतेभ्योऽत्यंतभिन्नः
वैचित्र्यात्परिणामित्वादिवैधर्म्यादित्यर्थः प्रकृत्यादयस्तावत्प्रत्यक्षानुमानागमैः परिणामितयैवसिध्धाःपुरुष
स्यापरिणामित्वंतुसदाज्ञातविषयत्वादनुमीयते तथाहियथाचक्षुषोरूपमेवविषयोनसन्निकर्षसाम्येपिद्रव्यादिरेवंपुरु
षस्यस्वबुध्धिवृत्तिरेवविषयोनतुसंनिकर्षसाम्येप्यन्यद्वस्त्वितिफलबलात्कल्प्यंबुध्धिवृत्त्यारूढतयैवतद्योग्यंभवतिपुरु
षस्यनस्वतः वृत्त्यभावकालेघटाद्यदर्शनात् ताश्चवृत्तयोनाज्ञातास्तिष्ठंति ज्ञानेच्छासुखादीनामज्ञातसत्तास्वीकारे
तेष्वपिघटादाविवसंशयादिप्रसंगात् अहंजानामिनवेतिवीरसन्नवेत्यादिरूपेणनापिस्वप्रकाशाः कर्मकर्तृविरोधात्
अतस्तासांसदाज्ञानत्वात्द्रष्टाचेतनोपरिणामीत्यायातंचेतनस्यपरिणामित्वेकदाचिदाध्यपरिणामेनसत्याअपिबु
ध्धिवृत्तेरदर्शनापत्तेरिति ननुपुरुषस्यसदाज्ञानविषयत्वासिध्धेलाघवाच्चित्प्रकाशस्वरूपमेकैकमेवात्मद्रव्यंसिध्यति
ततश्चाज्ञानस्यापिचित्तधर्मतयाज्ञानकार्यधर्मादिकंमत्कार्यंछासुखादिकंचचित्तस्यैवसिध्यति सामानाधिकरण्यप्रत्यास
त्याकार्यकारणभावलाघवादिति एवंपारार्थ्यादिकमपिपूर्वोक्तंवैधर्म्यजातंबोध्यंतथाप्रकाशरूपत्वमपिवैलक्षण्यमात्मा
संघातयोरस्तिदेहादेः प्रकाशरूपत्वेदेहादिधर्माणांसदैवभानप्रसंगात्सुषुप्त्यादौदेहादेरचैतन्यानुपपत्तेश्च आ
त्मनस्तुप्रकाशमात्ररूपत्वेनिर्धर्मकतयाऽन्यसंगाद्यभावेनचसदाधर्मभानादिप्रसंगाभावादिति षष्ठीव्यपदेशा
दपि ममेदंशरीरंममेयंबुध्धिरित्यादिरविदुषामपिषष्ठीव्यपदेशादपिदेहादिः आत्माभिन्नः अत्यंताभेदेषष्ठ्यनुपप
त्तेरित्यर्थः तदुक्तंविष्णुपुराणेत्वंकिमेतच्छिरः किंनुशिरस्तवतथोदरं किमुपादादिकंत्वंवैतवैतत्किंमहीपते समस्ता
वयवेभ्यस्त्वंपृथक्भूताव्यवस्थितः कोहमित्यत्रनिपुणोभूत्वाचिंतयपार्थिवेति अवयवंचतुर्विंशतितत्त्वपरं षष्ठी
चेदंस्वममधनमितिवतनचस्थूलदेहोहमित्यादिरपिविदुषांव्यपदेशोस्तीतिवाच्यं अतिस्मृत्यनुग्रहेणभेदव्यपदेशा
स्यबाभेदव्यपदेशापेक्षयाबलवत्वात्ममात्माभद्रसेनइतिवद्गौणत्वेनैवतदुपपत्तेरिति ननुपुरुषस्यचैतन्यंराहोः
शिरःशिलापुत्रस्यशरीरमित्यादिव्यपदेशवदयमपिभवतुतत्राह नशिलापुत्रवद्धर्मिग्राहकप्रमाणबाधात्
शिलापुत्रस्यशरीरमित्यादिवदयंषष्ठीव्यपदेशोनभवति शिलापुत्रादिस्थलेधर्मिग्राहकप्रमाणेनबाधाद्विकल्पमात्रं

129
1990

सां०भा०
२६

ममशरीरमितिव्यपदेशेतुप्रमाणाबाधोनास्तिदेहात्मताया एवश्रुत्यादिप्रमाणैर्बाधादित्यर्थः यत्तुशास्त्रेषुममकारप्र
तिषेधः सप्तसाम्यस्यानित्यतयावाचारंभाणमात्रेणासत्यतापरएवेतिभावः तथाचस्मर्यते आत्मापिचायंनममस
र्वावापृथिवीमम यथाममतथान्येषामितिचिंतयन्नैव्यथेति पुरुषस्यचैतन्यमित्यत्रापिअस्तिधर्मग्राहकमानबाधः
अनवस्थाभयेनलाघवाच्चदेहादिव्यतिरिक्ततयाआत्मसिद्धौचैतन्यस्वरूपतावगाहनादिति देहादिव्यतिरिक्ततया
पुरुषमवधार्यतन्मुक्तिमवधारयति अत्यंतदुःखनिवृत्याकृतकृत्यता सुगमंननुदुःखनिवृत्यासुखस्यापिनिवृत्ते
नातुल्यायव्ययत्वेननसापुरुषार्थइतितत्राह यथादुःखाद्वेषः पुरुषस्यनतथासुखादभिलाषः विषयविधयोहेतु
तायांपंचम्यौयथादुःखद्वेषोबलवत्तरः नैवंसुखाभिलाषोबलवत्तरोपितुतदपेक्षयादुर्बलइत्यर्थः तथाचसुखाभि
लाषंबाधित्वापिदुःखद्वेषोदुःखनिवृत्तावेवेच्छांजनयतीति ननुतुल्यायव्ययत्वमितितदुक्तंलौकिकैः अभ्यर्थनाभं
गभयेनसाधुर्माध्यस्थ्यमिष्टेप्यवलंबतेर्थे इतियावन्नरकादिदुःखदर्शनेपिनशुभ्रसुखप्रवृत्तिः सारागादिदोषव
शादेवेति सुखापेक्षयादुःखस्यबहुलत्वात् अपिदुःखनिवृत्तिः पुरुषार्थइत्याह कुत्रापिकोपिसुखीति अनंतत्वणक
सपशुपक्षिमनुष्यादि मध्येस्वल्पापनुष्यदेवादिरेवसुखीभवतीत्यर्थः इतिहेतौतदपिकादाचित्कंसुखंमधुविषसं
पृक्तान्नवद्विचारकाणांहेयमेवेत्याह तदपिदुःखशबलमितिदुःखपक्षेनिःक्षिपंतिविवेचकाः तदपिपूर्वसूत्रो
क्तंसुखमपिदुःखमिश्रितमित्यर्थःदुःखकोटौसुखदुःखविवेचकानिक्षिपंतइत्यर्थः तदुक्तंयोगसूत्रेणपरिणाम
तापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्चसर्वमेवदुःखंविवेकिनइतिविष्णुपुराणेपि यद्यत्प्रीतिकरंपुंसांवस्तुमै
त्रेयजायते तदेवदुःखवृक्षस्यबीजत्वमुपगच्छतीति केवलंदुःखनिवृत्तिर्नपुरुषार्थः किंतुसुखापरक्तेतिमतम
पाकरोति सुखलाभाभावादपुरुषार्थत्वमितिचेन्नद्वैविध्यात् लाभाभावादपुरुषार्थमितिचेन्न सुखलाभाभावान्मो
क्षाख्यदुःखाभावस्यास्यापुरुषार्थस्यद्वैविध्यात्द्विप्रकारकत्वात् सुखलदुःखाभावलाभ्यामित्यर्थः सुखीस्यां
दुःखीमास्यामितिहियथाप्रागेवलोकानांप्रार्थनादृश्यतइतिशंकते निर्गुणत्वमात्मनोसंगत्वादिश्रुतेः नत्वात्मनो
निर्गुणत्वंसुखदुःखमोहाद्यखिलगुणशून्यत्वंनित्यमेवसिद्धं असंगत्वश्रुतेर्विकारहेतुसंयोगाभावश्रवणाच्चविना २६

चगुणाख्यविकारासंभवात् आत्मीयत्वेनसंभाव्यानांचगुणानांजन्यत्वेनैवानुभवात् आदिशब्देननिर्गुणोत्वादिश्रु
तयोग्राह्याः अतोनित्यसिद्धत्वान्नदुःखनिवृत्तिरपिपुरुषार्थोघटतेइत्यर्थः ननुसंगंविनास्वयमेवविकारोभवत्वि
तिचेन्नदाहायनानलोवन्हेर्नाथः क्रूरायवांभसांद्रव्यमेवतुतद्द्रव्यंविकारायनवैयतः किंचस्वयंविकारित्वेमोक्षोनै
वोपपद्यते स्वयंमोहविकारेणपुनर्बंधप्रसंगतइति तथाचोक्तंकौर्मेयद्यात्मामलिनोऽस्वच्छोविकारीस्यात् स्वभा
वतः नहितस्यभवेन्मुक्तिर्जन्मांतरशतैरपीति समाधत्ते परधर्मत्वेपितत्सिद्धिरविवेकात् सुखदुःखादिगुणानां
चित्तधर्मत्वेपितत्रात्मानिसिद्धिः प्रतिबिंबरूपेणावस्थितिरविवेकान्निमित्तात्प्रकृतिपुरुषसंयोगद्वारेत्यर्थः ए
तच्चप्रथमाध्यायेप्रतिपादितंनिमित्तत्वमविवेकस्यदृष्टहानिरितितृतीयाध्यायेसूत्रेचेतितथाचस्फटिकेलौहि
त्यमिवपुरुषेप्रतिबिंबस्वरूपेणदुःखसत्वात् तन्निरोवर्त्तिंपुरुषार्थः प्रतिबिंबद्वारकदुःखसंबंधस्यैवभोग
तयाप्रतिबिंबरूपेणैवदुःखस्यहेयत्वाद्दुःखंमाभुंजीयेतिप्रार्थनात्इति अविवेकमूलं पुरुषेगुणबंधः अ
विवेकस्तुकिंमूलकइत्याकांक्षायामाह अनादिरविवेकोऽन्यथादोषद्वयप्रसक्तेः अगृहीतासंसर्गकसमयवि
षयकज्ञानमविवेकः सचप्रवाहरूपेणानादिश्चित्तधर्मः प्रलयेवासनारूपेणातिष्ठतिअन्यथातस्यसादित्वेदोष
द्वयप्रसंगात्सादित्वेहिस्वतएवोत्पादेमुक्तस्यापिबंधापत्तिः कर्मादिजन्यत्वेचकर्मादिकंप्रत्यपितस्यकारणत्वा
नुपपत्तिरित्यर्थः अयंचअविवेकोवृत्तिरूपःप्रतिबिंबात्मनापुरुषधर्मइवभवतीत्यंतःपुरुषस्यबंधप्रयोजक
इतिप्रागेवोक्तं वक्ष्यतेचननुचेतनावत्तर्हिनित्यस्यादितितत्राह ननित्यस्यादात्मवत् अन्यथानुच्छित्तिः आत्मव
न्नित्योऽखंडानादिर्नभवतिकिंतुप्रवाहरूपेणानादिरन्यथानादिभावस्यतस्यश्रुतिसिद्धोच्छेदानुपपत्तेरित्यर्थः बं
धकारणमुक्त्वामोक्षकारणमाह प्रतिनियतकारणनाश्यत्वमस्यध्वांतवत् अस्यबंधकारणस्याविवेकस्यशुक्तिरजता
दिस्थलेप्रतिनियतंयन्नाशकारणंविवेकस्तन्नाश्यत्वंतमोवत् अंधकारोहिप्रतिनियतेनालोकेनैवनाश्यतेनान्यत्यर्थः
तदुक्तंविष्णुपुराणे अंधंतमइवाज्ञानंदीपवच्चेंद्रियोद्भवं यथासूर्यःतथाज्ञानंयद्विप्रर्षेविवेकजमिति विवेकेवाविवे
कोनाश्यतइतिप्रतिनियमस्यग्राहकमप्याह अत्रापिप्रतिनियमोऽन्वयव्यतिरेकात् ध्वांतालोकयोरिवप्रकृतेपि

131/1990

नियमः शुक्तिरजतादिष्वन्वयव्यतिरेकाभ्यामेवग्राह्य इत्यर्थः अथ चैवं व्यारव्येयं ननु विवेकस्यापि किं प्रतिनियतं कारणमस्ति
न वा तत्राह अत्रापि विवेके ऽपि कारणनियमो ऽन्वयव्यतिरेकाभ्यामेव सिद्धः श्रवणमनननिदिध्यासनरूपमेव कारणं न तु
कर्मादीति कर्मादिकं तु बहिरंगमेवेत्यर्थः बंधस्य स्वाभाविकत्वादिकं न संभवतीति प्रथमाध्यायोक्तं स्मारयति प्रकारांतरा
संभवादविवेक एव बंधः बंधो ऽत्र दुःखयोगो ऽस्य बंधस्य कारणं शेषं सुगमं ननु मुक्तेरपि कार्यत्वया विनाशात्स्यात्पुनर्बंधस्ता
दिति तत्राह न मुक्तस्य पुनर्बंधयोगो ऽप्यनावृत्तिश्रुतेः भावकार्यस्यैव विनाशितया मोक्षस्य नाशो नास्ति न पुनरावर्तत इ
ति श्रुतेरित्यर्थः अपिशब्दः पूर्वसूत्रोक्तार्थसमुच्चये अपुरुषार्थत्वमन्यथा अन्यथा मुक्तस्यापि पुनर्बंधे प्रलयवदेव
मोक्षस्यापुरुषार्थत्वं परमपुरुषार्थत्वाभावः स्यादित्यर्थः अपुरुषार्थत्वे हेतुमाह अविशेषापत्तिरुभयोः भाविबंधक
त्वसाम्येनोभयोर्मुक्तबद्धयोर्विशेषो न स्यात्ततश्चापुरुषार्थत्वमित्यर्थः नन्वेवं बद्धमुक्तयोर्विशेषाभ्युपगमे नित्यमुक्त
त्वं कथमुच्यते तत्राह मुक्तिरंतरायध्वस्तेर्न परः वक्ष्यमाणांतरायस्य ध्वंसातिरिक्तः पदार्थो न मुक्तिरित्यर्थः यथा
हि स्वभावमुक्तस्य स्फटिकस्य जपोपाधिनिमित्तं रक्तत्वं शोक्यावत्करूपं विभ्रममात्रं न तु जपोपाधानेन शौक्ल्यं नश्यति त
पापाये वा स्वत्वं धत्ते तथैव स्वभावनिर्दुःखस्यात्मनो बुद्ध्युपाधिकं दुःखप्रतिबिंबं तदावरकं रूपं विभ्रममात्रं न तु बुद्ध्युपा
ध्यानेन दुःखं जायते तदपाये च नश्यतीति अतो नित्यमुक्त आत्मा बंधमोक्षौ तु व्यावहारिकावित्यविरोध इति नन्वेवं
बंधमोक्षयोर्मिथ्यात्वे मोक्षस्य पुरुषार्थतादिप्रतिपादकश्रुत्यादिविरोध इत्यत आह तत्राप्यविरोधः तत्रापि अंतराय
ध्वंसस्य मोक्षत्वे ऽपि पुरुषार्थत्वाविरोध इत्यर्थः दुःखयोगवियोगाविव हि पुरुषे कल्पितौ न तु दुःखभोगो ऽपि भोगश्च
प्रतिबिंबरूपेण दुःखसंबंध इत्यतः प्रतिबिंबरूपेण दुःखनिवृत्तिर्यथार्थैव पुरुषार्थः स एवांतरायध्वंसः तादृशश्च
मोक्षो ऽपि यथार्थ एवेति भावः इतः परं तृतीयाध्यायोक्तस्य ज्ञानसाधनस्याष्टांगयोगस्योपसंहारः कर्तव्यस्तत्रादौ
श्रवणमननसंस्कृतेनैव मनसा साक्षात्कारसंभवात् योगवैयर्थ्यमित्याशंकामपाकरोति अधिकारित्रैविध्यान्न नियमः
उत्तममध्यमाधमाख्यत्रिविधाज्ञानाधिकारिणस्तेन श्रवणमननमात्रानंतरमेव मानससाक्षात्कारः सर्वेषामिति न नि
यम इत्यर्थः किं च कोमलकंटकवर जातेरपि साक्षात्कारे तद्दार्ढ्याय श्रवणादि उत्तरेषामपि साधनानां नियम इ
त्याह दार्ढ्यार्थमुत्तरेषां श्रवणमननयोरुत्तरेषां निदिध्यासनादीनां ज्ञानाभिवर्धनरूपदार्ढ्यार्थं नियम इत्यनुषज्य

133
1990

ते उत्तराण्येव साधनान्याह स्थिरसुखमासनमिति न नियमः आसने पद्मासनादिनियमो नास्ति यतः स्थिरं सुखं च यच्च
दिक आसनमित्यर्थः मुख्यं साधनमाह ध्यानं निर्विषयं मनः इतरवृत्तिशून्यं यदंतःकरणं भवति तदेव ध्यानं योगश्चित्त
वृत्तिनिरोधरूप इत्यर्थः कार्यकारणाभेदेन कारणशब्दः कार्ये प्रयुक्तः एवं साधनत्वेन ध्यानस्य वक्ष्यमाणत्वादिति
ननु योगायोगयोः पुरुषस्यैकरूप्यात्किं योगेनेत्याशंक्य ज्ञानफलकत्वे सत्येव फलांतरमाह उभयथाप्यविशेषश्चेन्नै
वमुपरागनिरोधाद्विशेषः योगायोगयोः पुरुषस्याविशेष इति चेन्नैवं यत उपरागनिरोधात् दुःखात्मकवृत्तिप्रति
बिंबापगमात् योगावस्थायामयोगावस्थातो विशेषः पुरुषस्येति ननु निःसंगे कथमुपरागस्तत्राह निःसंगे ऽप्युपरागो
ऽविवेकात् निःसंगे यद्यपि पारमार्थिक उपरागो नास्ति तथापि उपराग इव भवतीति कृत्वा प्रतिबिंब एवोपराग इति व्य
वह्रियते उपरागो विवेकिभिरित्यर्थः एतदेव विवृणोति जपास्फटिकयोरिव नोपरागः किंत्वभिमानः यथा जपास्फटि
कयोर्नोपरागः किंतु जपाप्रतिबिंबवशादुपरागाभिमानमात्रं रागः स्फटिक इति तथैव बुद्धिपुरुषयोर्नोपरागः किंतु
बुद्धिप्रतिबिंबवशादुपरागाभिमानो ऽविवेकवशादित्यर्थः अत उपरागतुल्यतया वृत्तिप्रतिबिंबनिबिंब एव पुरुषे विषयो
पराग इति सूत्रद्वयपर्यवसितार्थः तथा च स्मर्यते तथा जले चंद्रमसः कंपादिस्तत्कृतो गुणः दृश्यते सन्नपि द्रष्टुरात्मनो
नात्मनो गुण इति एष एव च दुःखात्मकवृत्त्युपरागो दुःखनिवृत्त्याख्यमोक्षस्यांतरायस्तस्य च ध्वंसः चित्तक्षयात् सोपि
च चित्तवृत्तिनिरोधाख्येनासंप्रज्ञातयोगेनेत्यतो योगादेवांतरायध्वंसो भवतीति योगशास्त्रस्यापि सिद्धांतः ध्यानं नि
र्विषयं मन इति यो योग उक्तस्तस्य साधनान्याचक्षाण एव यथोक्तोपरागस्य निरोधोपायमप्याह ध्यानधारणाभ्यासवै
राग्यादिभिस्तन्निरोधः समाधिद्वारा ध्यानं योगस्य करणं विषयवैराग्यं तस्यापि दोषदर्शनमिति पातंजलोक्तप्रक्रियया त
न्निरोधे उपरागनिरोधो भवति चित्तनिरोधाख्यद्वारा इत्यर्थः चित्तनिष्ठध्यानादिना पुरुषस्योपरागनिरोधं पूर्वाचार्य
सिद्धं द्वारं दर्शयति तत्र विक्षेपयोर्व्यावृत्त्येत्याचार्याः ध्यानादिना चित्तस्य प्रमाणादिवृत्तिनिवृत्त्या पुरुषस्यापि चित्तवृ
त्त्युपरागनिरोधो भवति बिंबनिरोधे प्रतिबिंबस्यापि निरोधादिति पूर्वाचार्या आहुरित्यर्थः यथा पतंजलिर्योगश्चित्त
वृत्तिनिरोधस्तदा द्रष्टुः स्वरूपे ऽवस्थानं वृत्तिसारूप्यमितरत्रेति सूत्रेण तदेवाह तथा नित्यः सर्वत्रगो ह्यात्मा बुद्धिसंनि

सां॰भा॰
२८

धिमत्त्वतया यथार्थयथाभवेत् बुद्धिरात्मा तद्वदिहैव तदित्यादिस्मृतयोप्येतद्दाढ्यं इति तदेवं संप्रज्ञातयोगादेव साक्षात्कार
द्वारा मोक्षान्तरायध्वंस इति प्रघट्टकार्थः ध्यानादौ गुहादिस्थाननियमो नास्तीत्याह नस्थाननियमश्चित्तप्रसादात् चि
त्तप्रसादादेव ध्यानादिकमितस्तत्र न गुहादिस्थाननियम इत्यर्थः शास्त्रे तौत्सर्गिकाभिप्रायेणैवारण्यगिरिगुहादि
स्थानं योगस्योद्दिष्टमिति अत एव ब्रह्मसूत्रमपि यत्रैकाग्रता तत्राविशेषादिति समाप्तो मोक्षविचार इदानीं पुरुषाप
रिणामित्वाय जगत्कारणमुपसंहरति प्रकृतेराद्योपादानताऽन्येषां कार्यश्रुतेः महदादीनां कार्यत्वश्रवणाच्चैषां मूल
कारणतया प्रकृतिः सिध्यतीत्यर्थः ननु पुरुष एवोपादानं भवतु तत्राह नित्यत्वेपि नात्मनो योग्यत्वाभावात् गुणव
त्त्वं सङ्गत्वं चोपादानयोग्यता तयोरभावात् पुरुषस्य नित्यत्वेपि नोपादानत्वमित्यर्थः ननु बह्वीः प्रजाः पुरुषात्संप्रसूता इ
त्यादिश्रुतिभिः पुरुषस्य कारणत्वावगमात् विवर्तादिवादा आश्रणीया इतीमत्त दृप्युपसंलक्षणाकुतार्किका एवं तेषाम
प्यात्मयथार्थप्रज्ञातं नास्तीत्येव गन्तव्यं आत्मकारणभावश्रुतयश्च शक्तिशक्तिमदभेदेनोपासनार्था एव अजामेका
मित्यादिभिः श्रुतिभिः प्रधानकारणतासिद्धेः यदि चाकाशस्येवात्माद्यधिष्ठानकारणता तदात्मनः कारणत्वमुच्य
ते तदा तन्न निराकुर्मः परिणामस्यैव प्रतिषेधादिति स्थावरजङ्गमादिषु पृथिव्यादीनामिव कारणत्वदर्शनात् कथं प्रकृ
तेः सर्वोपादानत्वं तत्राह पारंपर्येपि प्रधानानुवृत्तिरणुवत् स्थावरादिषु परंपरया कारणत्वेपि तेषु प्रधानस्यानुगमा
दुपादानत्वमस्त्येव यथाङ्कुरादिद्वारकत्वेपि स्थावरादिषु पार्थिवाद्यपरमाणूनामनुगमात् उपादानत्वमित्यर्थः वनन्याये
न प्रकृतेर्व्यापकत्वे प्रमाणमाह सर्वत्र कार्यदर्शनाद्विभुत्वं अव्यवस्थया सर्वत्र विकारदर्शनात् प्रधानस्य विभुत्वं यथा
णो घटादिव्यापित्वमित्यर्थः एतच्च प्रागेव व्याख्यातं ननु परिच्छिन्नत्वेपि यत्र कार्यमुत्पद्यते तत्र गच्छतीति वक्तव्यं तत्रा
ह गतियोगेप्याद्यकारणताहानिरणुवत् गतिस्वीकारेपि येन परिच्छिन्नतया मूलकारणत्वाभावः पार्थिवाद्यणुदृष्टा
न्तेनेत्यर्थः अथ वै संख्याख्येयं ननु त्रिगुणात्मकस्य प्रधानस्यान्योन्यसंयोगार्थं श्रुतिस्मृतिषु क्रियाक्षोभाख्या श्रूयते क्रि
यावत्त्वाच्च तत्त्वादिदृष्टान्तेन मूलकारणत्वाभाव इत्याशङ्कां परिहरति योगेप्याद्यकारणताहानिरणुवदिति गतिः क्रिया
वत्त्वेपि मूलकारणताया आहानिर्यथा वैशेषिकमते पार्थिवाद्यणूनामित्यर्थः ननु पृथिव्यादीनां नवानामेव द्रव्याणां २८

दर्शनात् कथं पृथिवीत्वादिवदन्यं प्रधानाख्यं द्रव्यं घटते न च प्रधानं द्रव्यमेव मास्त्विति वाच्यं संयोगविभागपरिमाणादिभि
र्द्रव्यत्वसिद्धेरिति तत्राह प्रसिद्धाधिक्यं प्रधानस्य न नियमः प्रसिद्धनवद्रव्याधिक्यमेव प्रधानस्य यतो नवैव द्रव्याणीति
न नियम इत्यर्थः आत्मातिरिक्तानां पृथिव्यादीनां अष्टानामेव कार्यत्वश्रवणान्तनियमे बाधकमिति भावः किं स
त्त्वादयो गुणा एव प्रकृतिरथवा गुणत्रयरूपद्रव्यत्रयाधारभूता प्रकृतिरिति संशयेऽवधारयति सत्त्वादीनामतद्ध
र्मत्वं तद्रूपत्वात् सत्त्वादिगुणानां प्रकृतिधर्मत्वं नास्ति प्रकृतिस्वरूपत्वादित्यर्थः यद्यपि श्रुतिस्मृतिषु उभयमेव
श्रूयते तथापि लाघवादितर्कात् स्वरूपत्वमेवावधार्यते न तु धर्मत्वं तथा हि सत्त्वादित्रयं तावद्द्रव्यमिति प्रागेव व्य
वस्थापितं तत् किं प्रकृतेः कार्यरूपो धर्मोऽथवाकाशस्य वायुवत्संयोगमात्रेण नित्य एव धर्मः स्यात् आद्ये एकस्या ए
व प्रकृतेर्द्रव्यान्तरसङ्गं विना विचित्रगुणत्रयोत्पत्त्यसंभवः दृष्टविरुद्धकल्पनानौचित्यं च अन्त्ये नित्येभ्य एव स
त्त्वादिभ्योऽन्योन्यसंगेन विचित्रसकलकार्योपपत्तौ तदतिरिक्तप्रकृतिकल्पनवैयर्थ्यमिति सत्त्वादीनां प्रकृति
कार्यत्वादिवचनानि चांशतः प्रकाशादिकार्योपहिततयाऽभिव्यक्त्यादिकमेव बोधयन्ति यथा पृथिवीतो द्वीपोत्प
त्तिमिति नन्वेवमष्टाविंशतितत्त्वप्रतिपादकशास्त्रविरोध इति चेत् न तत्र प्रकृतिधर्माणां सुखादीनां वैशेषि
कगुणानां पृथक्तत्त्वाभ्युपगमेन तत्त्वानामष्टाविंशतिसंख्योपपत्तेः वस्तुतस्तु इदं सूत्रमित्थं व्याख्येयं सत्त्वा
दीनामतद्धर्मत्वं प्रकृतिकार्यमात्रत्वाभावः तद्रूपत्वात् प्रकृतेरपि सत्त्वादिरूपत्वात् सत्त्वं रजस्तम इति एवैव प्रकृ
तिः स्मृतेत्यादिस्मृतिभ्य इति तथा च वैशेषिकाणां पृथिव्यादिष्विवास्माकमपि कार्यकारणोभयरूपतया सत्त्वा
दिषु प्रकृतिकार्यत्वादिवाक्यानामविरोधः तत्र साम्यावस्थं सत्त्वं अंशतुल्यं वैषम्यावस्थस्य तत्तुल्यस्य महत्तत्त्वा
दिकारणसत्त्वस्य कारणमेवं रजस्तमसी अपीति प्रधानप्रवृत्तेः प्रयोजनमुपसंहरति निःप्रयोजनप्रवृत्त्यभ्युपग
मे मोक्षानुपपत्तेः अनुपभोगेपि पुमर्थं सृष्टिः प्रधानस्योष्ट्रकुङ्कुमवहनवत् तृतीयाध्याये प्रधानसृष्टिः परा
र्थेत्यादिसूत्रं व्याख्यातमिदं विचित्रसृष्टेर्निमित्तकारणमाह कर्मवैचित्र्यात् सृष्टिवैचित्र्यं कर्म धर्माधर्मौ सुगम
मन्यत् अनुभवतु प्रधानात् सृष्टिः फलं पस्तु कस्मात् न ह्येकस्मात् कारणात् विरुद्धकार्यद्वयं घटते तत्राह साः

135/1970

म्यंवैषम्यभ्यांकार्यद्वयं सत्वादिगुणत्रयंप्रधानंतेषांचवैषम्यन्यूनातिरिक्तभावेनसंहननंआरंभकसंयोगः तदभावः साम्यं
२९ ताभ्यांहेतुभ्यामकस्मादेवसृष्टिप्रलयरूपंविरुद्धकार्यद्वयंभवतीत्यर्थः स्थितिस्तुसृष्टिमध्येप्रविष्टेत्याशयेनतत्कारणत्वं
प्रधानस्यपृथक्नविचारितंननुप्रधानस्यसृष्टिस्वाभाव्याज्ज्ञानोत्तरमपिसंसारः स्यात्तत्राह विमुक्तबोधान्नसृष्टिःप्र
धानस्यलोकवत् विमुक्तेनयाविविक्तेनयापुरुषसाक्षात्काराधेतोः प्रधानस्यतत्पुरुषार्थंपुनःसृष्टिर्नभवतिकृतार्थत्वा
ल्लोकवत् यथालोकअमात्यादयोराज्ञोऽर्थंसंपाद्यकृतार्थाः संतोनपुनःराजार्थंप्रवर्तंते तथैवप्रधानमित्यर्थः विमुक्त
मोक्षार्थंस्वप्रधानप्रवृत्तिरित्युक्तं सचज्ञानान्निष्पन्नइतिभावः ननुप्रधानस्यसृष्ट्युपरमोनास्तिअज्ञानात्संसारदर्शना
तथाचप्रधानसृष्ट्यामुमुक्षस्यापिपुनर्बंधःस्यात्तत्राह नान्योपसर्पणेपिमुक्तोपभोगोभवतिनिमित्ताभावात् कार्यका
रणसंघातादिसृष्ट्यान्यान्प्रतिप्रधानस्योपसर्पणेनमुक्तस्योपभोगोभवतिनिमित्ताभावात् उपभोगेनिमित्तानां
स्वोपाधिसंयोगविशेषतत्कारणाविवेकादीनामभावादित्यर्थः इदमेवहिमुक्तंप्रतिप्रधानसृष्ट्युपरमोयत्तद्भोगहेतोःस्वो
पाधिपरिणामविशेषस्यानुत्पादनमिति ननुअयंविभागस्तदाघटतेयदिपुरुषबहुत्वंस्यात्तदेवत्वद्वैतश्रुतिबाधितमि
त्याशंकायामाह पुरुषबहुत्वंव्यवस्थातः येतद्विदुरमृतास्तेभवंत्यथेतरेदुःखमेवापियंतिइत्यादिश्रुत्युक्तबंधमोक्षव्यव
स्थातएवपुरुषबहुत्वंसिध्यतीत्यर्थः ननुउपाधिभेदात्बंधमोक्षव्यवस्थास्यात्तत्राह उपाधिश्चेत्तत्सिद्धौपुनर्द्वैतं उपाधि
श्चेत्स्वीक्रियतेतर्हिउपाधिसिध्यैवपुनरद्वैतभंगइत्यर्थः वस्तुतस्तुउपाधिभेदेपिव्यवस्थानसंभवतीतिप्रथमाध्यायए
वप्रपंचितंअस्मन्मतेचाद्वैतश्रुतीनांप्रकरणभेदात्स्वतंत्रविभक्तवस्तुराहित्यं द्वितीयसंगशून्यंस्वविजातीयपारमार्थि
कवस्तुशून्यत्वंचार्थः पारमार्थिकत्वंचकूटस्थनित्यत्वमितिनतूपाधयोप्यविद्यकाइतिनतैरद्वैतभंगइत्याशंकाया
माह द्वाभ्यामपिप्रमाणविरोधः पुरुषोविद्येतिद्वाभ्यामभ्यंगीकृताभ्यामद्वैतप्रमाणस्यश्रुतेर्विरोधस्तदवस्थएवे
त्यर्थः अपरद्वयमपिदूषणद्वयमाह द्वाभ्यामप्यविरोधान्नपूर्वमुत्तरंचसाधकाभावात् द्वाभ्यामप्यंगीकृताभ्यांपू
र्वंपूर्वपक्षोत्मासुभवतांनघटतेऽस्माभिरपिप्रकृतिःपुरुषश्चेतिद्वयोरेवांगीकारात्विचारस्यवाचारंभणमा २९
त्रत्वेनानित्यतारूपसत्वस्यास्माभिरंगीकृतत्वात् ननुपुरुषमात्रस्वीकारात्प्रकृतेर्नित्यत्वस्वीकाराच्चास्त्येवास्म
द्विरोधइतिचेत् नभेदस्याचिद्वास्यतेनस्वतःसिद्धत्वरूपपारमार्थिकसत्वाभावस्यास्माभिरप्यनिराकरणात् भेद

137/1990

स्याधिकरणस्वरूपतयाचेतनानामन्योन्यभेदस्यचिन्मात्रस्वरूपत्वाच्चप्रकृतिनित्यतायश्चवादांतरत्वादितिभावेनदूषणां
तरमाह उत्तरंचेत्यादिना अद्वैतवादिनामुत्तरंसिद्धांतश्चनघटतेआत्मसाधकप्रमाणस्याभावात् तदंगीकारेचतेनैवाद्वैत
हानिरित्यर्थः ननुस्वप्रकाशतयात्मासेत्स्यति तत्राह प्रकाशतस्तत्सिद्धौकर्मकर्तृविरोधः चैतन्यरूपप्रकाशतश्चेतत्
सिद्धौकर्मकर्तृविरोधइत्यर्थः प्रकाश्यप्रकाशसंबंधोहिप्रकाशनमालोकादिषुदृष्टंस्वस्यसाक्षात्स्वस्मिन्संबंधश्चविरुद्ध
घटोद्रष्ट्यमित्यादिनातादात्म्यसंबंधोपिसंबंधितावच्छेदकभेदात्संबंधिनोरस्त्येवभेदइति अस्मन्मतेतुबुद्धिवृत्त्याख्यप्रमाणां
गीकाराच्चद्वाराप्रतिबिंबरूपस्यस्वस्मिन्बिंबरूपस्वस्मिन्संबंधोघटतेयथासूर्यजलद्वाराप्रतिबिंबरूपस्वसंबंधइतिभा
वः आत्मनःप्रकाशत्वश्रुतिस्त्वनन्योपाधिकप्रकाशादिपराबोध्यानत्प्रत्यक्षेकर्मकर्तृभावोविषयविषयिभावएववस्तु
स्वविषयत्वादितिमैवंप्रकारभेदेनतत्रापिविषयविषयिणोर्भेदात् ज्ञानत्वादिसामान्यरूपेणाविषयताविषयितान्यसर्वज्ञा
नंसदित्यादिरूपेणविषयएवंसामान्यलक्षणप्रत्यासत्तिजप्रत्यक्षेपिज्ञानत्वाद्याकारेणविषयिताज्ञानमीत्यादिरूपेणश्चविषयिते
तितत्राप्यस्तिभेदः नतुप्रकाशस्वरूपपुरुषस्यसाक्षात्स्वविषयत्वेस्तिप्रकारभेदोयेनाविरोधः एतेनलौकिकप्रत्यक्षरू
पवृत्तीनामपिस्वविषयत्वंनसंभवतिप्रकारभेदाभावात्प्रत्यक्षविषयाणांहेतुत्वाच्चेतिदिक् ननुनास्तिकर्मकर्तृविरो
धःस्वनिष्ठप्रकाशधर्मद्वारस्वस्यस्वसंबंधसंभवात् यथावैशेषिकाणांस्वनिष्ठज्ञानद्वारास्वस्यस्वविषयइतितत्रा
ह जडव्यावृत्तोजडंप्रकाशयतिचिद्रूपः चेतनेप्रकाशरूपधर्मःसूर्यादिषिवनास्तिकिंतुचिद्रूपः चित्स्वरूपएवपदार्थो
जडंप्रकाशयति सचजडव्यावृत्तिमात्रेणाचिदित्युच्यतेनतुजडविलक्षणधर्मवत्तयेत्यर्थः अतएवनिर्धर्मतयासए
षनेतिनेतीत्यनवश्रुत्यापदिश्य तेनतुविधिमुखतयेतितथाचस्मृतिरापिइदंतदितिनिर्देष्टुंगुरुणापिनशक्यतइतिज
डव्यावृत्ताविनिपातोपिहेतोसप्तम्यान्यमेवार्थः अस्मिंश्चसूत्रेजडमेवप्रकाशयतिचिद्रूपानत्वात्मानमितिनार्थः तथात्व
सतिहितस्याजयत्वेनसाधकाभावरूपबाधकपरंपूपन्यासानर्हत्वस्यापितुल्यन्यायत्वादिति नन्वेवंप्रमाणाद्यनुरोधेन
द्वैतसिद्धौतुश्रुतेर्गौण्याःकिंप्रयोजनमितितत्राह नश्रुतिविरोधोरागिणांवैराग्यायतत्सिद्धेः निःप्रयोजनकत्वरूपो
द्वैतश्रुतेःनिरोधस्तुनास्तिरागिणांपुरुषातिरिक्तेवैराग्यायेवश्रुतिभिरद्वैतसाधनात्पुरुषज्ञानइवद्वैताभावज्ञानस्य

तंत्रफलांतश्रवणात् तत्त्ववैराग्यमद्वैते नैवोपपद्यते सत्वं च कूटस्थत्वमित्यर्थः अतएवश्रुतिरपिसदेवसोम्येदमग्रआ
सीदेकमेवाद्वितीयमित्यादिनासदद्वैतमेवछांदोग्येपिप्रतिपादितवतीतिभावः नकेवलमुक्तमतेष्वेववादे तवादिनांहेया
अपितुजगत्सत्यतायाग्राहकप्रमाणेनापीत्याह जगत्सत्यत्वमदुष्टकारणजन्यत्वात्बाधकाभावात् निद्रादिदोषदु
ष्टांतः करणादिजन्यत्वंनस्वप्नविषयशंखपीतिमादीनामसत्यंसत्यत्वंलोकदृष्टांतेमहदादिप्रपंचेनास्तितत्कारण
स्यप्रकृतेर्हिरण्यगर्भबुद्धेश्चादुष्टत्वात् यथापूर्वप्रकल्पयदित्यादिश्रवणात् ननुनेहनानास्तिकिंचनेत्यादिश्रुत्या
बाधितत्वेनाविद्यादिनामाकश्चननादिदोषः कल्पनीयस्तत्राह बाधकभावादिति अयंभावः नेहनानास्तिकिंचने
त्यादिश्रुतयोयापरैःपंचबाधकतयाभिप्रेताःप्रकरणानुसारेणविभातिप्रतिषेधकाएवनतुप्रपंचात्यंततुच्छताप
राः स्वस्यापिबाध्यायत्यास्वार्थासाधकत्वप्रसंगात् नाहस्वप्नकालीनशब्दबाधेतज्ज्ञापितार्थः पुनर्नसंदिह्यतइतित
स्मादात्मविघातकतयाश्रुतयोनप्रपंचस्यात्यंतबाधपराइति अतएववेदांतसूत्रमपिवैधर्म्याच्चस्वप्नादिवादितित
त्रनेहनानास्तिकिंचनेत्यादिश्रुतेर्ब्रह्मविभक्तंकिमपिनास्तीत्यर्थः सर्वंसमाप्नोषिततोसिसर्वइत्यादिस्मृत्येकस्त्ता
विरहोऽर्थअन्यथामृत्तिकादृष्टांतासिद्धेः वाक्यत्वादितिवाचारंभमाणविकारोनामधेयंमृत्तिकेत्येवसत्यमित्या
दिश्रुतेस्तुस्थिरतारूपपारमार्थिकसत्त्वाविरहोऽर्थअन्यथामृत्तिकादृष्टांतासिद्धेः नहिलोकेमृदादिकारणाममसंत
तुच्छत्वंसिध्यंयेनदृष्टांततास्यादिति ननिरोधोनचोत्पत्तिर्नबद्धोनचसाधकः नमुमुक्षुर्नवैमुक्तइत्येषापरमा
र्थतेत्यादिश्रुतेस्तुआत्मातिरिक्तस्यकूटस्थनित्यतारूपातिपरमार्थसत्त्वाविरहार्थः किंचात्मनोनिरोधाद्यभावा
र्थः अन्यथैतादृशज्ञानस्यमोक्षफलकत्वप्रतिपादनविरोधात् नहिमोक्षोमिथ्येतिप्रतिपाद्यमोक्षस्यफलत्व
सप्रयत्नःप्रतिपादयतीतियाश्चात्मैक्यश्रुतयस्तास्तुप्रथमाध्यायेएवव्याख्याताः ब्रह्ममीमांसाभाष्येचेता
अन्याश्चश्रुतयोस्माभिर्व्याख्याताःश्रुतिभाष्येष्वपीतिदिक् नकेवलंवर्तमानदशायामेवप्रपंचःसन् अपितु
सदैवेत्याह प्रकारांतरासंभवात्सदुत्पत्तिः पूर्वोक्तयुक्तिभिरसदुत्पादासंभवात्सूक्ष्मरूपेणसदेवोत्पद्यतेअभि
व्यक्तंभवतीत्यर्थः कर्तृत्वभोक्तृत्वयोर्वैयधिकरण्यमपिव्यवस्थामुपपादयतिसूत्राभ्यां अहंकारःकर्तानपुरुषः ३०

अभिमानवृत्तिकमंतःकरणमहंकारः सएवकृतिमान्अभिमानोत्तरमेवप्रायशःप्रवृत्तिदर्शनात् नतुपुरुषोऽपरि
णामित्वादित्यर्थः पूर्वंचधर्मादिकंबुद्धेरितियदुक्तंतदेकस्यैवांतःकरणस्यवृत्तिमात्रभेदाशयेन चिदवसना
शक्तिस्तत्कर्मार्जितत्वात् अहंकारस्यकर्तृत्वेपिभोगश्चित्येवपर्यवसन्नोभवति अहंकारस्यसंहतत्वेनपरार्थ
त्वात् नन्वेवमन्यनिष्ठकर्मणोन्यस्यभोगेपुरुषविशेषनियमोनस्यात्तत्राह तत्कर्मार्जितत्वात्इति अ
हंकारेणार्जितंतस्मिन्यत्कर्मतज्जन्यत्वाद्भोगोस्येत्यर्थः योहंकारोयंपुरुषमादायाचेतनेऽहंममेतिवृत्तिं
करोतिकरोतितस्याहंकारस्यकर्मतस्यात्मनउच्यते तेनैवचकर्मणातत्रात्मनिभोगोर्ज्यतेइतिनातिप्रसंगइ
त्याशयः ब्रह्मलोकागतानांतिर्भिर्नास्तिनिष्कृतिरितिपूर्वोक्तंकारणंदर्शयति चंद्रादिलोकेप्यावृत्तिर्निमित्त
सद्भावात् निमित्तमविवेककर्मादिकंसुगममन्यत् ननुतत्तल्लोकवासिजनोपदेशादनावृत्तिःस्यात्तत्रा
ह लोकस्यनोपदेशात्सिद्धिःपूर्ववत् यथापूर्वस्यमनुष्यलोकस्योपदेशमात्रान्नसिद्धिः ज्ञाननिष्पत्तिरे
वंतत्तल्लोकस्थलोकस्योपदेशमात्रात्तद्गतानांज्ञाननिष्पत्तिर्ननियमेनभवतीत्यर्थः नन्वेवंब्रह्मलोकादनावृ
त्तिःश्रुतेःकागतिस्तत्राह पारंपर्येणतत्सिद्धौविमुक्तिश्रुतिः ब्रह्मलोकादिगतानांश्रवणामननादिपरं
परयाज्ञानसिद्धौविषयेनसपुनरावर्ततेइत्यादिविमुक्तिश्रवणंनतुसाक्षाद्गतिमात्रेणेत्यर्थः तल्लोकेज्ञा
नस्यप्रायिकत्वादन्यलोकाद्विशेषइति परिपूर्णत्वेप्यात्मनोगतिश्रुतिमुपपादयति गतिश्रुतेश्चव्यापकत्वे
प्युपाधियोगाद्भोगदेशकाललाभोव्योमवत् व्यापकत्वेप्यात्मनोगतिश्रवणानुरोधेनभोगदेशस्यकालवशाल्लाभः
सिध्यतिव्योमवदुपाधियोगाद्धवह्निर्यतेतथैवेतितथाचश्रुतिः घटसंवृतमाकाशंनीयमानेघटेयथा घटोनी
यतनाकाशंतद्वज्जीवोनभोपमइति भोक्तुरधिष्ठानाद्भोगायतननिर्माणमितियदुक्तंतत्रपंचयइति अनधिष्ठि
तस्यपूतिभावप्रसंगाच्च तत्सिद्धिर्भोक्त्रनधिष्ठितस्यशुक्रादेःपूतिभावप्रसंगान्नतस्यानधिष्ठितस्यसिद्धिःस्वका
र्यभोगसंपादकत्वमित्यर्थः नन्वधिष्ठानंविनैवादृष्टद्वाराभोक्तृणांभोगायतननिर्माणंभवतुतत्राह अदृष्टद्वारा

139/1990

सां०भा० चेत् असंबधस्तदसंभवात् जलादिवदंकुरे शुक्रादेसाक्षादसंबधस्यादृष्टस्यशरीरादिनिर्माणेभोक्तृद्वारावासंभवा
त् बीजासंबधानांजलादीनामंकुरोत्पत्तौकर्षकादिद्वारत्ववदित्यर्थः अतःस्वाश्रयसंयोगसंबंधेनैवादृष्टसंबंधः
२१ शुक्रादिषुवक्तव्यः तथाचसिद्धमदृष्टवदात्मसंयोगरूपस्याधिष्ठानस्यभोगोपकरणानिर्माणहेतुत्वमितिभावः
वैशेषिकादिनयेनादृष्टद्वारकमात्मकारणत्वमभ्युपेत्यतत्संबंधघटकतयाआत्मनोधिष्ठातृत्वंस्थापितं स्वसिद्धांतेतुध
र्मादीनामात्मधर्मत्वाभावान्नद्वारामोक्षहेतुत्वमेवनसंभवतीत्याह निर्गुणत्वात्तदसंभवादहंकारधर्माह्येते मोक्षनिर्गुण
त्वेनादृष्टासंभवाच्चनादृष्टद्वारकत्वंहियस्मादेते दृष्टादयोऽहंकारस्यांतःकरणसामान्यस्यैवधर्माइत्यर्थः तथाचास्मन्मतेद्वा
रनैरपेक्ष्येणसंयोगमात्रेणसाक्षादेवभोक्तुरधिष्ठानंसिध्यतीतिभावः ननुचेतनःपुरुषोव्यापकस्तर्हिवालाग्रशतभागस्य
शतधाकल्पितस्यचभागोजीवः सविज्ञेयः सचानंत्यायकल्पतइतिश्रुतिप्रतिपादितंजीवपरिच्छिन्नत्वमनुपपन्नंतथैश्व
रप्रतिषेधात्पुरुषाणांचैकरूप्याज्जीवात्मपरमात्मविभागोपिशास्त्रीयोनुपपन्नइतितदिदमाशंकाद्वयमपहर्तुमाह
विशिष्टस्यजीवत्वमन्वयव्यतिरेकात् जीवबलप्राणधारणयोरितिव्युत्पत्त्याजीवित्वंप्राणित्वंतच्चाहंकारविशिष्टपुरु
षस्यधर्मः नतुकेवलपुरुषस्यकुतः अन्वयव्यतिरेकात् अहंकारवत्तामेवसामर्थ्यातिशयेप्राणधारणयोर्दर्शन
त् तच्छून्यानांचचित्तवृत्तिनिरोधस्यैवदर्शनात्प्रवृत्तिहेतुरागोत्पादकस्याहंकारस्याभावादित्यर्थः अथवांतःकरण
वियोगेमोक्षप्रलयादौनजीवनं तद्योगेवजीवनमित्येवमन्वयव्यतिरेकौव्याख्येयौतथाचांतःकरणोपाधिकंजीव
स्यपरिच्छिन्नत्वंपरमात्मत्वात्केवलपुरुषात्भिन्नत्वंचस्वतस्तुपूर्णत्वमरमात्वंमेचेतिभावः अनेनसूत्रेणविशि
ष्टस्यमोक्तृत्ववालमहंप्रत्ययगोचरत्वंवानोक्तंसाक्षात्काररूपस्यभोगस्याहंकारधर्मत्वाभावात्त्वमहंधर्मिपुरस्क
रेणविवेकानुपपत्तेश्चकिंतुमदान्वमेदविज्ञानंजीवात्मपरमात्मनोः भवित्तदामुनिश्रेष्ठाःपाराछेदोभविष्यति आत्मानं
द्विविधंप्राहुःपरापरविभेदतः परस्तुनिर्गुणःप्रोक्तोऽहंकारयुतोपरइत्यादिवाक्यशतोक्तोजीवात्मपरमात्मविभाग
एवप्रदर्शितः इदानीमहदहंकारयोरेवतदितरंजगत्कार्यंनेश्वरस्येतिब्रह्मादित्रयस्यैवव्यावहारिकेश्वरत्वमुपाय ३१
प्रतिपादयिष्यति तत्रादौअहंकारकार्यमाह अहंकारकर्त्रधीनाकार्यसिद्धिर्नैश्वराधीनाप्रमाणाभावात् कर्तृत्वम

141/1990

त्रकार्यानुकूलेच्छाकृतिमत्वं तथाच अहंकाररूपोयः कर्तातदधीनेनकार्यसिद्धिः सृष्टिसंहारनिष्पत्तिर्भवतितादृशबलस्याहंका
रकार्यत्वात् अनहंकृतेषुतत्सामर्थ्यादर्शनात् ननुवैशेषिकाद्युक्तानहंकृतपरमेश्वराधीनाअनहंकृतस्वष्टत्वेनित्येश्वरेचप्र
माणाभावादित्यर्थः अहंबहुस्यांप्रजायेयेतिह्यहंकारपूर्विकैवसृष्टिः श्रूयतेतत्राहंशब्दानुकरणमात्रत्वेप्रमाणाभावाद
ति अनेनसूत्रेणाहंकारोपाधिकब्रह्मरुद्रयोरेवसृष्टिसंहारकर्तृत्वमुक्तं ननुभवतु अहंकारोन्येषांकर्ताअहंकारस्यतुकः
कर्तातत्राह अदृष्टोद्भूतिवत्समानंवायथासर्गादिषुप्रकृतिक्षोभककर्माभिव्यक्तिः कालविशेषमात्राद्भवतितथैवा
हंकारः कालमात्रनिमित्तादेवजायतेनतुतस्यापिकर्त्रंतरमस्तीतिसमानत्वभावयोरित्यर्थः नचसेश्वरमतेकर्माभि
व्यक्तिरपीश्वरेणैवक्रियतइतिवक्तुंशक्यते ईश्वरस्यवैषम्यनैर्घृण्यापत्तेः कर्मसमापेक्षत्वेवाहि ईश्वरस्यवैषम्यादि
कं संश्रूरेःपरिहर्तव्यंतत्वेत्कर्मैश्वरएवाधितिष्ठेत् तर्हिवैषम्यादिकमायतितवेतिभावः महतोन्यत् अहंकारकार्यात्
मादेयदन्यत्पालनांतर्यामित्वादिकंतन्महत्त्वादेवभवतिविशुद्धसत्वतयाभिमानरागाद्यभावेनपरानुग्रहमात्रप्रयो
जकत्वान्निरतिशयज्ञानबलैश्वर्यादित्यर्थः अनेनचसूत्रेणमहत्तत्वोपादिकोविष्णोःपालकत्वमुक्तं महत्तत्वोपाधिक
त्वाच्चविष्णुर्महान्परमेश्वरोब्रह्मेतिचगीयतेतदुक्तंयदाऽऽद्योवासुदेवाख्यंचित्तंतन्महदात्मकमिति अत्रशास्त्रेकारण
ब्रह्मतुपुरुषसामान्यंनिर्गुणमेवेष्यतेईश्वरानभ्युपगमात् तत्रचकारणशब्दःस्वशक्तिप्रकृत्योपाधिकोवानिमित्त
कारणतापरोवापुरुषार्थस्यप्रकृतिप्रवर्तकत्वादितिमंतव्यं स्वाम्यर्थंप्रकृतेःप्रवृत्तिःस्वतएवभवतीतिस्थलेस्थलेप्रो
क्तं तत्रस्वस्वामिभावोभोग्यभोक्तृभावः सचप्रकृतिःप्रवृत्तेःप्राङ्नास्तीत्याशंकापरिहरतिकर्मनिमित्तप्रकृतेःस्वस्वा
मिभावोप्यनादिर्बीजांकुरवत् येषांसांख्यदर्शिनांप्रकृतेःपुरुषस्यचस्वस्वामिभावोभोग्यभोक्तृभावः कर्मनि
मित्तकः तन्मतेपिस्वदृत्तितह्रासनाप्रवाहरूपेणानादिरेवबीजांकुरवत्प्रामाणिकत्वादित्यर्थः आकस्मिकत्वेमु
क्तस्यापिपुनर्भोगायत्तेरिति अविवेकनिमित्तोवापंचशिखः अविवेकनिमित्तोवास्वस्वामिभावइतिपंचशिखआ
ह तन्मतेप्यनादिरित्यर्थः एतदेवस्वमतंप्रागुक्तत्वात् लिंगशरीरनिमित्तकइतिसनंदनाचार्यः सनंदनाचार्यस्तु
लिंगशरीरोत्पत्तिनिमित्तकप्रकृतिपुरुषयोर्भोग्यभोक्तृभावइत्याहलिंगशरीरद्वारैवभोगादितितन्मतेअनादिम

त्यर्थः लिंगशरीरस्वस्वामिभावयोरित्याशयः मतत्रयेपिस्वत्वंस्वभुक्तंरत्तिवासनाविलंस्वामित्वंचस्वानिष्टवासनाहेतुश्च
मात्कत्वमतः प्रलयेलिंगशरीराभावेपितज्जन्योवासनारूपःस्वामिभावः संभवत्येवेतिरत्तिवासनानांकर्मजन्यत्ववद
विवेकजन्यत्वमपिजन्मादिव्यवहारास्तीतिमतत्रयेपिनानुपपत्तिःशास्त्रावाक्यार्थमुपसंहरति यद्वातद्वातदुच्छित्तिः
पुरुषार्थः तदुच्छित्तिः पुरुषार्थः कर्मनिमित्तोविवेकादिनिमित्तोवाभवतिप्रकृतिपुरुषयोर्भोग्यभोक्तृभावः स
र्वथाप्यनादितया दुःखच्छेदस्यास्योच्छेदः परमपुरुषार्थइत्यर्थः अथवास्वस्वामिभावोभोग्यमोक्षवारूपोयद्वा
तद्वायत्किंचित्भवतुचेतनेसाक्षात्दुःखादेः संबंधोवाप्रतिबिंबरूपोवास्तवसंबंधोवासर्वस्यैवतदुच्छित्तिःपुरु
षार्थोदुःखंमाभुंजीयामितिप्रार्थनादर्शनादित्यर्थः तदेतदादौप्रतिज्ञातंत्रिविधदुःखात्यंतनिरत्तिरत्यंतपुरुषा
र्थइतिनतत्रसुखदुःखसाधारणभोगनिरत्तिःपुरुषार्थउच्यतेतत्रतुदुःखमात्रनिरत्तिरितिकथंतत्रोक्तस्यात्रो
पसंहारइतिचेन्नशब्दभेदेप्यर्थाभेदात्सुखंहितावदुःखपक्षेनिक्षिप्तमितिसुखभोगोपिदुःखभोगएवदुःखभोगो
पिप्रतिबिंबरूपेणपुरुषेदुःखसंबंधएवस्वतोनित्यानिर्दुःखत्वेनचप्रथमसूत्रेपिप्रतिबिंबरूपेणैवदुःखनिरत्तिःवि
वक्षितेत्येकएवार्थःउपक्रमोपसंहारसूत्रयोरितिबहुलांशस्यद्विरावृत्तिः शास्त्रसमाप्त्यर्थाशास्त्रमुख्यार्थविस्तारंतंत्राख्ये
नुक्तपुराणोःषष्ठाध्यायेकृतःपश्चाद्वाक्यार्थश्चोपसंहृतः नदिदंसांख्यशास्त्रंकपिलमूर्तिर्भगवान्विष्णुरखिललोक
हितायप्रकाशितवान् यत्तत्रवेदांतिब्रुवःकश्चिदाहसांख्यप्रणेताकपिलोनविष्णुः किंत्वग्नेरवतारःकपिलांतरंअग्निः
सकपिलोनामसांख्यशास्त्रप्रवर्तकइतिस्मृतेरितितल्लोकव्यामोहनमात्रं एतन्मेजन्मलोकेस्मिन्मुमुक्षूणांदुराशया
त् प्रसंख्यानायतत्वानांसंमतायात्मदर्शनइत्यादिस्मृतिषुविष्णववतारस्यदेवहूतिपुत्रस्यैवसांख्योपदेष्टृत्वाव
गमात् कपिलद्वयकल्पनागौरवाच्चतत्रचाग्निशब्दोःग्न्याख्यशक्त्यावेशादेवप्रयुक्तः अन्यथाविश्वरूपप्रदर्श
ककृष्णस्यापिविश्वावतारकल्पनात्भेदापत्तेरितिदिक् सांख्यकुल्यांसमापूर्यवेदाब्धिमथितामृतैः कापिलर्षिज्ञा
नयज्ञस्यषीनाप्यायययसुरा तद्वचः श्रद्धयातस्मिनुगुणाच्चस्थिरभावनः तत्प्रसादबलेनैवंछास्त्रंहिविवृत्तंमया
विज्ञानभिक्षुरचितंसांख्यभाष्यंसतांमनः अकर्मयत्वयस्कांतंपथायोविषयांतरात् इतिश्रीविज्ञानाचा ३२

र्यविरचितेकापिलसांख्यप्रवचनशास्त्रस्यभाष्येतंत्राध्यायः षष्ठः समाप्तः शुभंभवतु ७ श्रीः राम

143
1990

३३

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

144
1990

इतिसांख्यभाष्यतंत्राध्यायः समाप्तः